॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

९८

मुक्तावली-प्रकाशः

(न्यायसिद्धान्तमुक्तावली-प्रश्नोत्तरीयम्)

(सम्पूर्ण)

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु प्रश्नोत्तर सहित

लेखक

श्री राजेन्द्रप्रसाद कोठ्यारी

चौखम्बा सुरभारती प्रकाशन

वाराणसी

मुक्तावली-प्रकाशः (न्यायसिद्धान्तमुक्तावली-प्रश्नोत्तरीयम्) (सम्पूर्ण)

परीक्षापयोगी प्रश्नोत्तरात्मक पुस्तकें
(संस्कृत भाषा में)

अभिधावृत्तिमातृका-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
अलङ्कारशास्त्रस्येतिहासः । परमेश्वरदीन पाण्डेय
उत्तररामचरितादर्श । डॉ. रमाशंकर मिश्र
कर्पूरमंजरी-दीपिका । गौरीनाथ मिश्र 'भास्कर'
कादम्बरी-कला-प्रकाशः । डॉ. नरेश झा
कादम्बरी-सोपानम् । शिवप्रसाद द्विवेदी
काव्यप्रकाश-रहस्यम् । श्रीरामजीलाल शर्मा
काव्यमीमांसा-दीपिका । वेदव्यास शुक्ल (१-५ अध्याय)
काव्यशास्त्रस्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
काव्यालङ्कारसूत्रवृत्तेः-आलोकः । (तृतीयाधिकरण प्रश्नोत्तरी) । डॉ. नरेश झा
किरातार्जुनीय-रहस्यम् । डॉ. कृष्णदेव प्रसाद । १-२ सर्ग, ३-६ सर्ग
कुमारसम्भवम्-रहस्यम् । श्री रामप्रसाद त्रिपाठी । १-२ सर्ग
कुवलयानन्दालोकः । डॉ. नरेश झा
चन्द्रकलानाटिका-रहस्यम् । परमेश्वरदीन पाण्ड़ेय
चन्द्रालोक-रहस्यम् । मानवल्ली तथा बेताल
चम्पूरामायण सोपानम् । डॉ शिवप्रसाद द्विवेदी
तर्कभाषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
तर्कसंग्रह-रहस्यम् । श्रीकीर्त्यानन्द झा
दशकुमारचरित-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
ध्वन्यालोक-प्रकाशिका । श्री राजेन्द्रप्रसाद कोठ्यारी
नलचम्पू-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
नाट्यशास्त्र-प्रश्नोत्तरी । १-७ अध्याय; १७-२० अध्याय
नैषधीयचरित-प्रश्नोत्तरी । मिश्र एवं द्विवेदी । १-५ सर्ग; १०-१३ सर्ग
परमलघुमञ्जूषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
परिभाषेन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
पाणिनीयशिक्षा-सोपानम् । डॉ. बालगोविन्द झा
प्रतिमानाटक-रहस्यम् । डॉ. रमाशंकर त्रिपाठी
प्रबन्धसङ्ग्रहः (व्याकरणाचार्य निबन्ध) । डॉ. ब्रह्मानन्द त्रिपाठी
भट्टिकाव्य-दर्पणः । स्वामी प्रज्ञान भिक्षु । १-४ सर्ग, ५-८ सर्ग
भट्टिकाव्यालोकः । डॉ. रमाशङ्कर मिश्र । १४-१७ सर्ग, १८-२२ सर्ग
भारतीयसंस्कृति-सोपानम् । आचार्य शिवप्रसाद द्विवेदी
मध्यसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्रशास्त्री (१-४ खण्ड) सम्पूर्ण

8-8

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
९८

मुक्तावली-प्रकाशः

(न्यायसिद्धान्तमुक्तावली-प्रश्नोत्तरीयम्)

(सम्पूर्ण)

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु प्रश्नोत्तर सहित

लेखक
श्री राजेन्द्रप्रसाद कोठ्यारी

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के. 37/117 गोपालमन्दिर लेन

पो. बा. नं. 1129, वाराणसी 221001

दूरभाष : 2335263

© सर्वाधिकार प्रकाशकाधीन

नवीन संस्करण

मूल्य : 55.00

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)

गली नं. 21-ए, अंसारी रोड

दरियागंज, नई दिल्ली 110002

दूरभाष : 32996391

ई-मेल : chaukhamba_neeraj@yahoo.com

❖

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर

पो. बा. नं. 2113

दिल्ली 110007

दूरभाष : 23856391

❖

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)

पो. बा. नं. 1069, वाराणसी 221001

दूरभाष : 2420404

भूमिका

दर्शनशास्त्रस्य जन्म तु जिज्ञासया भवति। जिज्ञासा बुद्धेर्गुणविशेष एव। बुद्धिमत्प्राणित्वाद् जिज्ञासा मानवस्य स्वाभाविको धर्मः। तेन कुतोऽहं कस्मादहं वेति विषयिका जिज्ञासा मानवबुद्धौ प्रकृत्या उद्बुद्धा। तस्योत्तरनिर्धारणक्रमे दर्शनानाम् उद्भवः कल्प्यते।

मानवबुद्धौ जिज्ञासाया जन्म वैदिककालात्पूर्वमेव जातः। तेन वैदिक-साहित्ये जिज्ञासायाः प्रतिविम्बं तस्योत्तरञ्च विविधप्रकारेण दृश्यते। वैदिक-साहित्यस्तु विश्वस्याद्यतम एव साहित्यः इति सर्वविदितम्। अत एव जिज्ञासा-अनादिकालादेवोद्बुद्धा इति स्वीक्रियते। अस्या जिज्ञासाया निवृत्यर्थं विविध-दर्शनानां जन्म बभूव इति भारतीया विचारधारा।

पाश्चात्या दर्शनशास्त्रस्य जन्म दुःखनाशायेति स्वीकुर्वन्ति। तन्मतानुसारं जगदिदं दुःखमयमेव। भारते बौद्धा अपि जगद् दुःखमयमिति कल्पयन्ति। तत्तु न भारतीय दर्शनशास्त्रसम्मतम्। भारतीय दर्शनशास्त्रस्य मतेन तु जगदिदं सुख-दुःखमोहात्मकमिति कल्प्यते।

वैदिककाले तस्या भारतीयचिन्तनधाराया यदुद्भवः दृश्यते तस्या परिणति-रूपेणोपनिषदां जन्म तथा च तस्यैव चिन्तनधाराया परिणतौ षडास्तिक दर्श-नानां, त्रयाणां नास्तिकदर्शनानाञ्चोद्भवो जातः। तत्र वेदान्त-मीमांसा-सांख्य-योग-न्याय-वैशेषिकेति षडास्तिकदर्शनानि। चार्वाकबौद्धजैनेति नास्तिकदर्शनानि।

आस्तिक-नास्तिकेति विभाजनं न ईश्वरास्तित्वाधारं परन्तु वेदानां प्रामाण्याधारं स्वीकृतम्। तेन चार्वाकादयः वेद प्रामाण्यं न स्वीकुर्वन्ति वेदान्ता-दयः वेदप्रामाण्यादेव स्वसिद्धान्तान् पोषयन्ति।

एवमास्तिकदर्शनानां समानसिद्धान्तानुसारं वर्गत्रयं कल्पितम्। तत्र वेदान्त-मीमांसयोरेक वर्गः, सांख्ययोगयोः अपरः, न्यायवैशेषिकयोः तृतीयो वर्गः।

न्यायवैशेषिकं समानतन्त्रत्वेन स्वीक्रियते। न्यायदर्शने प्रमाणादिषोडश-पदार्थानां वैशेषिके तु द्रव्यादिसप्तपदार्थानां विवेचनं कृतम्। तथापि उभयोः न परस्परविरुद्धत्वम्। न्यायदर्शने प्रमाणादिपदार्थानां विवेचने कृते सत्यपि

प्रमाणानामेव विशेषतो विवेचनं कृतम् । तेनायं शास्त्रं प्रमाणशास्त्रमिति तर्कशास्त्रमिति वा कथ्यते ।

प्रमाण-प्रमेय-संशय-प्रयोजन - द्रष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निश्श्रेयसाधिगमः । (गौ० न्या० सू० १ । १ । १) इति न्यायदर्शनस्यादिमं सूत्रम् । अत्रोक्तानां पदार्थानां विवेचनमेव न्यायदर्शनस्य वर्ण्यविषयः । वैशेषिकोक्तानि सप्तपदार्थानि अत्र प्रमेयान्तर्भूतानि । गौतमीयन्यायसूत्रस्तु न्यायदर्शनस्यादिमं ग्रन्थरत्नम् । कालान्तरे गङ्गेशोपाध्यायेन अपर सरण्या न्यायोक्तपदार्थानां विवेचनं कृतम् । तेन नव्यन्यायस्य धारा प्रवाहिता ।

न्यायसिद्धान्तमुक्तावली न्यायदर्शनस्य प्राथमिकछात्राणां कृते सरलतमं प्रधानतमं च ग्रन्थमस्तीति विविधविश्वविद्यालयेषु परीक्षासु निर्धारितः । तत्र शताधिकाष्टाषडति कारिकाभ्यः न्यायदर्शनस्य दुरूहविषयाणां सरलतया व्याख्या कृता । तदपि स्वशिष्यबोधाय वृत्ति द्वारा पुनः पुनः पूर्वपक्षनिरसनपूर्वकं न्यायसम्मतसिद्धान्तानां साफल्येन स्थापनं कृतम् ।

सत्स्वपि विविधटीकासु परीक्षाब्धितितीर्षूणां छात्राणां कृते अयं ग्रन्थरत्नं न तथोपकारकं जातमिति चौखम्बासुरभारतीप्रकाशकैः प्रेर्यमाणोऽहमस्मिन् कार्ये प्रवृत्तोऽभवम् । पुस्तकस्य शीघ्रप्रकाशनायात्र चौखम्बासुरभारतीप्रकाशका विशेषेण धन्यवादार्हाः ।

अत्र लेखने मया विशेषतः संक्षेपसरणिरेवावविलम्बिता । यत् किञ्चिदत्र साफल्यमवाप्तं तत्सर्वमेव ब्रह्मलीनानामस्मत्पितृचरणानां नित्यनैमित्तिकश्रौत-स्मार्तकर्मनिष्पातानां वेदान्तसाहित्यव्याकरणधर्मशास्त्रधुरन्धराणां पं० पूर्णानन्द-कोठारिवर्याणां वात्सल्यपूर्णसदुपदेशप्रसादेनैव । यैरहं बाल्यकाल एव सरल-सुबोधभाषया गभीरन्यायसिद्धान्तैः परिचायितः । अत एव तेषां वात्सल्य-पूरितोपदेशानां फलमेतत्तेभ्य एवोपायनी क्रियते ।

गङ्गादशहरा
सं० २०४३

विदुषां वशंवदः
राजेन्द्रप्रसादः कोठारी

प्रश्नानुक्रमणिका

१ मङ्गलस्य कर्तव्यतां पूर्वपक्षनिराशपूर्वकं न्यायसिद्धान्तमुक्तावलीदिशा प्रतिपाद्यताम् । १

२ श्रीविश्वनाथतर्कपञ्चाननदिशा ईश्वरसिद्धिः पूर्वपक्षनिष्कृतिपूर्वकं प्रदर्श्यताम् । ३

३ न्यायशास्त्रे पदार्थशब्देन किमवगम्यते ? कतिविधाः पदार्थाः ? किं शक्तिरपि पृथक् पदार्थः न वा ? इति विश्वनाथतर्कपञ्चाननदिशा वर्णयत । ४

४ किं नाम सादृश्यम् ? किमेतत् पृथकपदार्थम् उत न ? इति विश्वनाथ-तर्कपञ्चाननदिशा व्याख्यायत । ५

५ द्रव्यत्वजातिसिद्धौ किं प्रमाणम् ? इति न्यायसिद्धान्तमुक्तावलीदिशा प्रदर्श्यताम् । ६

६ तमसो पृथक् द्रव्यत्वे मीमांसकमतनिराशपूर्वकं सिद्धान्तपक्षं स्थापयत । ७

७ सामान्यस्य लक्षणं सपदकृत्यं व्याख्यायताम् । ८

८ जातिबाधकाः के दोषाः ? सोदाहरणं तान् विशदयत । ९

९ सामान्यस्य परापरभेदेन द्वैविध्यं प्रतिपाद्य द्रव्यादिषु परत्वमपरत्वं वा व्यवस्थाप्यताम् । ११

१० सामान्यस्य लक्षणमुक्त्वा तस्य परापरभेदेन द्वैविध्यं प्रतिपादयत । १२

११ श्रीविश्वनाथतर्कपञ्चाननदिशा विशेषं निरूपयत । १२

१२ समवायस्य किं स्वरूपम् ? कुत्र च तत्सम्बन्धं भवतीति सविस्तरं विवेचयत । १३

१३ समवायसिद्धौ अनुमानप्रक्रियां प्रदर्श्य तत्र मीमांसकमतं निराक्रियताम् । १४

१४ समवायस्य लक्षणमुक्त्वा तत्सिद्धौ प्रमाणं प्रदर्श्यताम् । १६

१५ अभावपदार्थं निरूप्य तस्य भेदान् प्रदर्शयत । १६

१६ अभावानामधिकरणात्मकत्वमाशङ्क्य तन्निराकरणं न्यायसिद्धान्तानुसारं कुरुत । १९

१७ 'अभावानां किञ्चिद्वैशिष्ट्यं नाम सम्बन्धान्तरमस्ति इति सयुक्तिकं निराकुरुत । २०

१७ न्यायसिद्धान्तमुक्तावलीदिशा सप्तपदार्थानां परस्परसाधर्म्यं निरूपयत । २०

१८ द्रव्यादिसप्तपदार्थानां ज्ञेयत्व-प्रमेयत्व-अभिधेयत्व-अनेकत्व-समवायित्व-सत्त्व-सगुणत्व-सक्रियत्व-सामान्यत्व दृष्ट्या साधर्म्यवैधर्म्ये निरूप्यताम् । २२

१९ परमाण्डल्यस्य कथन्नकारणत्वमिति विशदं प्रतिपाद्यताम् । २२

२० परममहत्परिमाणातीन्द्रियसामान्यविशेषानाम् अकारणत्वं सयुक्तिकं निर्दिश्यताम् । २३

२१ 'परमण्डल्यभिन्नानां कारणत्वमुदाहृदम्' इति कारिकार्थः सप्रपञ्चं व्याख्यायताम् । २४

२२ 'एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः' इति वाक्यं सविस्तरं विवेचयत । २४

२३ कारणस्य किं लक्षणम् इति सविस्तरं विवेचयत । २४

२४ कारणस्य भेदान् विलिख्य तान् लक्षणोदाहरण-प्रदर्शनपूर्वकं विवृणुताम् । २५

२५ कारणस्य लक्षणं किम् ? कतिविधं च तत् ? इति युक्तिपूर्वकं सलक्षणं सोदाहरणं प्रतिपाद्यताम् । २६

२६ असमवायकारणस्य किं लक्षणम् ? तुरीतन्तुसंयोगस्यासमवायिकारणत्वं कथं न ? असमवायकारणस्य परिस्कृतलक्षणं किम् ? इति व्याख्यायताम् । २६

२७ किं नामान्यथासिद्धम् ? कतिविधं च तत् ? लक्षणोदाहरणनिर्देशपूर्वकं विशदीक्रियताम् । २८

२८ 'समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥'
कारिकेयं सम्यग् व्याख्येया । ३०

२९ क्षित्यादिद्रव्याणां परस्परसाधर्म्य-वैधर्म्ये निरूप्यताम् । ३०

३० '............................अथाकाशशरीरिणाम् ।
अव्याप्तवृत्तिः क्षणिको विशेषगुण ईष्यते ॥'
इति पादोनकारिका व्याख्येया । ३२

३१ पृथिव्यादीनां गुणाः उद्देशमात्रेण दर्शयत । ३२

३२ पृथिव्या लक्षणं सयुक्ति प्रदर्श्यताम् । ३३

३३ पृथ्वीत्वजातौ किं मानमिति विवृणुताम् । ३४

३४ पाषाणादौ पृथ्वीत्वं कथं सिद्धयतीति विवृणुत । ३४

३५ पृथिव्या लक्षणं विलिख्य तस्य रूपरसगन्धस्पर्शान् व्याख्यायताम् । ३५
३६ पृथिव्या लक्षणं विलिख्य तस्य भेदान् प्रदर्शयत । ३६
३७ पूर्वपक्षनिराशपूर्वकमवयविनः सिद्धिः प्रदर्श्यताम् । ३८
३८ परमाणुसिद्धौ किं मानमिति सविस्तरं व्याख्याय तस्य नित्यत्वं साधयत । ३९
३९ पार्थिवं शरीरं किम् ? कथञ्च नृसिंहशरीरे तल्लक्षणसमन्वयः ? ४०
४० घ्राणेन्द्रियस्य पार्थिवत्वं साधयत । ४१
४१ जलानां स्वरूपं निरूप्य जलत्वजातिः साधयत । ४२
४२ वर्णः शुक्लः रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम् ॥
इति कारिका व्याख्येया । ४३
४३ तेजसः किं लक्षणम् ? तस्य स्पर्शरूपादीन् निरूप्य भेदान् प्रदर्शयत । ४४
४४ स्वर्णस्य तेजस्त्वे किं प्रमाणमिति स्फुटं प्रतिपाद्यताम् । ४५
४५ न्यायसिद्धान्तमुक्तावल्यनुसारं वायुं निरूपयत । ४६
४६ आकाशस्य सत्त्वे प्रमाणं निर्दिश्य तत्र विशेषगुणान् निरूपयत । ४७
४७ कालस्य सत्त्वे किं प्रमाणमिति पं० विश्वनाथतर्कपञ्चाननभट्टाचार्यदिशा दर्शयत । ४८
४८ दिशः लक्षणं कृत्वा तस्यैकत्वं साधयत । ४९
४९ आत्मनः किं लक्षणमिति सम्यग्विविच्य आत्मन अस्तित्वे आत्मत्व-जातिसिद्धौ च प्रमाणमुपस्थाप्यताम् । ४९
५० आत्मविषये चार्वाकमतं प्रदर्श्य न्यायदिशा तं परीक्ष्यताम् । ५१
५१ आत्मविषये क्षणिकविज्ञानवादिबौद्धमतमुपस्थाप्य तन्निराक्रियताम् । ५४
५२ आत्मविषये नित्यविज्ञानवादिवेदान्तिमतमुपस्थाप्य निराक्रियताम् । ५७
५३ आत्मविषये सांख्यमतं प्रस्तूय न्यायसिद्धान्तानुसारि तन्निरस्यताम् । ६०
५४ न्यायसिद्धान्तमुक्तावलीदिशा न्यायशास्त्रसम्मतम् आत्मतत्त्वं विविच्यताम् । ६२
५५ किं नाम बुद्धिः ? कतिविधा च ? इति सप्रपञ्चं व्याख्यायताम् । ६३
५६ प्रत्यक्षस्य लक्षणं तस्य भेदांश्च सम्यङ् निरूप्य तस्य विषयाश्च प्रतिपाद्यताम् । ६५
५७ द्रव्यप्रत्यक्षे रूपस्य कारणत्वमस्ति न वा ? इति विषये प्राचीन-नवीन नैयायिकमतम् उपस्थाप्यताम् । ६७

५८ 'त्वचो योगो मनसा ज्ञानकारणम्' इति कारिकांशः सम्यग्व्याख्येयः । ६८
५९ किं नाम निर्विकल्पकं ज्ञानम् ? तस्य कथं प्रत्यक्षं न ? इति सविस्तरं विविच्यताम् । ६९
६० षड्विधप्रत्यक्षे महत्वस्य हेतुत्वं प्रतिपाद्यताम् । ७०
६१ किं नामेन्द्रियत्वम् ? न्यायसिद्धान्तमुक्तावलीदिशा तस्य जातित्वं निराक्रियताम् । ७०
६२ षड्विधसन्निकर्षम् उदाहरणप्रदर्शनपूर्वकं निरूपयत । ७१
६३ 'यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते' कारिकांशं व्याख्यायताम् । ७२
६४ अलौकिकसन्निकर्षः कतिविधिः तान् उदाहरणद्वारा प्रतिपादयत । ७३
६५ सामान्यलक्षणसन्निकर्षस्य स्वरूपं प्रतिपाद्यताम् । ७३
६६ परामर्शस्य स्वरूपं प्रतिपाद्य अनुमितिं प्रति तस्य कारणत्वं प्रतिपाद्यताम् । ७५
६७ अनुमानस्य पञ्चावयवान् निरूपयत । ७६
६८ अनुमानस्य पञ्चरूपोपपन्नत्वं दर्शयत । ७६
६९ हेत्वाभासान् निरूपयत । ७७
७० उपमितिं निरूपयत । ७९
७१ पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी ॥
इति कारिका सप्रपञ्चं व्याख्येया । ८०
७२ शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥
इति पद्यं सोदाहरणं सप्रपञ्चं व्याख्येयम् । ८१
७३ तिङन्तानां शक्तिः कर्तृष्वस्ति उत वा धातुषु ? इति विषये वैयाकरणमतं निरस्य न्यायसम्मतसिद्धान्तं प्रतिपादयत । ८२
७४ शक्तिग्रहं जातौ किं वा व्यक्तौ भवतीति पूर्वपक्षोत्तरपक्षं प्रस्तूय पूर्वपक्ष निरसनपूर्वकम् उत्तरपक्षं स्थापयत । ८४
७५ किं नाम पदम् ? कतिविधं च तदिति सविस्तरं प्रतिपादयत । ८७
७६ आचार्यविश्वनाथतर्कपञ्चाननभट्टाचार्यकृतं लक्षणाशक्तिलक्षणं सपदकृत्यं विविच्यताम् । ८८
७७ तत्पुरुषसमासेन समस्तपदे कथं लक्षणाया अनुवृत्तिरिति साधयत । ८९

७८ समस्तपदानामर्थबोधे लक्षणाया कुत्र स्थितिरिति सदृष्टान्तं विवेचयत । ९०

७९ शाब्दबोधे आकांक्षा-योग्यतासत्तोनाम् अपेक्षितत्वं दर्शयत । ९१

८० आसत्तिशब्दस्यार्थं किम् ? कथञ्च आसत्तिः शाब्दबोधे कारणम् ? इति विविच्यताम् । ९२

८१ शाब्दबोधे योग्यतापदार्थं बोधयत । ९४

८२ आकांक्षा-लक्षणं प्रदर्श्य शाब्दबोध आकांक्षाया कारणत्वं दर्शय । ९५

८३ शाव्दबोधे तात्पर्यस्य कथं कारणत्वमिति सम्यक् निरूपणीयम् । ९६

८४ स्मृतेः लक्षण प्रतिपाद्यताम् । ९८

८५ मनसः सिद्धौ किं मानम् ? इति सम्यग् व्याख्याय मनसोऽणुत्वं साधयत ९९

८६ गुणत्वजातिसिद्धौ किं मानम् ? इति सविशदं दर्शयत । १०१

८७ गुण पदार्थस्य लक्षणं प्रदश्र्य सविशदं व्याख्यायताम् । १०१

८८ गुणत्वजातेः सिद्धिं प्रदश्र्य गुणसामान्यलक्षणं लिखत । १०२

८९ रूपत्वजातेः सिद्धिं प्रदश्र्य रूपं निरूप्यताम् । १०३

९० चित्रवर्णे रूपत्वं साधयत । १०४

९१ वैशेषिकसम्मतां पीलुपाकप्रक्रियां तत्र क्षणप्रक्रियां च निरूप्य न्यायसम्मतं पिठरपाकप्रक्रियामपि व्याख्यायताम् । १०५

९२ किं नाम प्रमा ? के च प्रमायाः गुणाः ? इति व्याख्यायत । १०८

९३ 'प्रामाण्यवाद'-शब्दस्य कोऽर्थः ? किं नाम प्रामाण्यं तस्य स्वतोग्राह्यत्वम् उत वा परतोग्राह्यत्वं स्वीकार्यम् ? प्रामाण्यवादविषये पूर्वपक्षनिरसनपूर्वकं न्यायसिद्धान्तमुक्तावलीकारमतं प्रदश्र्यताम् । १०९

॥ श्रीः ॥

मुक्तावली-प्रकाशः

(न्यायसिद्धान्तमुक्तावली-प्रश्नोत्तरीयम्)

प्रत्यक्षखण्डम्

(१) प्रश्नः—मङ्गलस्य कर्तव्यतां पूर्वपक्षनिराशपूर्वकं न्यायसिद्धान्तमुक्तावलीदिशा प्रतिपाद्यताम् ।

उत्तरम्—शुभकार्यारम्भे भगवत्स्मरणं लोके शिष्टपरम्पराप्राप्तमस्ति। तथैव ग्रन्थारम्भेऽपि शिष्टैः मङ्गलाचरणं कर्तव्यमिति परम्पराप्राप्तमस्ति। तत्र मङ्गलं त्रिप्रकारकम्—१. आशीर्वादात्मकम्, २. नमस्कारात्मकम्, ३. वस्तुनिर्देशात्मकञ्चेति । यदुक्तम्—'आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम् ।'

तथाह भगवान् भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाण्यध्येतारश्च बुद्धियुक्ता यथा स्युरिति ।' इत्याप्तवाक्यात् प्रसिद्धप्रस्थानाच्च मङ्गलमाचरितव्यम् । इति मङ्गलाचरणन्तु नैयायिकानां तदितराणाञ्च सम्मतमेव ।

किमर्थमिति चेत्—प्रथन्ते इति, प्रसिद्धिं प्रचारञ्च गच्छन्तीति भगवान्भाष्यकारः । इतरे तु विघ्नध्वंसं, निर्विघ्नग्रन्थसमाप्तिरिति वा भणन्ति ।

अत्र चार्वाकास्तु न इति निराकुर्वन्ति । शतशः ग्रन्थाः मङ्गले सत्यपि कालवशादविलीना जाताः । अत एव प्रथन्ते इति निरस्तम् । तथैव च सत्यपि मङ्गले केचित् कादम्बर्यादयो न समाप्तिं गता, केचित्तु नास्तिकग्रन्थाः किरणावलीत्यादयो विना मङ्गलाचरणेऽपि निर्विघ्नं समाप्ता इति अन्वयव्यतिरेकाभ्यां मङ्गलं निरर्थकमिति अनुमीयते ।

तथाहि—मङ्गलम् अयुक्तं निष्फलत्वात् । 'न कुर्यान्निष्फलं कर्म' इति शिष्टवचनप्रामाण्यात् । अत्र मङ्गलस्य निष्फलत्वं साधयन्ति अन्वय-व्यतिरेकाभ्याम्, यथा—'मङ्गलं विघ्नध्वंसं प्रति समाप्तिं प्रति वा कारणत्वाभाववत्,

कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वात्, घटं प्रति तन्तुवत् ।' इति । यत्तु नैयायिकैरुच्यते तत्रापि व्यभिचारः प्रदर्श्यते—यत्र यत्र मङ्गलवत्त्वम् तत्र तत्र निर्विघ्नसमाप्तिमत्त्वमित्यन्वयः, यत्र यत्र मङ्गलाभावः तत्र तत्र निर्विघ्नग्रन्थसमाप्त्यभावः इति व्यतिरेकः, उभयत्रापि सव्यभिचारत्वम् । अतो न तत्तथा इति मङ्गलं निष्फलम् इति च सिद्धान्तितः ।

नैयायिकास्तु तन्निराकुर्वन्ति–यथा—'मङ्गलं सफलम्, अविगीतशिष्टाचारविषयत्वात्, दर्शादिवत् ।' इति । यद्यत् अविगीतशिष्टाचारविषयं तत्तत् सफलं, यथा दर्शः । तत्र—बलवदनिष्टाननुबन्धित्वम् अविगीतत्वम्, फलसाधनांशे भ्रान्तिरहितत्वं शिष्टत्वम्, आचारः कृतिः, इति अविगीतशिष्टाचारः । तथात्वात् मङ्गलस्य साफल्यं सिद्धम् । अस्त्वेवम्, फलमपि वक्तव्यमिति चेत् सत्यम्, सति च दृष्टफले अदृष्टफलकल्पनम् अन्याय्यम्, दृष्टफलन्त्वत्र निर्विघ्नग्रन्थसमाप्तिः । तथा च 'मङ्गलं समाप्तिफलकं समाप्त्यान्याफलकत्वे सति सफलत्वात्, यन्नैवं तन्नैवं, यथा दर्शादिः । इति ।

यत्तु क्वचित् मङ्गले सत्यपि ग्रन्थसमाप्तिः न दृश्यते इति तर्क्यते तत्र समाधीयते—विघ्नानां बलवत्त्वम् । मङ्गलन्तु न तथा बलवान्, विघ्ना अधिकतरबलवन्तः इति । यत्र पुनः मङ्गलं विनाऽपि कार्यसिद्धिः तत्र जन्मान्तरसंस्कारवशात् मङ्गलवानित्युच्यते ।

अत्र कैश्चिद् आशङ्क्यते—मङ्गलन्तु क्षणिकं शब्दात्मकत्वात्, समाप्तिस्तु दीर्घकालानन्तरभावि, अतो नात्र कार्यकारणभावः कल्प्यते, इति । तदपि समाधीयते अवान्तरव्यापारेणेति । कार्यकारणभावस्तु अवान्तरव्यापारेण सम्भाव्यते । अत्रावान्तरव्यापारः विघ्नध्वंसात्मकः इति । यथा अद्य विधीयमानं यज्ञं कालान्तरे स्वर्गरूपपरिणामस्य जनकमिति ।

अत्र नव्यास्तु विघ्नध्वंस एव मङ्गलस्य फलं, समाप्तिस्तु प्रतिभादिजन्यमिति कथयन्ति । तत्र प्रतिभा नाम 'प्रज्ञा नवनवोन्मेषशालिनी' इति । ग्रन्थसमाप्तिस्तु प्रतिभादिकारणकमेव । अत एव मङ्गलन्त्वत्र न हि कारणरूपेण ग्रहीतव्यमिति ।

ननु अनुद्भूतविघ्नस्य तु मङ्गलं निष्फलमेवेति चेत् न, विघ्नाशङ्कयैव तदाचरणं कर्तव्यमिति । शिष्टपरम्पराभिरपि तथा प्राप्तत्वात् । निष्फलत्वकल्पने तु तत्प्रतिपादकश्रुतेः अप्रामाण्यापत्तिरिति न वाच्यम्—सति विघ्ने तस्य ध्वंस इति श्रुतिवाक्यस्य तात्पर्यावसानात्, सति पापे प्रायश्चित्तवत् ।

एवं मङ्गलं विघ्नध्वंसं प्रति तद्द्वारा च समाप्तिं प्रति कारणमिति प्रतिपाद्य उपसंह्रियते ग्रन्थकर्तृभिः यथा—केषांचिद्विघ्नानां मङ्गलेन केषाञ्चिच्च विनायकस्तवादिभिः ध्वंसः जायते एवं विघ्नध्वंसे जाते निर्विघ्नग्रन्थसमाप्तिसम्भवः। क्वचिच्च विघ्नानामत्यत्नाभाव एव ग्रन्थसमाप्तिं प्रति कारणमिति सर्वमुपपन्नम्।

(२) प्रश्नः—श्रीविश्वनाथतर्कपञ्चाननदिशा ईश्वरसिद्धिः, पूर्वपक्षनिष्कृतिपूर्वकं प्रदर्श्यताम्।

उत्तरम्—श्रीविश्वनाथतर्कपञ्चाननभट्टाचार्यैः स्वग्रन्थारम्भे नूतनजलधररुचये इत्यादिभिः भगवत्स्मरणं कृतं तत्र वृत्तौ च ईश्वरसिद्धिः प्रदर्शिता तद्यथा—संसारमहीरुहबीजाय इत्यनेन तस्य (ईश्वरस्य) कर्तृत्वमुक्तम्। अतएव प्रथमम् ईश्वरसिद्धिः पूर्वपक्षनिरसनपूर्वकं प्रदर्श्यते, तद्यथा—

पूर्वपक्षः—ईश्वरं नास्ति, प्रमाणाभावात्। यत्र यत्र प्रमाणाभावः तत्र तत्र सिद्ध्यभावः। यथा शशश्रृङ्गम्, व्योमपुष्पं वा। तत्र प्रमाणानि नाम—प्रत्यक्षानुमानोपमानशब्दाः।

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधम् लौकिकालौकिकभेदात्। लौकिकन्तु—घ्राणज-रासन-चाक्षुष-त्वाच्-श्रौत्र-मानसभेदात् षड्विधम्, अलौकिकं तावत्—सामान्यलक्षण-ज्ञानलक्षण-योगज-भेदात् त्रिविधम्। ईश्वरः न लौकिकप्रत्यक्षविषयः—घ्राण-रासन-चाक्षुष-त्वाच्-श्रौत्र-मानस-सन्निकर्षाभावात्, नाप्यलौकिकप्रत्यक्षविषयः सामान्यलक्षण-ज्ञानलक्षण-योगजज्ञानविषयाभावात्।

न चेश्वरः अनुमेयः। लिङ्गपरामर्शोऽनुमानम्। यथा धूमादिलिङ्गेनाग्न्यादिज्ञानम्। नात्रेश्वरस्य कश्चिल्लिङ्गो दृश्यते। अत ईश्वरो नानुमानगम्यः। न च स उपमानविषय तत्सदृशवस्त्वभावात्। शब्दप्रमाणवेद्योऽपि नेश्वरः, तत्प्रमापकशब्दस्याभावात्। इति।

अर्थापत्त्यादयस्तु न पृथक्प्रमाणानि, नैयायिकैः युक्तिपूर्वकं न्यक्कृतत्वात्। अत एव ईश्वरः नास्ति प्रमाणाभावात् इति सिद्धम्।

उत्तरपक्षः—ईश्वरासिद्धिवाचकं नास्तिकमतं नैयायिका न स्वीकुर्वन्ति तर्कयुक्त्यसहत्वात्। तत्रेश्वरः अनुमानगम्यः इति नैयायिकाः। अनुमानञ्चात्र दर्शयन्ति—संसारमहीरुहबीजायेति।

यथा—घटादिकार्यं सकर्तृकं कार्यत्वात् पटादिकार्यवत्, इत्यनुमानेन यथा घटादीनां सकर्तृकं द्योत्यते तथैवात्र 'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटपटादि-

कार्यवत्' इत्यनुमानप्रक्रिया। अत्र क्षित्यङ्कुरादिकं पक्षम्, सकर्तृकत्वं साध्यम्, कार्यत्वात् इति हेतुः। तथा चात्रान्वयः—यद्यत् कार्यं तत्तत् सकर्तृकम् यथा घटम्, इति। क्षित्यङ्कुरादयः कार्यजातम्, अत एव कर्तृमत्। कर्ता चेश्वरः अन्यत्र कस्मिंश्चित् कर्तृत्वासम्भवात्।

अत एव ईश्वरः अस्तीति सिद्धम्।

अत्र सत्प्रतिपक्षदोषमाशङ्क्य तन्निराकरोति—न च शरीराजन्यत्वेनेति। यस्य हेतोः साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। अत्र हि 'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटपटादिकार्यवत्'। इत्यस्य प्रतिपक्षे 'क्षित्यङ्कुरादिकं कर्तृत्वरहितं शरीराजन्यत्वात्' इति तर्क्यते न च तद्युक्तिसहः दृष्टान्ताभावात्। यथा हि नैयायिका अत्र स्पष्टं सदृष्टान्तमनुमानं दर्शयन्ति नहि तथा पूर्वपक्षः। तदेवोच्यते ग्रन्थकृद्भिः अप्रयोजकत्वात् इति। तथा हि 'शरीराजन्यत्वमस्तु कर्तृत्वं मास्तु' इति न तर्कसहः। अत एव सत्प्रतिपक्षशङ्काऽपि निराकृता। इत्यलं विस्तरेण।

(३) प्रश्नः—न्यायशास्त्रे पदार्थशब्देन किमवगम्यते? कतिविधाः पदार्थाः? किं शक्तिरपि पृथक्पदार्थः न वा? इतिविश्वनाथतर्कपञ्चाननदिशा वर्णयत।

उत्तरम्—पदानाम् अर्थाः एव पदार्था इति व्युत्पत्तिलभ्योऽर्थ एव दर्शनशास्त्रे पदार्थशब्दवाच्यः। पदशब्दस्तु 'सुप्तिङन्तं पदम्' इति पाणिनिसूत्रानुगामी अथवा 'शक्तं पदम्' इति नैयायिका ब्रुवन्ति। तथैवाभिहितं न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डेऽपि। अस्यार्थः—पदार्थशब्देन तत्सर्वं ग्रह्यते यत्किञ्चिदिह शब्दैरभिव्यज्यते। अतः पदार्थशब्देन निखिलसृष्टिगतं तद्बहिर्भूतञ्च तत्त्वं ग्रह्यते इति सारः।

तदत्र पदार्थाश्च द्विविधा—भावपदार्थाः अभावपदार्थाश्च।

भावपदार्थाश्च षड्विधा—द्रव्य-गुण-कर्म-सामान्य-विशेषः-समवायभेदात्। यदुक्तं विश्वनाथतर्कपञ्चाननभट्टाचार्यैः—

'द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः॥ इति।

वस्तुतस्तु द्रव्यादय एते सप्तपदार्थाः वैशेषिकसम्मताः। नैयायिकैस्तु प्रमेयेष्वेव तेषामन्तर्भावो ग्रहीतः। तथापि वैशेषिक समानतन्त्रत्वात् न हीमे नैयायिक-

विरुद्धा, इत्यनेन न्यायशास्त्रेऽपि ग्रहीता इत्येवात्र विशेषेण ग्रहीतव्यम्। तदेवोक्तं विश्वनाथतर्कपञ्चाननभट्टाचार्यैः—'एते च पदार्था वैशेषिके प्रसिद्धा नैयायिकानामप्यविरुद्धाः।' इति।

शक्तेरतिरिक्तपदार्थत्वम्—दाहकत्वमग्नेर्गुणः (ऊष्णस्पर्शगुणान्तर्भावि)। तच्च चन्द्रकान्तमणिसान्निध्यात् प्रतिबन्धितत्वात् अदाहकत्वं गच्छति, तथा च चन्द्रकान्तमणिप्रतिबन्धक-सूर्यकान्तमणिसन्निध्यात् पुनः दाहकत्वं प्राप्नोति इति शक्तेर्वैशिष्ठ्यं स्पष्टम्।

अत्र शक्तिरिति तत्त्वं सप्तपदार्थेभ्य अतिरिक्तम् अष्टमं पदार्थं केचित् कथयन्ति नहि तत् नैयायिकानां वैशेषिकानां वा सम्मतम्। श्रीविश्वनाथतर्कपञ्चाननभट्टाचार्यदिशा पूर्वपक्षनिराशपूर्वकमेतत् प्रदर्श्यते।

पूर्वपक्षः—शक्तिः न द्रव्यरूपा गुणादिवृत्तित्वात्, नवा गुणात्मिका गुणादिभ्यो वैशिष्ठ्यात्, एवमेव न कर्मात्मिका, सामान्य-विशेष-समवाय-अभावेभ्योऽपि व्यतिरिक्ता अत एवास्य सप्तपदार्थव्यतिरिक्तत्वम्, अष्टमपदार्थत्वं सिद्धम् इति प्राभाकराः। अस्यार्थः—चन्द्रकान्तमणौ यत् दाहप्रतिबन्धकत्वशक्तिः विद्यते तत्तु रूपरसगन्धस्पर्शसंख्यापरिमाण-पृथक्त्व-परत्वापरत्व-संयोग-विभाग-बुद्धि-सुख-दुःख-इच्छा-द्वेष-यत्न-गुरुत्व-द्रवत्व-स्नेह-संस्कारादृष्ट-धर्माधर्म-शब्देति गुणेभ्यो व्यतिरिक्ता। तत्र शक्तेरन्तर्भावासम्भवात्। दृव्यादिभ्यस्तु शक्तेः पृथक्त्वं स्पष्टमेव अतो शक्तिः पृथक्पदार्थं एव इति।

उत्तरपक्षः—नैयायिकाः शक्तेः पृथक्पदार्थत्वं न स्वीकुर्वन्ति। तन्मतानुसारं मीमांसकमतमयुक्तम्, कल्पनागौरवदोषयुक्तत्वात्।

यत्तु चन्द्रकान्तमणिप्रतिबन्धसत्त्वात् अग्नेर्दाहकत्वशक्तिः प्रतिबन्धिता भवतीत्युक्तम्, तत्रोच्यते मण्यभाव-विशिष्टस्याग्नेरेव दाहकत्वं प्रति कारणत्वं कल्पनीयम्, तद्यथा—मृन्निर्मितघटस्य दाहवशाद्यत् रूपपरिवर्तनं गुणपरिवर्तनं वा जायते तत्र न केवलं वह्निः अपितु प्रतिबन्धकमण्याद्यभावविशिष्टो वह्निः कारणत्वं गच्छति इति।

यत्तु मीमांसकाः शक्तिरिति पृथक् पदार्थत्वं स्वीकुर्वन्ति [illegible] अनन्तशक्तीनां तेषां प्रागभाव-प्रध्वंसाभावादिकल्पनाऽपि कर्तव्या एवं कल्पना[illegible]ववशात् मूलक्षयकरी अनवस्थादोषापत्तिरपि सम्भाव्यते। इत्यल

(४) प्रश्नः—किं नाम सादृश्यम्? किमे[illegible]दार्थम् उत न? इति विश्वनाथतर्कपञ्चाननदिशा व्याख्यायत।

उत्तरम्—सादृश्यं, समत्वं, तुल्यता चेति समानार्थवाचिनो शब्दाः। तत्र सादृश्यं नाम उपमालङ्कारमूलं किं वा उपमानप्रमाणमूलञ्च। अस्यार्थः तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम् यथा चन्द्रसदृशं मुखम्, इति गो सदृशं गवय इति वा। अस्यार्थः समानधर्मित्वं सादृश्यमिति कथ्यते। गोत्वं नित्यम्, अश्वत्वमपि नित्यम् एवमुभयोः समानधर्मत्वे सादृश्यमिति कथ्यते।

अस्य सादृश्यस्य द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावेषु नान्तर्भावः सम्भवति। सादृश्यं सप्त पदार्थभिन्नः पदार्थः पदार्थत्वे सति सप्तपदार्थानन्तर्भावित्वात्।

ननु सामान्येऽपि समानधर्मत्वमिति वचनात् सादृश्यस्यात्राऽन्तर्भावः सम्भवति इति चेत्। न, गोत्वाश्वत्वयोर्नित्यत्वं सादृश्यं सामान्योपरि विद्यमानत्वात् अतो सादृश्यं अतिरिक्तः पदार्थः सामान्येतरवृत्तित्वे सति सामान्यवद्वृत्तिवत्त्वात्। इति सादृश्यस्य पृथक्सत्त्वे पूर्वपक्षम्।

न इति नैयायिकाः। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम् इति तल्लक्षणात्। यथा चन्द्रमिव वदनम् इत्यत्रचन्द्रवदनयोर्भिन्नत्वे सति आह्लादकत्वसामान्यधर्मं उभयत्र सममेव लक्ष्यते। इति। तदनुसारमयं सादृश्यं क्वचित्तु सामान्यरूपं क्वचिच्च उपाधिरूपमिति दृश्यते। यथोक्तं विश्वनाथतर्कपञ्चाननभट्टाचार्यैः—'सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति'।

(५) प्रश्नः—द्रव्यत्वजातिसिद्धौ किं प्रमाणम्? इति न्यायसिद्धान्तमुक्तावलीदिशा प्रदर्श्यताम्।

उत्तरम्—'द्रव्यत्वजातिमद् द्रव्यम्' इति द्रव्यलक्षणं नैयायिकसम्मतम्। अस्यार्थः यद्यद् द्रव्यत्वजातिमद्भवति तत्तद् द्रव्यमिति स्वीकरणीयम्। तत्र शङ्का उदेति यथा घटादिषु लोके शास्त्रे च समानरूपेण 'घटोऽयम्' 'घटोऽयम्' इति व्यवहारः दृश्यते न तथा द्रव्येषु। लोके तु केचिदेव पदार्था यथा हिरण्यरूप्यकादयः द्रव्यशब्देन बोध्यते, न तथा घृतजतुप्रभृतिषु द्रव्यत्वग्रहणं लोकसिद्धम् अत एव द्रव्यत्व जातेः सिद्धिः सन्दिग्धा इति शङ्कास्थानं युक्तमेव।

तत्र किं नाम द्रव्यत्वजातिसिद्धौ प्रमाणम्। न हि द्रव्यत्वं प्रत्यक्षगोचरम्। अत एव प्रत्यक्षप्रमाणेन द्रव्यत्वसिद्धिः न सम्भवति।

अत्रोच्यते नेति। न हि घटत्व-पटत्वादयः प्रत्यक्षसिद्धाः, तथापि न द्रव्यत्वाप्रत्यक्षे तदभावः कल्पनीयः। कार्यसमवायिकारणताऽवच्छेदकतेति। अवच्छेद-

कस्तु भेदकः येनेतरपदार्थेभ्यः पृथक्क्रियते। यथा 'घट' इति घटः द्रव्यम् पृथ्वी च तथाऽपि घटत्वावच्छिन्नम् घटः तं द्रव्यपृथ्वीभ्यां व्याकुरुते इति। तथा चात्र घटत्वं घटं प्रति समवायिसम्बन्धेन तिष्ठते।

एवमेवात्र द्रव्यरूपेण किञ्चित् समवायिकारणं वर्तते यद्यत् द्रव्यम् तत्तत् समवायिकारणम्, यथा पृथ्वी, यन्न समवायिकारणं तन्न द्रव्यम् यथा गन्धम्। अत एव यंत् किञ्चित् समवायिकारणतावच्छेदकं तद् द्रव्यत्वम्। एवं रूपेण द्रव्यत्वजातिः सिद्ध्यति एव। अस्यार्थः द्रव्यमात्रस्य समवायिकारणताया अवच्छेदकत्वात् द्रव्यत्वं स्वतः सिद्धम्। अत एवोक्तम्—कार्यमात्रसमवायिकारणताऽवच्छेदकतेति।

ननु कार्यमात्रन्तु लोकस्थितानामखिलकार्याणां सङ्केतकम् इति अत एव कार्यमात्रोद्देशेन गौरवदोषमापतति। इति शङ्का निवारणायेवोच्यते—संयोगसमवायिकारणतावच्छेदकत्वं द्रव्यत्वम्। अत्र कार्यत्वमुपाधिः परन्तु संयोगत्वन्तु जातिरिति गौरवदोषं निवर्तते।

एवं लाघवत्वात् संयोगसमवायिकारणत्वमेव युक्तम् इत्यपि न तर्कसहः, नित्यसंयोगेष्वव्याप्तत्वात्। अत एवोच्यते संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकत्वं द्रव्यत्वम्। अनेन नित्यविभागवत्स्वपि द्रव्येष्वव्याप्तिदोषनिवृत्तिः।

(६) प्रश्नः—तमसो पृथक् द्रव्यत्वे मीमांसकमतनिराशपूर्वकं सिद्धान्तपक्षं स्थापयत।

उत्तरम्—पूर्वपक्षः—मीमांसकाः पृथ्व्यप्तेजोवाय्वाकाशदिक्कालात्ममनस्तमांसि इति दशद्रव्याणि मन्यन्ते। तत्र तमसो दशमद्रव्यत्वे युक्तिं प्रदर्शयन्ति—

'तमः खलु चलन्नीलं परापरविभागवित्।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति॥' इति

अस्यार्थः—तमः चलनात्मकक्रियावान्, नीलरूपवच्च, दूरान्तिकस्थानभेदेषु जन्यत्वात् कालकृत् दिक्कृच्च विभागशाली च अत एव संयोग-विभागयोः समवायिकारणतावच्छिन्नश्च। तद्व्याप्तस्थानपरिमाणेन च परिमाणवान् च भवति। अत एव तम द्रव्यम् इति दिक्।

तमः न पृथ्वी गन्धाभावात्, नापि अप्तेजोवाय्वाकाशदिक्कालात्ममनःषु तमस्यान्तर्भावः नीलगुणत्वात्। अत एव तमः नवभ्यः पृथक् दशमं द्रव्यम्। इति मीमांसकाः।

उत्तरपक्षः—न इति वृद्धाः तेजसोऽभावमात्रं तमः नीलरूपन्तु भ्रान्तिजन्यमेव। यथा हि लोके नीलं नभः इति प्रतीतिः तत्र नभस्तु रूपरहित एव। एवं लोकसिद्धे भ्रान्तौ न तत्त्वग्रहणं युक्तम्। तेजसः दिक्कालकृतविभागत्वात् तमसोऽपि विभागः प्रतीयते। तेजस अभावविशिष्टस्थानपरिमाणाच्च परिमाणवान् तेजसश्चलनात्मकः प्रतीयते इति। अतो तमः न पृथग्द्रव्यम्।

ननु यथा तेजसोऽभाव एव तम इत्युच्यते तथा तमसोऽभाव एव तेजः इति कथं न स्यात्, इति चेत्। न उष्णस्पर्शस्याश्रयत्वात् तेजस्तु स्वतन्त्र एव द्रव्यम्। न तथा तमसो द्रव्यत्वे न प्रबला युक्तिः प्राप्यते। न च तेजसोऽभाव इति वाक्ये काचिद् बाधा।

यदि तमः स्वतन्त्र एव द्रव्यम् स्यात्, तत्र का हानिः इत्यपि न वक्तव्यम्। कल्पनागौरवात्। तमसो द्रव्यत्वे तस्य जन्यद्रव्यत्वमेव सम्भवेत तर्हि तस्य अवयवित्वं, प्रागभावप्रध्वंसाभावादयोऽपि कल्पनीयाः इति दिक्।

अतो न तमः पृथग् द्रव्यम् इति निर्णयः। यथोक्तम् वैशेषिकदर्शने—

'द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः।' इतिं 'तेजसो द्रव्यान्तरेणावरणाच्च' इति च। तथा च—

आलोकाभाव एवेदं तमो द्रव्यं न तु स्वयम्।
नीलक्रियाप्रतीतिस्तु भ्रान्तिरेवेति मन्यताम्॥

(७) प्रश्नः—सामान्यस्य (जातेः) लक्षणं सपदकृत्यं व्याख्यायताम्।

उत्तरम्—लोके यदनेकेषु घटेषु 'अयं घटः' इत्याकारिका एकाकारा प्रतीतिः जायते तस्या एव एकाकारप्रतीतेः हेतुं निर्दिशन् नैयायिकः सामान्यं प्रतिपादयति यथा—'समानस्य भावः सामान्यम्' इति। एवं घटत्व-गोत्वादीनि सामान्यानि। सामान्यस्य लक्षणमुक्तं श्रीविश्वनाथपञ्चाननपादैः यथा—'नित्यत्वे सति अनेकसमवेतत्वम्' इति।

अस्यार्थः—यत् १. नित्यम् २. अनेकत्र व्याप्तम् ३. समवायसम्बन्धेन स्थितम्, तत् सामान्यमित्युच्यते। इति लक्षणगत पदानामर्थः। एवमत्र लक्षणावयवानां मध्ये कस्याप्येकस्य अनुपस्थित्या सामान्यस्याप्यभावः स्यात् इति लक्षणपरीक्षणं पदकृत्यं वा।

तत्र—१. नित्यत्वाभावे—'अनेकसमवेतत्वम् सामान्यत्वम्' इत्येव लक्षणं स्यात्, तदा संयोगेऽपि लक्षणस्य गतिः स्यादित्यनवस्था दोषपातः। तन्निवृत्त्यर्थमेवोक्तम् 'नित्यत्वे सतीति'।

२. यदि 'अनेक' पदमत्र न स्यात्तत्र लक्षणम् अवशिष्यते, यथा—'नित्यत्वे सति समवेतत्वम्' इति। तर्हि एकस्मिन्नेव, व्याप्तद्रव्ये समवायसम्बन्धेन स्थिते गुणेऽपि तस्य व्याप्तिः यथा आकाशस्य परिमाणे। एवंविधेषु स्थलेषु अव्याप्ति-दोषनिवारणायोक्तम् अनेकमिति।

३. यदि 'समवेतम्' (समवायसम्बन्धेन स्थितम्) इति पदस्याभावः स्या-तर्हि 'नित्यत्वे सति अनेक....' इति लक्षणे जाते अत्यन्ताभावे अव्याप्तिरस्तीति अत एवोक्तम् समवेतमिति।

एवञ्चात्र लक्षणं पूर्णम्, निर्दुष्टञ्च इति दिक्।

(८) प्रश्नः—जातिबाधकाः के दोषाः ? सोदाहरणं तान् विशदयत।

अथवा

व्यक्तेरभेदं तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥

इति कारिका सविशदं विवेचयत।

उत्तरम्—सामान्यम्, नित्यत्वे सति अनेकसमवेतत्वमित्युक्तम् तत्र भूतत्व-मूर्तत्वादौ अपि सामान्यस्थितिव्याप्तिः स्यात् इति शङ्का उदेति अत एवोक्तम् यत्र जातिबाधका दोषा न विद्यन्ते तत्रैव सामान्यं भवति। के तत्र जाति-बाधका इत्युच्यन्ते—

'व्यक्तेरभेदः तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥ इति।

अस्यार्थः—१. व्यक्तेरभेदः, २. तुल्यत्वम्, ३. सङ्करः, ४. अनवस्थितः, ५. रूपहानिः, ६. असम्बन्ध इति षट्संख्यकानि जातिबाधकान्युक्तानि।

१. व्यक्तेरभेद—'स्वाश्रयनिष्ठस्वाश्रय प्रतियोगिकभेदाभावः व्यक्तेरभेदः' इति। अस्यार्थः एकस्मिन्नेव वस्तुनि व्याप्तो यद्धर्मः तन्न सामान्यम्। यथा व्योम्नः परिमाणम्, आकाशत्वं दिक्त्वं कालत्वं वा न जातिः एकमात्र व्यक्ति-व्याप्तत्वात्।

वस्तुतस्तु अनेकसमवेतत्वमिति लक्षणगत पदेनैवास्य बोधः—एकव्यक्ति-निष्ठा न जातिरिति।

यत्तु दिक्कालयोः पूर्वापरादि-भूतभविष्यादिविधिना भेद उच्यते तदौपाधि-कमेव।

२. तुल्यत्वम्—अनेकेषु घटेषु 'अयं घटः' 'अयं घटः' एवं प्रकारिका या अनुगतप्रतीतिः तथैव 'अयं कलशः' 'अयं कलशः' एवं विधाऽपि अनुगतप्रतीतिः भवति । अत एव घटत्ववत् कलशत्वमपि जातिः । इति शङ्कायामेवोक्तम् तुल्यत्व-दोषोऽत्र जातिबाधकः । तुल्यत्वदोषस्य लक्षणन्तु 'स्वभिन्नजातिसमनियतत्वम्' । अस्यार्थः—स्वतो भिन्न कलशत्वात् भिन्ना या घटत्वजाति तस्य समनियतं यत् यत् कलशत्वम्' तदेव तुल्यत्वम् ।

अस्यार्थः घटत्वकलशत्वादीनि यानि पृथक्-पृथक् सामान्यानि प्रतीयन्ते तानि न तथा, तुल्यत्वदोषात् ।

३. सङ्करः—भूतत्व-मूर्तत्वादौ जातिबोधे सङ्करदोषो बाधकः । 'परस्परा-त्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः सङ्करः' । यथा 'पृथ्व्यप्तेजो-वाय्वाकाशेषु भूतत्वम्' तथैव 'पृथ्व्यतेजोवायुमनःसु मूर्तत्वम्' अतः मूर्तत्वाभाव-वति आकाशे भूतत्वम्, भूतत्वाभाववति मनसि मूर्तत्वम्, इमे भूतत्व-मूर्तत्वधर्मे पृथ्व्यप्तेजोवायुसु विद्येते तत्र ते धर्मे न सामान्ये कथ्येते, परस्परात्यन्ताभाव-समानाधिकरणत्वात् ।

एवमेव शरीरत्वेन्द्रियत्वे न जाती सङ्करदोषात्, शरीरत्वस्याभाववति घटे पृथ्वीत्वं तिष्ठति पृथ्वीत्वधर्मस्याभाववति जलीयशरीरे शरीरत्वधर्मं विद्यते । अत एव परस्परात्यन्ताभाववतोः पृथ्वीत्व-शरीरत्व-धर्मयोः मानवशरीरे सत्त्वेऽपि तत्र शरीरत्वजातौ सङ्करदोषः जातिबाधकः । एवं इन्द्रियत्वेऽपि बोध्यम् ।

४. अनवस्था—सत्ता-द्रव्यत्व-गुणत्व-कर्मत्व-पृथ्वीत्व-जलत्व-रूपत्वादिषु यानि सामान्यानि तत्र-तत्र स्थितं सामान्यत्वम् अनवस्थादोषत्वात् न जातिः । अन-वस्थाया लक्षणन्तु—'क्लृप्तवस्तुसजातीयवस्तुपरम्पराकल्पनमनवस्था' ।

अस्यार्थः—द्रव्ये यथा द्रव्यत्वजातिः तथा केषुचिद् द्रव्यत्वेषु द्रव्यत्वत्वजातौ अपि जातिः एवं जातिव्यवस्थायां अनवस्था स्यात् इति अत एव जातेः न जाति-त्वम् ।

५. रूपहानिः—'सामान्यभिन्नत्वे सति समवेतात्मकस्य विशेषगतरूपस्य हानिः रूपहानिः' । अस्यार्थः—सामान्यभिन्नः विशेषः तत्र समवेतं विशेषत्वम् तत्र जाति स्वीकारे तु स्वरूपस्यैव हानिः अत एव तत्र रूपहानिः बाधकः ।

विशेषस्तु स्वस्येतरेभ्यः व्यावर्तकः तत्प्रभावादेव परमाणव इतरेभ्यो व्यावर्तन्ते । परस्परस्य व्यावर्तकत्वात् विशेषः सामान्यात् सर्वथा भिन्न एव ।

६. असम्बन्धः—जातिस्तु द्रव्ये समवायसंम्बन्धेनोपतिष्ठते। यदि समवाये समवायत्वनामा जाति स्यात्, तदा तदपि समवाये समवायत्वस्य समवाय सम्बन्धेनैव स्थितिः सम्भवेत्। परन्तु समवाये अपर समवायस्यासम्भवः। अतएवात्र असम्बन्धदोषः बाधकः। तस्य लक्षणन्तु यथा—'प्रतियोगितानुयोगितान्यतर-सम्बन्धेन समवायाभावः असम्बन्धः'। इति।

(९) प्रश्नः—सामान्यस्य परापरभेदेन द्वैविध्यं प्रतिपाद्य द्रव्यादिषु परत्वमपरत्वं वा व्यवस्थाप्यताम्।

अथवा

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥
परभिन्ना च या जातिः सैवापरतयोच्यते।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते॥
व्यापकत्वात् पराऽपि स्याद् व्याप्यत्वादपराऽपि च।

इमे पङ्क्तयः सविमर्शं व्याख्येयाः।

उत्तरम्—सामान्यं द्विविधं परम् अपरं च। परमधिकदेशवृत्तित्वम्। अपरञ्च तद्विपरीतम्, न्यूनदेशवृत्तित्वं वा।

अस्यार्थः यथा विविधेषु घटेषु-घटत्वम्, तथैव घटेषु घटभिन्नेष्वपि पृथ्वीत्वम् एवमेव पृथ्वीषु तद्भिन्नेष्वपि द्रव्यत्वम् तथैव द्रव्येषु तद्भिन्नेष्वपि सत्ता जातिः। एवमत्र सत्ता (सत्त्वं वा) परा जातिः। घटत्वं तु अपरा। एतदेवोक्तम्—

सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥ इति।

अत्र द्रव्यादित्रिकम्—द्रव्यगुणकर्माणि। सत्ता तु द्रव्यगुणकर्मसु जातिः।

ननु—सत्ता (सत्त्वं वा) व्यवहारे अस्तित्वार्थबोधकः। तच्च सत्त्वं सामान्यविशेषसमवायेष्वपि तिष्ठति। तथा च अभाव-पदार्थ अपि शशशृङ्गादि-असद्भ्यो भिन्न एव। अतस्तत्राऽपि सत्ता जातिः। एवं सामान्यविशेषसमवायाभावेषु तिष्ठत्सु सत्ताजातौ कथं द्रव्यादित्रिकवृत्तिरित्युक्तमिति चेत्।

न, सत्ताजातिस्त्वत्र न व्यावहारिकसत्त्वसमानार्थम्। स्वतन्त्रपरिभाषिकत्वात्। इति।

अत्र सत्त्वन्तु जातिः, सामान्ये न पृथक् जातिः अनवस्थादोषात्। विशेषे

न जातिः रूपहानिदोषात् । समवायेषु न जातिः अनवस्थादोषात् । अभावेषु न जाति रूपहानिदोषात् (जातिस्तु भावरूपा एव न तथा अभावपदार्थः) । अत एव सामान्यादिषु न सत्ता जातिः ।

एवं सत्ता सर्वाधिकदेशवृत्तित्वात् परा जातिः । तथा च घटत्वपटत्वादयस्तु अपरा जातयः । एवं स्थितौ द्रव्यत्वादयस्तु सत्ताजातेः न्यूनदेशवृत्तित्वात् अपरा जातिः तथा च घटत्वपृथ्वीत्वापेक्षया अधिकेशवृत्तित्वात् परा जातिरपि । एवं द्रव्यत्व गुणत्व कर्मत्वादयः परा चापरा चेति परापरा इत्युच्यन्ते । तदेवोक्तम्—

परभिन्ना च या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥
व्यापकत्वात् पराऽपि स्याद् व्याप्यत्वादपराऽपि च । इति ।

(१०) प्रश्नः—सामान्यस्य लक्षणमुक्त्वा तस्य परापरभेदेन द्वैविध्यं पतिपादयत ।

उत्तरम्—अत्र सप्तमप्रश्नस्य नवमप्रश्नस्य चोत्तरं क्रमशः द्रष्टव्यम् ।

(११) प्रश्नः—श्रीविश्वनाथतर्कपञ्चाननदिशा विशेषं निरूपयत ।

अथवा

विशेषस्य लक्षणमुक्त्वा तत्स्वीकारे वाचोयुक्तीः प्रदर्यताम् ।

उत्तरम्—सामान्यपदार्थाद् भिन्नः कश्चित्पदार्थम् इतरेभ्यो व्यावर्तकं विशेष इत्युच्यते । एतत्तस्य व्यवहारिकं रूपं न तु शास्त्रीयम् । अस्यार्थः लोके कस्यचित्पदार्थस्य तद्भिन्नपदार्थस्य यत् भिन्नत्वं लक्ष्यते तत्तत्र विशेषादेव । इति लोके विशेषपदार्थः ।

शास्त्रे तु विशेषो अन्त्यो नित्यद्रव्यवृत्तिश्च । यदुक्तम्—

'अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः' । इति ।

अस्यार्थः—अन्त्य इति । अवसाने वर्तत इत्यन्त्यः । तत्र प्रथमः पदार्थः सत्ता (सामान्यं) द्रव्य-गुण-कर्मवृत्तिः । तदेव परसामान्यमिति, ततोऽपरं द्रव्यत्वं, ततश्च पृथ्वीत्यादयः । एवं घटपटादयः तेभ्योऽपरम् कपालतन्त्वादयः । एवम् अन्त्यः पदार्थः परमाणुः तदितरेभ्यो व्यावर्तक एव विशेषः ।

नित्यद्रव्यवृत्तिरिति । एकं घटमपरस्माद् घटादपि व्यावर्तते अत एव तत्राऽपि विशेषः स्यादिति न, नित्यद्रव्याभावात् एवं कपालेष्वपि न विशेषः, एवं नित्यद्रव्यास्तु परमाणवस्तथाऽऽकाशादिविभुपदार्थाः । अत एव नित्यद्रव्यवृत्तिरित्युक्तम् ।

एवमेव भिन्नप्रकारेणापि विशेषपदार्थस्य लक्षणमुच्यते; यथा 'निःसामान्यत्वे सति एकमात्रसमवेतः विशेषः' इति। अस्यार्थः विशेषः सामान्यविरोधी एकमात्रवृत्तिः एकमात्रमेव व्याप्नोति प्रतिपरमाणु पृथग्विशेषः इत्याशयः। यथा वा 'स्वतोव्यावर्तकः विशेषः' इति। अस्यार्थः यः पदार्थः स्वं स्वाश्रयञ्च स्वरूपात् पृथक्कुरुते।

एवमयमत्र निष्कर्षः—

१. विशेषः अन्त्यः।

२. विशेषः नित्यद्रव्यवृत्तिः।

३. विशेषः सामान्यविरोधी।

४. विशेषः एकमात्रद्रव्यसमवेतः।

५. विशेषः स्वं स्वाश्रयात्, इतरपदार्थाच्च व्यावर्तयति। इति।

ननु विशेषः न कश्चित्पदार्थः प्रमाणाभावात् इति चेत्। न तत्र विशेषस्वीकारे वाचोयुक्तीः प्रदर्श्यंते—यथा लोके अयं घटः अस्माद्घटाद् भिन्नः तदवयवरूपकपालभेदात् इत्येवंप्रकारेण घटादीनां निखिलतत्त्वानां तदवयवभेदात् भेदः स्वीक्रियते। तथैव परमाणुष्वपि भेदोऽस्त्येव परन्तु अवयवाभावात् तत्र भेदः साधयितुमशक्य एवेत्यत उक्तम् विशेष इति। परमाणुषु विशेषस्तिष्ठते तद्वशादेव परमाणु स्वेतरपरमाणुभ्यो भिद्यते। तथाहि 'एतत्परमाणु अस्माद् भिद्यते एतद्विशेषाद्' इति परमाणुषु भेदप्रदर्शनम्। तत्र च विशेषसिद्धिः प्रदर्श्यंते—'यद्यत् भेदरूपं कार्यं तत्तत्सकारणं घटभेदवत्' इति। कारणश्चात्र विशेषः पूर्वमेव प्रदर्शितम्।

(१२) प्रश्नः—समवायस्य किं स्वरूपम् ? कुत्र च तत्सम्बन्धं भवतीति ? सविस्तरं विवेचयत।

उत्तरम्—'अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः। समवायत्वं नित्यसम्बन्धत्वम्।' इति विश्वनाथतर्कपञ्चाननपादाः।

समवायस्तु सम्बन्धविशेषः। यथा दण्ड पुरुषयोः विशेषे सम्बन्धे सति दण्डीपुरुषः इति संयोगाभिधसम्बन्धविशेषस्य प्रतीतिः भवति।

तथैव समवायाभिधोऽपि सम्बन्धविशेषः। यथा पूर्वोक्ते संयोगसम्बन्धदृष्टान्ते द्वयोः पदार्थयोः सत्ता दृश्यते तथैवात्रापि (समवायसम्बन्धेऽपि द्वयोः पदार्थयोः सत्ता अपेक्षिता भवति)। यथा दण्डी पुरुषः इत्यत्र दण्डश्च पुरुषश्च

तयोः संयोगसम्बन्धश्च व्यज्यते, तथैव अवयवावयविनोः, गुणगुणिनोर्मध्येऽपि कश्चित् सम्बन्धः तदेव 'समवायः' इत्युच्यते।

समवायस्य लक्षणमुक्तम्—'नित्यसम्बन्धत्वं समवायत्वम्' इति। अत्र समवायत्वं लक्ष्यपदम् नित्यसम्बन्धत्वं लक्षणम्। नित्यञ्चासौ सम्बन्धश्चेति। सम्बन्धशब्दोऽत्र द्वयोः पदार्थयोः अन्वयबोधकः। यथा दण्डी पुरुषः इत्यत्र दण्डेन संयुक्तः पुरुषः इत्यन्वितार्थः दण्डविशिष्टः पुरुषो वा। तथैव अवयवावयविनोः कश्चित् सम्बन्धः। अयञ्चात्र निष्कर्षः द्वयोः पदार्थयोः यः सम्बन्धः नित्यः भवति तदेव 'समवायः' इत्युच्यते।

अत्र तर्कभाषाकारः प्रशस्तपादमनुसृत्य 'समवाय' पदार्थस्य लक्षणं कुरुते, यथा—'अयुतसिद्धयोः सम्बन्धः समवायः' इति। अयुतसिद्धौ तु—'ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ।' यथोक्तम्—

'तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः।
अनश्यदेकमपराश्रितमेवावतिष्ठते ॥' इति।

एवं स्थितेऽत्र अवयवावयवी, जातिव्यक्ती, गुणगुणी, क्रियाक्रियावन्तौ, नित्यद्रव्यविशेषौ च अयुतसिद्धौ। तयोरेव सम्बन्धो नित्यः। एवमत्रायं निष्कर्षः—

१. अवयवावयविनोः सम्बन्धः समवायः।
२. जातिव्यक्त्योः सम्बन्धः समवायः।
३. गुणगुणिनोः सम्बन्धः समवायः।
४. क्रियाक्रियावतोः सम्बन्धः समवायः।
५. नित्यद्रव्यविशषयोः सम्बन्धः समवायः। इति।

(१३) प्रश्नः—समवायसिद्धौ अनुमान-प्रक्रियां प्रदर्श्य तत्र मीमांसकमतं निराक्रियताम्।

उत्तरम्—समवायः नास्तीति मीमांसका आक्षिपन्ते, तन्निराकुर्वन्ति विश्वनाथतर्कपञ्चाननपादाः अनुमानप्रदर्शनेन—

यथा—'गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, दण्डी पुरुष इति विशिष्टबुद्धिवद्।' इत्यनेन तत्र सम्बन्धसिद्धिः। संयोगादिसम्बन्धबाधात्तु समवायसिद्धिः। एवमत्र द्विविधमनुमानम्। तदधस्ताद् प्रदर्श्यते।

गुणक्रियादिविशिष्टद्रव्यज्ञानं विशेषणविशेष्योभयसम्बन्धग्राहकम् । इति प्रतिज्ञा ।

विशिष्ट बुद्धित्वात् । इति हेतुः ।

यत्र यत्र विशिष्टबुद्धित्वं तत्र तत्र विशेषणविशेष्यसम्बन्धग्राहित्वम् । इति व्याप्तिः ।

यथा दण्डी पुरुषः । इति दृष्टान्तम् ।

गुणक्रियादिविशिष्टबुद्धिरपि तथा । इति उपनयम् ।

तस्मात्तत् तथा (विशेषण-विशेष्योभयसम्बन्धग्राहि) । इति निगमनम् ।

अस्यार्थः—यथा दण्डीपुरुषः इत्यत्र विशिष्ट बुद्धिः विशेषणविशेष्योभयसम्बन्धग्राही तथैव अवयवावयव-जातिव्यक्ति-गुणगुणी-क्रियाक्रियावान्-विशेष-नित्यद्रव्य-सम्बन्धिनी विशिष्टबुद्धिरपि विशेषण-विशेष्योभयसम्बन्धग्राही इति अनुमानेनात्र कस्यचित् सम्बन्धविशेषस्य सिद्धिर्भवति ।

न चात्र संयोगादिकश्चित्सम्बन्धः । संयोगस्तु द्वयोर्द्रव्ययोरनित्यः सम्बन्धः अतोऽत्र न संयोगसम्बन्धः । आदिग्रहणात्तादात्म्यस्वरूपसम्बन्धयोरपि निराशः ।

मीमांसकास्त्वत्र स्वरूपसम्बन्धं स्वीकुर्वन्ति । तन्मतानुसारं घटाभावविशिष्टे भूतले घटाभावस्य स्वरूपसम्बन्धः तथैव गन्धगुणविशिष्टायां पृथिव्यां गन्धं स्वरूपसम्बन्धेन तिष्ठति । एवं समवायो नाम न कश्चित् स्वरूपाद् भिन्नः सम्बन्धविशेषः । यदि समवायः नाम कश्चित्सम्बन्धः स्यात् (यथा नैयायिकाः स्वीकुर्वन्ति) तथा वायौ रूपसमवाये सति रूपवत्त्वप्रतीतिः (यतः समवाय एक एव) । एवमत्र स्वरूपसम्बन्ध एव नान्यत्किञ्चित् ।

एवं सति भवतां (नैयायिकानाम्) अत्र प्रयासः सिद्धसाधनदोषग्रस्तः (सिद्धस्यैव पदार्थस्य पुनः साधनं सिद्धसाधनं नाम), यद्वा समवायं प्रापयन् स्वरूपसम्बन्धस्य सिद्धिरिति अर्थान्तरदोषः ।

तन्न । इति नैयायिकाः । अत्र स्वरूपसम्बन्धग्रहणे असंख्यानां पदार्थानां सम्बन्धनाञ्च सत्त्वात् अनन्तरस्वरूपकल्पने गौरवः । एकसमवाये ग्रहीते तु लाघवम् इति समवायसिद्धिः ।

यत्तु वायौ रूपवत्त्वप्रतीतिः आपततीत्युक्तम् । तदपि न युक्तम् समवायस्यैके सत्यपि गुण-द्रव्यादीनां पृथक्त्वात् । वायौ समवाये सत्यपि रूपाभावात् न तत्प्रतीतिः ।

ननु घटाभावविशिष्टभूतले स्वरूपसम्बन्धस्तथा विधानन्तेष्वभावेषु अनन्त-स्वरूपकल्पनावशात् पतनगौरवदोषनिराकरणाय कथं न वैशिष्ठ्यनामकस्य कस्यचित् कल्पना क्रियते इति चेत्।

न, तस्य (वैशिष्टयस्य) नित्यत्वे घटाभावविशिष्टे भूतले घटे स्थापितेऽपि घटाभावबुद्धिप्रसङ्गात्। अनित्यत्वे सति तस्य नित्यविनाशशालित्वात् अनन्त-वैशिष्टयकल्पनात् गौरवः। इत्यलं विस्तरेण।

(१४) प्रश्नः—समवायस्य लक्षणमुक्त्वा तत्सिद्धौ प्रमाणं प्रदर्श्यं-ताम्।

उत्तरम्—अत्र क्रमशः १२, १३ तमप्रश्नस्योत्तरे द्रष्टव्ये।

(१५) प्रश्नः—अभावपदार्थं निरूप्य तस्य भेदान् प्रदर्शयत।

उत्तरम्—अभावो नाम षड्भावपदार्थव्यतिरिक्तो निषेधमुखेन प्रतीयमानो कश्चित् पदार्थविशेषः। तस्य लक्षणं यथा 'निषेधमुखप्रतीतिविषयः अभावः' अर्थात् यः विषयः नेतिशब्देन प्रतीयते तदभावपदार्थः। यथा—'घटः पटो न' 'भूतले घटो नास्ती'ति वा। अत्र यत्प्रतीतिविषय तन्नैवास्ति, अत एव तदभाव-विशिष्टमधिकरणमेव प्रतीत्या ग्रह्यते।

केचित्तु 'अभाव' नामकं पृथक्पदार्थमेव न स्वीकुर्वन्ति। निषेधमुखप्रतीति-विषयात्। नैयायिकास्तु अभावविशिष्टस्याधिकरणस्य सत्त्वात् तस्य सप्तम-पदार्थत्वं स्वीकुर्वन्ति।

तत्र अभावस्तावद् द्विविधः—संसर्गाभावः, अन्योऽन्यभावश्च। संसर्गस्तु सम्बन्धवाच्यः केनचित्सम्बन्धेन योऽभावो बोध्यते स संसर्गाभावः। यथा इह भूतले घटो नास्तीत्यत्र भूतलघटसंयोगसम्बन्धस्याभावः प्रतीयते, किं वा संयोग-सम्बन्धेन भूतले घटस्याभावः लक्ष्यते, अतोऽत्र संसर्गाऽभावः। यथा वा मृत्पिण्डे घटोत्पत्तिपूर्वं यः घटाभावः प्रतीयते तत्समवायसम्बन्धेन निषेधमुखेन बोध्यत्वात् संसर्गाभावः। तत्तु सप्रपञ्चमग्रे वक्ष्यते।

अन्योऽन्याभावस्तु सम्बन्धराहित्यात् संसर्गाद् भिन्न एव। तल्लक्षणन्तु 'तादा-त्म्यसम्बन्धावच्छिन्न प्रतियोगिताकाभावोऽन्योन्याभावः' इति। यथा 'घटः पटो न' 'पटो घटो न' इत्यत्र उभयत्र अन्योऽन्यस्याभावात् अन्योऽन्याभावः।

संसर्गाभावस्तु त्रिविधः—१. प्रागभावः, २. प्रध्वंसाभावः; ३. अत्यन्ता-भावश्च। (केचन् नवीनास्तु सामयिकाभावाभिधं चतुर्थमपि भेदं स्वीकुर्वन्ति)।

प्रागभावः—'विनाश्यभावः प्रागभावः' इति प्रागभाव लक्षणम्। अत्र 'प्राग-

भावः' इति लक्ष्यम्, 'विनाश्यभावः' इति लक्षणपदम्। प्रध्वंसाभावे अतिव्याप्तिवारणाय 'विनाशि पदम्' घटे अतिव्याप्तिवारणाय 'अभाव' पदम्।

केचित्तु 'अनादिः सान्तः प्रागभावः' इति निरूपयन्ति। अत्र परमाण्वादौ अतिव्याप्तिवारणाय 'सान्त'पदम्। घटादौ अतिव्याप्तिवारणाय अनादिपदम्।

प्रागभावः स्वप्रतियोगिनः समवायकारणे स्वरूपसम्बन्धेन तिष्ठते। यथा घटप्रागभावः, तत्प्रतियोगिनः घटस्य, समवायकारणे कपालेषु स्वरूपसम्बन्धेन। एवमेव पटप्रागभावः तत्प्रतियोगिनः पटस्य समवायकारणे तन्तुषु स्वरूपसम्बन्धेन।

ननु प्रागभावो न कश्चित् अभावविशेषः, प्रमाणाभावात् इति चेत् न। 'इह तन्तुषु पटो भविष्यती'ति प्रतीतिरेवात्र प्रमाणम्। नेयं प्रतीतिर्भ्रान्तिस्वरूपा, पटविषयका इति चेत् न भविष्यत्त्वबोधात् प्रागभावरूपा एव। अन्यथा तु उत्पन्नस्यैव पुनरुत्पत्तिदोषापत्तिः। (प्रागभाववतोरेवोत्पत्तिः सम्भाव्यते, तदभावात्तु जातस्य घटस्य पुनरुत्पत्तिः सम्भवा)।

अयं प्रागभावः अनादिः सान्तः। कार्योत्पत्तेः प्रागभावनाशः इत्यर्थः। एवमयं विनाशीति अत एव सान्त इत्युक्तः। अस्यार्थः—घटोत्पत्तिरेव तत्प्रागभावनाशः इति।

प्रध्वंसाभावः—'उत्पत्तिमान् अभावः प्रध्वंसाभावः' इति प्रध्वंसाभावलक्षणम्। अत्र 'प्रध्वंसाभावः' इति लक्ष्यपदम्, 'उत्पत्तिमान् अभावः' इति लक्षणम्। घटादौ अतिव्याप्तिवारणाय अभावः, प्रागभावादौ अतिव्याप्तिवारणाय उत्पत्तिमान् इति पदम्।

अथवा 'सादिरनन्तः प्रध्वंसाभावः' परमाण्वादौ अतिव्याप्तिवारणाय सादिरितिपदम्। घटादावतिव्याप्तिवारणाय 'अनन्त' इति पदम्। अस्यार्थः घटे ध्वंसे जाते जातः तदभाव तस्य प्रध्वंसाभाव इति कथ्यते। स तु स्वप्रतियोगिनः समवायकारणेनावच्छिन्नः।

प्रहारजन्यघटनाशाद्दृश्यमानेषु कपालादिषु इह घटो ध्वस्तः इह घटो विनष्टः इति या प्रतीतिः सा प्रध्वंसाभावविषयका एव। यत्तु प्रध्वंसाभावः सादित्वात् कार्यः, अत एव प्रागभावजन्यः स्यात् तर्हि तत्प्रागभावस्वरूपं जिज्ञासते चेत् सत्यम्, प्रागभावः स्वप्रतियोगिनः समवायकारणे स्वरूपसम्बन्धेन तिष्ठते, घटप्रध्वंसाभावस्य प्रतियोगी घटध्वंसं तत्समवायकारणं घटम्, तदेव प्रध्वंसाभावस्य प्रागभावरूपः इति।

अत्यन्ताभावः—'नित्यः संसर्गाभावः अत्यन्ताभावः' इति अत्यन्ताभाव-लक्षणम् । अत्र अत्यन्ताभावः इति लक्ष्यपदम्, नित्यः संसर्गाभावः इति लक्षणम् । तत्र प्रागभावादिषु अतिव्याप्तिवारणाय नित्यपदम्, अन्योऽन्याभावेषु अति-व्याप्तिवारणाय संसर्गाभावपदम् ।

'अन्योऽन्याभावभिन्नः नित्योऽभावः अत्यन्ताभावः' इत्यपि अत्यन्ताभाव-स्य लक्षणं वक्तुं शक्यते । अत्राऽपि पदकृत्यकृत्यं पूर्वपदवदूह्यम् । अस्यार्थः—'यः संसर्गाभावः सार्वदेशिकः सार्वकालिकश्च भवति सः अत्यन्ताभावः इति कथ्यते' । अथवा यत्र कश्चित् स्वाधिकरणे कदापि स्थातुं न शक्नोति स अत्यन्ताभाव इति कथ्यते ।

यथा—आत्ममात्रवृत्तिगुणाः ज्ञानादयः आत्मेतरेषु ज्ञानादिषु कदाऽपि न तिष्ठन्ते अत एव आत्मेतरेषु द्रव्येषु पृथिव्यादिषु ज्ञानादीनाम् अत्यन्ताभाव इति कथ्यते । अथवा वाय्वाकाशादिषु गन्धगुणस्यात्यन्तभावः । एवञ्च पृथ्वीतरेषु गन्धाभावः जलेतरेषु रसाभावः वाय्वितरेषु स्पर्शाभावः, एवञ्चान्यत्रापि अत्यन्ता-भावः वक्तव्यम् ।

अन्योऽन्याभावः—'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः अन्योऽन्या-भावः' इति अन्योऽन्याभावलक्षणम् । अत्र तदात्म्यसम्बन्धावच्छिन्नप्रतियोगिता-कोऽभावः इति लक्ष्यपदम्, अन्योऽन्याभावः इति लक्षणम् । अस्यार्थः—यस्या-भावस्य प्रतियोगी तादात्म्यसम्बन्धेनावच्छिन्नो भवति स अन्योऽन्याभावः । यथा 'घटः पटो न' इत्यत्र यत् पटाभावः तत् तादात्म्यसम्बन्धावच्छिन्नप्रति-योगिताकः । घटे अभेदरूपेण तादात्म्यसम्बन्धेन यः घटोऽस्ति तस्य प्रतियोगिनः पटस्याभावः अपि तादात्म्यसम्बन्धेन एव । अत एवोक्तम्—तादात्म्यसम्बन्धे-त्यादिः ।

अन्योऽन्याभावस्तु उभयद्रव्यविषयकः किंवा उभयगुणविषयकः एव भवितु-मर्हति न तु द्रव्यगुणविषयकः यथा संसर्गाभावः । क्वचित्तु 'द्रव्यं गुणो न', 'द्रव्यं कर्म न' इत्यादौ द्रव्यगुणयोर्द्रव्यकर्मयोरपि । तथा चात्र समवायसंयोगादि-सम्बन्धानामपि अपेक्षा न भवति । इत्येव मुख्यतोऽत्र संसर्गाभावाद् भेदः ।

केचित्तु अन्योऽन्याभाव-अत्यन्ताभावयोः सामान्याभाव-विशेषाभाव-रूपेणापि भेदं कुर्वन्ति ।

केचिन्नवीनाः सामयिकाभावं एभ्यः पृथक् अभावं मन्यन्ते तस्योदाहरणं यथा इह भूतले घटो नास्ति । इत्यलं विस्तरेण ।

(१६) प्रश्नः—अभावानामधिकरणात्मकत्वमाशङ्क्य तन्निराकरणं न्यायसिद्धान्तानुसारं कुरुत।

उत्तरम्—न्याय-वैशेषिकमतावलम्बिनः द्रव्यगुणकर्मसामान्यविशेषसमवायाभावेति सप्तपदार्थान् स्वीकुर्वन्ति परन्तु मीमांसकाः तत्र अभावं पृथक्-पदार्थत्वेन न स्वीकुर्वन्ति। अत्रैतद्विचारः प्रस्तूयते।

मीमांसकमतम्—'घटाभाववद्भूतलमिदम्' इत्यत्र प्रत्यक्षप्रतीतिस्तु भूतलस्यैव। घटाभावस्तु तद्विशेषणमेव नीलमुत्पलमितिवद्। यत्तु घटाभाववदिति प्रतीतिः न तत् भूतलाद्भिन्नं किञ्चित्। अत एव अभावस्तु अधिकरणस्वरूप एव। मृत्पिण्ड इत्यत्र घटः भविष्यतीति ज्ञाने घटस्य प्रागभावः कल्प्यते तदपि न ज्ञानस्वरूप एवात्र न हि अभावो नाम कश्चित्पदार्थः। अथवा अधिकरणभूतः मृत्पिण्ड एव घटप्रागभावरूपः। एवं प्रध्वंसाभावः अपि। तथा च अन्योऽन्याभावः कल्पनागौरवमात्रत्वात् भारवह एव। अयं घटः पटो न इति तु आधारभूतस्य घटस्य प्रत्यक्षादेव सिद्धः। अतोऽभावो नाम न कश्चित्पदार्थः।

तथा च अभावनामकस्य प्रथक्पदार्थस्य कल्पनया, पृथक्सप्तमपदार्थविवेचनात् गौरवदोषोऽपि। इति प्राभाकरमतानुयायिनः मीमांसकाः।

नैयायिकमतम्—नैयायिकास्तु अभावनामकं सप्तमं पदार्थं स्वीकुर्वन्ति। अतो मीमांसकमतं दूषयित्वा अभावपदार्थ-कल्पनायां वाचोयुक्तीः प्रदर्शयन्ति।

यत्तु अभावपदार्थाभावे आधारस्वरूपकल्पने कल्पनालाघवमिति मीमांसका स्वीकुर्वन्ति तन्न युक्तम्। अनन्तानामधिकरणानां विवेचनापेक्षया एकस्यैवाभावस्य कल्पनायां लाघव एव न तु गौरव इति। यथा एकस्यैव घटाभावस्य भूतलपर्वताद्यनेकेष्वधिकरणेषु कल्पनापेक्षया अभावपदार्थस्य कल्पने लाघवः।

यत्तु अभावः अधिकरणस्वरूप एवेति तर्क्यते, नैतद्युक्तम्। आधाराधेयभावसत्त्वात्। भूतले घटाभाव इत्यत्र भूतलमाधारः घटाभावस्तु आधेय इति प्रत्यक्षसिद्धेः।

तथा च यद्वस्तु येनेन्द्रियेण गृह्यते तस्याभाव अपि तेनैवेन्द्रियेण इति नियमः। यथा इह भूतले घटाभावः। इत्यत्र घटग्रहणसाधनेनेन्द्रियेणैव घटाभावोऽपि भूतले प्रत्यक्षीक्रियते। एवं सति 'वायौ रूपाभावः' इति यत् प्रतीति तदपि अभावस्याधिकरणस्वरूपेति कल्पने न सम्भवेद्। अधिकरण-भूतस्य वायोः अचाक्षुषत्वात् रूपाभावस्य तु चाक्षुषत्वात् यथा रूपः चक्षुषा गृह्यते तथैव रूपाभावोऽपि। परन्तु रूपाभावस्याधिकरणभूतस्य वायोः अचाक्षुषत्वात् चक्षुषा

ग्राह्य रूपाभावः नैतेन गृह्येत् । अतो तत्सिद्धयर्थं अभावो नाम प्रथक् पदार्थं कल्पनीयमेव ।

यत्तु अभावः ज्ञानस्वरूपः (स्मृतिरूपो वा) कथ्यते तदपि न युक्तम्, अभावस्तु बाह्येन्द्रियग्राह्यः, ज्ञानन्तु आत्मनो विषयमिति ।

अतो अभावो नाम सप्तमः पदार्थं इति निश्चप्रचम् इति सर्वमुपपन्नम् ।

(१७) प्रश्नः—'अभावानामपि किञ्चिद् वैशिष्ट्यं नाम सम्बन्धान्तरमस्ति' इति सयुक्तिकं निराकुरुत ।

उत्तरम्—यथा द्रव्येषु विविधानां गुणानां समवायनामकेनैव सम्बन्धेन स्थितिः कल्पिता तथैव विविधानामभावानामपि एकेनैव सम्बन्धेन स्थितिः कल्पनीया इति केचिद् ब्रुवन्ति । तत्र 'इह भूतले घटाभावः' इत्यत्र घटाभावविशिष्टोऽयं भूतलः इति प्रतीतिः । तथा च इह वायौ रूपाभाव इत्यत्र अपि रूपाभावविशिष्टोऽयं वायु इति प्रतीतिः एवं सति विविधानां अभावानां स्थितिः वैशिष्ट्यनामकेन केनापि सम्बन्धेन व्याप्ता अस्तीति केचित् ।

नैतद्युक्तमिति वृद्धाः । यत्तु वैशिष्ट्य नाम सम्बन्धं कथ्यते तन्नित्यम् अनित्यं वा । नित्यं चेत् भूतले घटे स्थापिते सत्यपि घटाभावप्राप्तेः दोषापत्तिः । घटाभावस्तु नित्य एव वैशिष्ट्य सम्बन्धोऽपि नित्यः । अत एव भूतले घटाभावस्य नित्यत्वापत्तिः ।

वैशिष्ट्य सम्बन्धस्तु अनित्यमपि न भवितुं शक्नुयात् । अनित्यत्वे पुनः पुनः उत्पत्तिविनाशकल्पनायाम्, अनन्त वैशिष्ट्यकल्पना सम्भाव्यते तत्र वैशिष्ट्यसम्बन्धकल्पनाया उद्देश्य एव नश्येत् । इति च तथा गौरवदोषापत्तिः ।

अत एव अभावानां वैशिष्ट्यं नाम सम्बन्धविशेषं न सम्भाव्यते । इति दिक् ।

(१७) प्रश्नः—न्यायसिद्धान्तमुक्तावलीदिशा सप्तपदार्थानां परस्परसाधर्म्यं निरूपयत ।

उत्तरम्—पदार्थाः सप्त द्रव्यगुणकर्मसामान्यविशेषसमवायाभावेति । 'पदार्थाः सप्त कीर्तिताः ।' इति श्रीविश्वनाथतर्कपञ्चाननपादाः ।

तत्र सप्तपदार्थानां परस्परसाधर्म्यंवैधर्म्येऽपि वक्तव्ये । इति जिज्ञासायां स्वयं ग्रन्थकारेणोक्तम्—

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥
द्रव्यादयः पञ्च भावा अनेके समवायिनः ।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥
सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।
परमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥ इति ।

साधर्म्यन्तावत्—समानधर्मत्वम् । समानो धर्म येषां ते सधर्माणः, तेषां भावः साधर्म्यम् । धर्मस्तु—पदार्थस्य समवायसम्बन्धेन विद्यमानं किञ्चिद्विशेषम् । धर्म येषामस्तीति धर्मी । एवं समानधर्मिणो भावः साधर्म्यम्, विरुद्धधर्मिणो भावः वैधर्म्यम् ।

सप्त अपि पदार्था ज्ञेयत्वादिमन्त इति सप्तानामपि साधर्म्यमुच्यते । अर्थात् ज्ञेयत्वादयः धर्मा अत्र केवलान्वयि रूपेण वर्तन्ते इति । अस्यार्थः सप्तपदार्थानां व्यतिरिक्तः न किञ्चिद्विशेष इह जगति वर्तते अत एव यदत्र साधर्म्यं तदभाव-विशिष्टः किञ्चिदपि व्यतिरेकद्रष्टान्तभूतम् इह न लभ्यते अत एव केवला-न्वयीत्युक्तम् । तत्र द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सर्वे एव ज्ञेयाः प्रमेयाः अभिधेयाश्च । ज्ञेयाः ज्ञानविषयभूताः । प्रमेयाः प्रमाणसाध्याः । अभि-धेयाः वाचकशब्दमन्तः । इत्यर्थः ।

द्रव्यादयः पञ्च—द्रव्यगुणकर्मसामान्यविशेषाः । सर्वे एव भावपदार्थाः अनेके समवायिनश्च । अभावा अपि अनेके परन्तु न भावपदार्थाः । समवायः भावपदार्थः समवायीति । द्रव्याणि अनेकानि एकाधिकानि—नवसंख्यकानीति प्रसिद्धानि यथा—क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः इति । गुणास्तु चतुर्विंशति संख्यकाः—रूपरसगन्धशब्दस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्व-बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेह-संस्कार-धर्माधर्माः । कर्मा-ण्यपि अनेके पञ्चसंख्यका इत्यर्थः उत्क्षेपणापक्षेपणाकुञ्चनप्रसारण-गमनाभिधाः । सामान्ये अनेके-एकधिके द्वे इत्यर्थः परमपरञ्च । विशेषास्त्वनन्ता एव ।

एषां द्रव्यादीनां पञ्चानामपि समवायित्वं स्पष्टमेव । अत एवोक्तम्—द्रव्यादय पञ्चभावः इति ।

आद्या त्रयः द्रव्यगुणकर्माणि सत्तावन्तः । सत्त्वजातिमन्तः । अत एव द्रव्य-गुणकर्माणि समान्यवन्तः इत्युच्यन्ते यथा द्रव्येषु-गोत्वघटत्वादयो सामान्याः, गुणेषु शुक्लत्वनीलत्वादयः, तथा च गमनपाचनादिषु जातिः । न तथा सामान्यविशेष-समवायाभावेषु सत्ता जातिः ।

गुणादयस्तु निर्गुणा निष्क्रियश्च । द्रव्याणि गुणवन्तः क्रियावन्तश्च । न तथा गुणादयः । गुणकर्मसामान्यविशेषसमवायाभावाः तेषु रूपरसादयो गुणाः उत्क्षेपणादयः क्रियाश्च न समवाय-सम्बन्धेन वर्तन्ते अत एव ते निर्गुणाः क्रियाहीनाश्च ।

सामान्यहीनानां—द्रव्यगुणकर्मविशेषसमवायाभावानां सामान्यादयो धर्माः स्वीक्रियन्ते । सामान्ये तु न जातिः अनवस्था दोषप्रसङ्गात् ।

— परमाण्डल्यभिन्नाः अणुपरिमाणभिन्नाः । अणुपरिमाणमेव परमाण्डल्य इति संज्ञयाऽभिधीयते, तद्भिन्नाः सर्वे पदार्थाः, द्रव्या इत्यर्थः (द्रव्येषु एव परिमाणगुणस्य समवायसम्भवात्) कारणतायुक्ताः । परमाण्डल्यन्तु न कस्याऽपि कारणम् । एवं परममहत्परिमाणम् (आकाशकालदिगात्मनां परिमाणं) अतीन्द्रियसामान्यम् (मनस्त्वादयः) विशेषाश्च न कारणत्वमुपयान्ति ।

(१८) प्रश्नः—द्रव्यादिसप्तपदार्थानां ज्ञेयत्व-प्रमेयत्व-अभिधेयत्व-अनेकत्व-समवायित्व-सत्त्व-सगुणत्व-सक्रियत्व-सामान्यत्व-कारणत्वदृष्ट्या साधर्म्यवैधर्म्ये निरूप्यताम् ।

उत्तरम्—द्रश्यताम्, प्रश्न संख्या १७ ।

(१९) प्रश्नः—परमाण्डल्यस्य कथन्न कारणत्वमिति विशदं प्रतिपाद्यताम् ।

उत्तरम्—परमाण्डल्यन्तु अणुपरिमाण इति कणादः । न्यायवैशेषिका परिमाणं द्विविधं कथयन्ति—अणुपरिमाणं महत्परिमाणञ्च । केचित्तु चतुर्विधमिति—परमाणुपरिमाणम्, अणुपरिमाणं, महत्परिमाणं, परममहत्परिमाणञ्च परन्तु न्याय-वैशेषिकमते अणुपरमाणुभ्यां मध्ये किञ्चिदपि भेदः न स्वीकृतः ।

तत्र 'अणु' इति सूक्ष्मतमः पदार्थः नित्यः निखिलप्रपञ्चकारणाश्च सूर्योदयकाले दृश्यमान सूर्यकिरणमध्ये रजःकणस्य षष्ठो भागः अणुरिति कथ्यते द्वयोः अण्वोः संयोगे द्व्यणुकः अणुद्व्यण्वो परिमाणं परमाण्डल्यमित्युच्यते ।

'परमाण्डल्यस्य कारणत्वं न सम्भाव्यते इति सिद्धान्तः । तदेवोच्यते—

'परमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ।' इति ।

परमाण्डल्यभिन्नाः परिमाणास्तु त्र्यणुकपरिमाणादारभ्य परमहत्परिमाण पर्यन्ताः ।

परमाण्डल्यानां कथन्न कारणत्वमिति उच्यते—कारणगुणाः कार्यगुणाना भन्ते इति नियमाद् अणुरूपकारणाद् जायमानाः त्र्यणुकादयः अपि अणुपरिमा

एव स्युः इति, प्रत्यक्षविरुद्धञ्चैतद् । अत एवोच्यते परिमाणस्तु कारणपरिमाणात्मकः कारणसङ्ख्यात्मको वा भवेत् । यदि त्र्यणुकस्य महत्परिमाणमस्ति तर्हि तत् कारणभूतस्य द्व्यणुकस्यापि महत्परिमाणः स्यात् अथवा कारणभूतस्य द्व्यणुकस्य बहुसंख्यकत्वं सम्भवेत् । न च द्व्यणुकः महत्परिमाणः, अत एव बहुसंख्यकत्वं तस्य सिद्धम् । बहुवचनस्य च त्रि-संख्यावसायित्वात् त्रिद्व्यणुकसंयोगाद् त्र्यणुकोत्पत्तिः सम्भाव्यते ।

अस्यार्थः त्र्यणुकस्यारम्भः द्व्यणुकस्य त्रित्वसंख्याया भवति न तु द्व्यणुकपरिमाणात् । एवञ्च द्व्यणुकारम्भ अणुरूपकारणस्य द्वित्व संख्याया भवति न तु अणुपरिमाणात् । त्र्यणुकादारभ्य परममहत्परिमाणपर्यन्तानां सर्वेषामेव उत्पत्तिः कारणपरिमाणादेव इति निर्धार्यते । संख्याया आरम्भस्तु न कल्प्यते व्यवस्थादोषशङ्कया ।

यत्तु परमाणोः अपि प्रत्यक्षं योगिनां भवति, यद्यपि अस्मदादीनां न तत् प्रत्यक्षगम्यम् । तत्र परमाण्डल्यं योगिनां परमाणुप्रत्यक्षे कारणमिति तर्क्यते । तत्र योगिप्रत्यक्षमहेतुकम् इति नियमात् ।

एवं परमाण्डल्यभिन्नानां सर्वेषामेव कारणत्वं, परन्तु परमाण्डल्यस्य न कारणत्वमिति सिद्धम् ।

(२०) प्रश्नः—परममहत्परिमाणातीन्द्रियसामान्यविशेषानाम् अकारणत्वं सयुक्तिकं निर्दिश्यताम् ।

उत्तरम्—'एवं (परमाणुपरिमाणवत् अकारणाः) परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः ।' इति श्रीविश्वनाथतर्कपञ्चाननपादाः । तस्यार्थः परममहत्परिमाणम्—यथा व्योमपरिमाणम्, अतीन्द्रियसामान्यम् यथा मनस्त्वम्, विशेषाश्च अकारणाः इति ।

परममहत्परिमाणानां यथा व्योमादीनां सर्वव्यापित्वात् नित्यत्वाच्च न कारणत्वं युज्यते । न ते किञ्चित्कार्यम् उत्पादयन्ति । अत एव व्योमादिपरममहत्परिमाणानां परमाण्डल्यवदकारणत्वं सिद्धम् ।

मनस्त्वादि-अतीन्द्रियसामान्यानामपि कारणत्वं न अतीन्द्रियपदार्थानां ये समवायिसामान्याः ते अपि कारणत्वहीना इत्यर्थः । अतीन्द्रियं किमिति चेत् इन्द्रियविषया ये पदार्थाः घटादयः तेषां सामान्यानि घटत्वादीनि घटादिप्रत्यक्षे हेतवः । परन्तु अतीन्द्रिया ये मनसादयः तेषां सामान्याः मनस्त्वादयः न कुत्रापि

कारणत्वमुपयान्ति । अत एवातीन्द्रियसामान्यानां परमाण्डल्यवत् अकारणत्वमुक्तम् ।

विशेषास्तु अकारणा एव न ते किञ्चित्कार्यं जनयन्ति ।

ननु परमाण्डल्य-अतीन्द्रियसामान्यादीनां योगिप्रत्यक्षे कारणत्वं स्यादिति चेत् नैतत्—योगिप्रत्यक्षास्तु भूतभविष्यप्रत्यक्षवद् अकारणा एव ।

न स्यात् प्रत्यक्षे, ज्ञाने तु कारणत्वमिति, परमाण्डल्यपरममहत्परिमाणातीन्द्रियसामान्यविशेषानां अणुव्योममनोविशेषादीनां ज्ञाने कारणत्वं स्यादिति चेत् । न तत्तत्सामान्यानां ज्ञानमेव तत्र हेतुः इति दिक् ।

ननु 'अणु द्रव्यम्, परमाण्डल्यवत्त्वात्' इतिवद् परमाण्डल्य परममहत्परिमाणातीन्द्रियसामान्यविशेषानामनुमितिकरणे हेतुत्वं स्यादिति नैतेषां अकारणत्वमिति चेत् । न, लिङ्गज्ञानमत्र कारणं तु परमाण्डल्यादयः इति सिद्धान्तितत्वात् ।

यत्तु आत्मनो मानसप्रत्यक्षे तस्य परममहत्परिमाणं कारणमित्युच्यते, तत्कथं परममहत्परिमाणानामकारणत्वमिति चेत् । सत्यम्, आत्मनोपरममहत्परिमाणव्यतिरिक्तानाम् आकाशकालदिगादीनां परममहत्परिमाणानामेव कारणताशून्यत्वं सम्भाव्यते । इति सर्वमुपपन्नम् ।

(२१) प्रश्नः—'परमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ।' इति कारिकार्थः सप्रपञ्चं व्याख्यायताम् ।

उत्तरम्—द्रष्टव्यम् प्रश्नः १९–२० ।

(२२) प्रश्नः—'एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः' ।

इति वाक्यं सविस्तरं विवेचयत ।

उत्तरम्—द्रष्टव्यम् प्रश्नः २० ।

(२३) प्रश्नः—कारणस्य किं लक्षणमिति सविस्तरं विवेच्यत ।

अथवा

'अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।
कारणत्वं भवेत्.. ॥

इति कारिकांशं सविस्तरं विवेचयत ।

उत्तरम्—कार्यजनकन्तु कारणम् । यः कार्यं जनयति तत् कारणमिति । तस्य लक्षणमुक्तम्—अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेदिति

श्रीविश्वनाथतर्कपञ्चाननपादाः। तदेवोक्तम् श्रीमत्केशवमिश्रपादैः—'अनन्यथा-सिद्धनियतपूर्ववर्तित्वं कारणत्वम्। इति।

अस्यार्थः—यस्य कार्यात्पूर्वभावो नियतः अनन्यथासिद्धश्च, तत् कारणम् यथा तन्तवः पटस्य, मृत्पिण्डः घटस्य च कारणम्। तन्तूनां घटरूप-कार्यात्पूर्व-भावो नियतः अनन्यथासिद्धश्च। तथैव मृत्पिण्डस्य घटरूपकार्यात् पूर्वभावो नियतः अनन्यथासिद्धश्च। यत्तु घटकार्यात् दैववशात् प्राप्तानां रासभादीनामपि पूर्वभावो अस्त्येव परन्तु नासौ नियतः। अत एव रासभस्य न तत्र कारणत्वम्। तथा च पटकार्यात्पूर्वं तन्तुरूप पूर्वभावो नियतः तथाऽपि न तत्कारणम् अन्यथा-सिद्धत्वात् कथम् अन्यथासिद्धमिति चेत्, उच्यते—तन्तुरूपं पटरूपोत्पादने अनन्यथा-सिद्धम्। अन्यथा पटकार्येऽपि अनन्यथासिद्धत्वे कल्पनागौरवदोषपातात्। तन्तुरूपं पटरूपं प्रति अनन्यथासिद्धम् न तु पटकार्यं प्रति इति दिक्।

एवं (१) कारणं कार्यस्य पूर्वभावि भवति, (२) तस्य पूर्वभावित्वं नियतमेव (३) कारणं कार्योत्पत्तेः अव्यवहितपूर्वक्षणपर्यन्तं वर्तते, (४) कारणं कार्यस्य अव्यहितपूर्वक्षणे पञ्चविधअन्यथासिद्धिशून्यश्च भवति। इति सर्वमुपपन्नम्।

(२४) प्रश्नः—कारणस्य भेदान् विलिख्य तान् लक्षणोदाहरण-प्रदर्शनपूर्वकं विवृणुताम्।

उत्तरम्—कार्यस्यानन्यथासिद्धिशून्यं नियतपूर्वभावि कारणम्। तच्च त्रिविधम्—समवायि-असमवायि-निमित्तभेदात्। यथोक्तम्—

'......तस्य त्रैविध्यं परिकीर्तितम्॥
समवायिकारणत्वं ज्ञेयं तथाप्यसमवायिहेतुत्वम्।
तथा न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्॥
यत्समवेतं कार्यं भवति ज्ञेयं तु समवायि जनकं तत्।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्॥ इति।

यत्समवेतं कार्यमुत्पद्यते तत्समवायि कारणम्। यथा तन्तवः पटस्य। पटस्तु तन्तुषु समवायसम्बन्धेन अव्यक्ततया तिष्ठति अतः समवायसम्बन्धेन तत्र पटस्योत्पत्तिः प्रत्यक्षसिद्धा एव। उत्पन्ने सत्यपि पटे तन्तवः पुनः कार्ये समवायि सम्बन्धेन तिष्ठन्ति। यत्तु स्वकार्ये समवायिसम्बन्धेन तिष्ठति तत्समवायि-कारणम्। एवमेव मृत्पिण्डं घटस्य समवायिकारणम्, एवं मुकुट-कुण्डलादीनां स्वर्णपिण्डम्।

अत्र समवायसम्बन्धस्यार्थमवलोकनीयम्—अयुतसिद्धयोः सम्बन्धः समवायः। अयुतसिद्धौ तु—'ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ' इति। यथा पटः तन्तुषु तदाश्रितः तिष्ठति, अतः तन्तुनाशे जाते पटनाशो निश्चितमेव अत एव तौ अयुतसिद्धत्वात् समवायिसम्बन्धवन्तौ तथा च तन्तवः पटस्य समवायिकारणानि। इति। एवमेव पटः स्वगतरूपादेः समवायिकारणम्। एवमन्यत्रापि ऊह्यम्।

असमवायिकारणन्तु असमवायिसम्बन्धवान्। अत एव यत् समवायिकारणं प्रति प्रत्यक्षतया सम्बद्धो भवति तदसमवायिकारणम्। यथोक्तम्—"तत्र समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयं असमवायिकारणमिति"। तथा चोक्तं केशवमिश्रपादैः 'यत् समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणम्' इति। यथा तन्तुसंयोगः पटस्यासमवायिकारणम्। अत्र तन्तवः समवायिकारणा इति पूर्वमेवोक्तम्। तत्प्रत्यासन्नत्वात् तन्तुसंयोगःअसमवायिकारणम्।

तदसमवायिकारणमपि द्विविधम्, कारणैकार्थप्रत्यासत्या, कार्यैकार्थप्रत्यासत्या चेति दिक्।

निमित्तकारणन्तु समवाय्यसमवायिकारणाभ्यां भिन्नम् इति 'आभ्यां परं तृतीयं स्यादि'ति वचनात् सिद्धम्। अतः 'यन्न समवायिकारणं, नाप्यसमवायिकारणम् अथ च कारणम्, तन्निमित्तकारणमि'त्युच्यते। यथा वेमादिकं पटस्य यथा वा कुम्भकारचक्रं घटस्य।

तदित्थं समवाय्यसमवायि-निमित्तभेदात् कारणत्रैविध्यम् उपपन्नम्।

(२५) प्रश्नः— कारणस्य लक्षणं किम्? कतिविधं च तत्? इति युक्तिपूर्वकं सलक्षणं सोदाहरणं प्रतिपाद्यताम्।

उत्तरम्—द्रष्टव्यम् प्रश्नः २३–२४।

(२६) प्रश्नः—असमवायिकारणस्य किं लक्षणम्? तुरीतन्तुसंयोगस्यासमवायिकारणत्वं कथं न? असमवायिकारणस्य परिस्कृतलंक्षणं किम्? इति व्याख्यायताम्।

उत्तरम्—'कारणत्वे सति समवायिकारणप्रत्यासन्नम् असमवायिकारणम्'। इति असमवायिकारणस्य सामान्य लक्षणम्। यथा पटस्य समवायकारणं तन्तवः तत्प्रत्यासन्नत्वात् तन्तुसंयोगः पटस्यासमवायिकारणम्। तन्तुसंयोगस्तु गुणः

तच्च कारणत्वे सति समवायिकारणभूत-तन्तुप्रत्यासन्नत्वात् असमवायिकारणं स्यादिति शङ्क्यते ।

न हि तन्तुसंयोगः पटस्यासमवायिकरणत्वेन स्वीक्रियते । यथा समवायिकारणनाशे सति कार्यनाशः तथैव असमवायिकारणनाशेऽपि कार्यनाशः इति सिद्धान्तः । एवमवस्थायां तन्तुसंयोगस्य असमवायिकारणत्वकल्पनें तन्नाशे पटनाशः स्यात् तत् तु प्रत्यक्षविरुद्धमेव । अत एव नैतदसमवायिकारणमिति निष्कर्षः । तन्तुसंयोगस्तु पटस्य निमित्तकारणं तथा च तुरीपटसंयोगं प्रत्यसमवायिकारणं अस्त्येवेति ।

एवं सति पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नमिति पदं देयम् ।

एवं अभिघाताख्यसंयोगस्य वेमादिकमप्यसमवायिकारणं स्यात्, तत्र तु भूकन्दुक-संयोगे भूमि-कन्दुकयोः समवायिकारणत्वं दृश्यते, तत्सहचरत्वात् वेगस्यासमवायिकारणत्वं दृश्यते, परन्तु नैतद् । नैयायिका वेगमत्रासमवायिकरणत्वेन न स्वीकुर्वन्ति । तथा च नोदनाख्ये संयोगकार्ये स्पर्शस्यासमवायिकारणत्वं न स्वीकुर्वन्ति ।

एवमेव आत्मनि ज्ञानं, ज्ञानेनेच्छा, इच्छया प्रवृत्तिः इति । अत एव इच्छाया असमवायिकारणं ज्ञानं स्यादिति शङ्क्यते परन्तु नैतन्नैयायिका स्वीकुर्वन्ति । तत्र ज्ञानम् इच्छाया, इच्छा प्रवृत्तेः निमित्तकारणत्वं स्वीक्रियते ।

अत्र तुरीतन्तुसंयोगः, वेगं, ज्ञानमित्यादयः यद्यपि न असमवायिकारणाः तथापि तत्र असमवायिकारणलक्षणव्याप्तिः स्पष्टमेव लभ्यते इत्यतिव्याप्तिः । यद्यपि अत्र तुरीतन्तुसंयोगः तुरीपटसंयोगस्यासमवायिकारणत्वेन लभ्यते तथापि नैतेनासमवायिकारणलक्षणगतदोषः निराक्रियते अतएवोक्तम्—'तेन तद्भिन्नत्वं सामान्यलक्षणं देयमेव ।' अस्यार्थः पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं, अभिघाताख्यसंयोगासमवायिकारणलक्षणे वेगादिभिन्नत्वं एवम् अन्यात्रापि तत्तदसमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयमिति ।

नैतदसमवायिकारणसामान्यलक्षणम् । तत्तत् कार्यमात्रव्याप्तत्वात् ।

समवायिकारणे असमवायिकारणं द्वैविध्येन प्रात्यासन्नं भवति—प्रथमं कार्येण असमवायिकारणस्याधिकरणप्रत्यासत्तिः, द्वितीयं तस्य कार्यस्य समवायिकारणेन असमवायिकारणप्रत्यासत्तिः । तदेवोक्तं विश्वनाथपञ्चाननभट्टाचार्यैः—

'समवायिकारणे प्रत्यासन्नं द्विविधं कार्यैकार्थप्रत्यासत्त्या, कारणैकार्थप्रत्यासत्या । इति । तत्र कार्यैकार्थप्रत्यासत्त्या उदाहरणं यथा—घटादिकं प्रति कपाल-

संयोगादिकम् । कारणैकार्थप्रत्यासत्त्याः उदाहरणं यथा—घटरूपं प्रति कपाल-रूपम् । प्रथमे तु कार्येण घटेन स कारणस्य कपालस्य एकस्मिन् कपाले प्रत्यासत्तिः, द्वितीये च स्वगतरूपादेः समवायिकारणं घटः, तेन सः कपालरूपस्यैकस्मिन् कपाले प्रत्यासत्तिः इति फलितोऽर्थः । एवमत्र परिस्कृतम् असमवायिकारण-लक्षणं—"कार्यैकार्थकारणैकार्थप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं ज्ञानादि-भिन्नमसमवायिकारणम्" इति ।

(२७) प्रश्नः—किं नामान्यथासिद्धम् ? कतिविधं च तत् ? लक्षणोदाहरणनिर्देशपूर्वकं विशदीक्रियताम् ।

उत्तरम्—कारणनिरूपणप्रसङ्गे विश्वनाथतर्कपञ्चाननभट्टाचार्यैः यदुक्तम्—'अनन्यथासिद्धनियतपूर्ववृत्तिः कारणमि'ति, तत्र अनन्यथासिद्ध-पदव्याख्यानाय अन्यथासिद्धान् दर्शयति—एते पञ्चान्यथासिद्धा इति । तथा च—

(१) येन सह पूर्वभावः, (२) कारणमादाय वा यस्य ।
(३) अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥
(४) जनकं प्रति पूर्ववृत्तितामपरिज्ञाय यस्य न गृह्यते ।
(५) अतिरिक्तमथापि यद्भवेत् नियतावश्यकपूर्वभाविनः ॥
एते पञ्चान्यथासिद्धा........

क्रमशः तेषाम् उदाहरणान्याहु—

..................................दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥
तृतीयन्तु भवेद् व्योम कुलालजनको परः ।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥ इति ।

१, प्रथममन्यथासिद्धन्तु—'येन सह पूर्वभावः' इत्युक्तम्, अस्यार्थः दण्डन्तु घटरूपे कार्ये कारणम् । तत्र किं दण्डं दण्डत्वेन कारणं, उत वा पृथ्वीत्वेन, इति शङ्कायां जाते सति दण्डत्वेनैवेति स्पष्टम् । तत्र दण्डत्वेन सह दण्डस्य घटकार्ये पूर्वभावः समीचीनमेव । तथाप्यत्र घटरूपकार्ये दण्डत्वन्तु न कारणम् । अन्यथा सिद्धत्वाभावात् । दण्डत्वन्तु दण्डेन सह पूर्वभावित्वात् । प्रथमम् अन्यथासिद्धम् ।

२. द्वितीयमन्यथासिद्धन्तु—'कारणमादाय वा यस्य' इत्युक्तम् । तस्यार्थः यस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः, इत्युक्तं वृत्तिकारैः । कारणस्यैवान्वय-

व्यतिरेकावादाय यस्यान्वय-व्यतिरेकिणौ गृह्येते तद्द्वितीयमन्यथासिद्धम्। कार्यकारणयोरेवान्वयव्यतिरेकौ भवन्ति। तत्र कारणेन सह यस्यान्वयव्यतिरेकौ गृहीत्वा कार्येण नियतपूर्ववृत्तित्वं सम्भाव्यते, तत् तृतीयमन्यथासिद्धम्। यथा दण्डरूपं घटकार्यं प्रति। दण्डरूपन्तु घटरूपं प्रति अनन्यथासिद्धं न पुनर्घटं प्रति।

३. तृतीयमन्यथासिद्धन्तु—'अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वं भावविज्ञानम्' इत्युक्तम्। यथा शब्दसमवायिकारणत्वेन व्योम घटं प्रति नियतपूर्ववृत्तिः। तथापि व्योम घटं प्रति न कारणम् अन्यथासिद्धत्वात्। आकाशस्य शब्दं प्रति पूर्वभावे ज्ञाते सत्येव घटं प्रति तस्य पूर्वभावत्वं ज्ञायते। अत एवात्र तृतीयम् अन्यथासिद्धम्।

४. चतुर्थमन्यथासिद्धन्तु—'जनकं प्रति पूर्ववृत्तितामपरिज्ञाय यस्य न गृह्यते' इत्युक्तम्। तत्र जनकं = कारणमित्यर्थः कारणस्य यत् पूर्ववृत्तिः तत्तु कार्यस्यापि स्वयंसिद्धमेव तथा तदन्यथासिद्धम्, अतो न कारणमिति। यथा घटं प्रति कुलालजनकः, कुलालजनकस्तु कुलालं प्रति कारणत्वादेव घटकार्यात् नियत-पूर्ववृत्तिः। तथा नाऽसौ करणम् अन्यथासिद्धत्वात्।

ननु कुलालजनकोऽपि कारणं स्वयं कुलालरूपत्वादिति चेत्—सत्यम्। कुलालत्वेन तु सः कारणं परं न तु कुलालजनकत्वेन इति।

५. पञ्चममन्यथासिद्धन्तु—'अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्व-भाविनः' इति। कार्यसम्भवे अवश्यक्लृप्तनियतपूर्ववर्ती तद्व्यतिरिच्य सर्वमेवेतरपदार्थजातं सत्यपि पूर्ववृत्तित्वे अन्यथा सिद्धमेव। यथा—प्रत्यक्षत्वे महत्वं नियतपूर्ववृत्तिः सत्यपि न कारणम् अन्यथासिद्धत्वात्। अत्र इन्द्रियार्थ-सन्निकर्षमेव कारणत्वेन स्वीक्रियते, महत्त्वं इन्द्रियार्थसन्निकर्षे कारणम्। यत्तु ग्रन्थकृद्भिः अनेकत्वसमवेतत्त्वमुक्तम् तत्र केचन विद्वांसः द्व्यणुकेषु अतिव्याप्तिं मन्यन्ते अतो नात्र गृहीतम्। अथवा महत्त्वस्य कारणत्वेन अनेकद्रव्यसमवेत-त्वम्। अनेकशब्दस्य द्विसंख्यया अधिकमेवार्थं स्वीकार्यं त्र्यणुकादिषु महत्त्वग्रह-णात्।

यथा वा घटादौ रासभादयः पूर्ववृत्तित्वे सत्यपि नाऽसौ नियतः, अत एव न कारणमित्यर्थः।

अत्रास्मिन् पञ्चमान्यथासिद्धे चतुर्णामप्यन्तर्भावः स्वीकर्तव्यम् इति दिक्।

(२८) प्रश्नः—"समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्॥

कारिकेयं सम्यग् व्याख्येया ।

उत्तरम्—कारणनिरूपणप्रसङ्गे यदुक्तम्—कारणं त्रिविधम्, समवाय्यसमवायिनिमित्तभेदात् । तत्र—समवायिकारणत्वं द्रव्यस्यैव नियतम्'। द्रव्येतराणि गुणकर्मादीनि तु न कदापि समवायिकारणत्वमुपयान्ति । तथैव गुणकर्मणाम् असमवायिकारणत्वं नियतम् ।

अस्यार्थः द्रव्यन्तु कदापि असमवायिकारणं न भवति न च द्रव्येतराणि समवायिकारणानि भवन्ति । अत एव द्रव्यलक्षणोद्देशनिरूपणे स्पष्टमेवोक्तम्—समवायिकारणत्वं द्रव्यत्वमि'ति । असमवायिकारणानि तु गुणकर्माणि एव भवन्ति । द्रव्यगुणकर्मभिन्नानां सामान्यविशेषसमवायाभावानां तु कदापि कारणत्वं न सम्भवति । यथा पटरूपकार्ये समवायिकारणानि तन्तवः, तन्तुसंयोगस्तु असमवायिकारणत्वं गच्छति । एवं पटरूपस्यासमवायिकारणंन्तु तन्तुरूप एव । एवं यथा गुणानामसमवायिकारणत्वं तथैव कर्मणामपि । पतत्रिवृक्षसंयोगरूपे कार्ये पतत्रिवृक्षौ समवायिकारणे पतत्रिणः क्रिया उड्डयनन्तु असमवायिकारणम् ।

ननु गुणकर्मणोः असमवायिकारणसाधर्म्ये सिद्धे सति प्रयत्नं प्रति इच्छायाः असमवायिकारणत्वं स्यादिति चेत् न । न तु गुणकर्मणोः असमवायिकारणत्वसाधर्म्यम् अपितु अत्र गुणकर्मभिन्नानां असमवायिकारणवैधर्म्यं इति व्याख्यातुं युक्तम् । अथवा साधर्म्यशब्दस्यैवार्थः एवं गृहीतव्यम्—असमवायिकारणवृत्तिसत्ताभिन्न जातिमत्त्वम् । तदेवोक्तम्—

'असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं, न तु गुणकर्मणोः साधर्म्यम् इत्यत्र तात्पर्यम् । अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः । तेन ज्ञानादीनामसमवायिकारणविरहेऽपि न क्षतिः ।' इति ।

(२९) प्रश्नः—क्षित्यादिद्रव्याणां परस्परसाधर्म्य-वैधर्म्ये निरूप्यताम् ।

उत्तरम्—द्रव्यलक्षणन्तु 'समवायिकारणत्वं द्रव्यत्वम्' इति तत्र द्रव्याणि नव—'क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः' इति । अर्थात् पृथ्व्यादिपञ्चमहाभूतैः सह आत्ममनसीति अन्तः करणानि, दिक्कालश्च मिलित्वा द्रव्याणीति कथ्यन्ते ।

तेषां मध्ये पृथ्व्यादिभूतचतुष्टयपरमाणवः आकाशश्च नित्यद्रव्याणि इतराणि तु अनित्यानि । नित्यद्रव्यभिन्नानां पृथ्व्यादीनां आश्रितत्वम्, तत्तेषां पर-

स्परसादृश्यं, नित्यद्रव्याणां निराश्रितत्वमिति तेभ्यो वैधर्म्यम्। पृथ्व्यादयः स्व-अवयवे आश्रिताः सन्तः तिष्ठन्ति। परमाणव आकाशादयश्च (आकाशकाल-दिगात्मनांसि) अवयवरहितानि, अतः तेषामनाश्रितत्वम् उक्तम्।

पृथ्व्यादिनवानामेव द्रव्याणां द्रव्यत्वं गुणवत्त्वं च तेषां साधर्म्यम्। यथा पृथ्व्याम् द्रव्यत्वं सामान्यं गन्धगुणवत्त्वञ्च। तथैवान्यत्र। गुणाः द्रव्येषु समवाय-सम्बन्धेन तिष्ठन्ति अत एव तेषां गुणवत्त्वमुक्तम्।

पृथ्वी-जल-तेज-वायुमनसां (पञ्चद्रव्याणां) परत्वमपरत्व-मूर्तत्व-क्रयावत्त्व-वेगवत्त्वम् च सिद्धम्। परत्वमपरत्वन्तु देशकालभेदेन द्विविधं तद्यथा दैशिकं परत्वं दैशिकमपरत्वञ्च, तथैव कालिकं परत्वं कालिकमपरत्वञ्च। यद्यपि द्रव्येषु परत्वापरत्वे तु न सर्वकालव्यापिनः, अयमत्र अनेन परत्ववान् अयमत्रापरत्व-वानिति किमपि देशविशेषं कालविशेषञ्च आश्रित्यैव वक्तुं शक्यते तथाप्यत्र सादृश्यवैसादृश्यानां नातिव्याप्तिरिति वक्तव्यम्। एवं च तेषां पृथ्वी-जल-तेज-वायु-मनसां मूर्तत्वं क्रियावत्त्वं वेगाश्रयत्वं च द्रष्टव्यम्।

पृथ्वीजलतेजवायुमनोभिन्नानां—आकाशदिक्कालात्मानां परममहत्परिमाणं सर्वगतत्वं च ज्ञातव्यम् अतः तेषां परत्वापरत्वं मूर्तत्वं क्रियावत्त्वं वेगाश्रयत्वं च न। इति परस्परसादृश्यं पृथ्व्यादिभिः वैसादृश्यं स्पष्टमेव।

क्षित्यादिपञ्चमहाभूतानि तदेव तेषां सादृश्यं तदितराणां वैसादृश्यञ्च। तेषु मध्ये व्योमव्यतिरिक्तानां तेजःपृथ्वी-जल-वायूनां स्पर्शवत्त्वं दृश्यते इति तदितरेभ्यः आकाशदिक्कालात्ममनोभिः वैधर्म्यम्। स्पर्शन्तु घ्राणेन्द्रियग्राह्यं विशेषगुणमेव। अत एव लौकिकप्रत्यक्षयोग्यं विषयम्।

चतुर्षु पृथ्वी जल तेज वायुषु द्रव्यारम्भः = इतरपदार्थजननशक्तिः अस्ति। परन्तु न ते कञ्चिदपरं जनयन्ति पृथ्वी घटादिकं पृथ्वीत्ववन्तमेव जनयति न तु अपरम्।

अस्यार्थः पृथ्वीजलतेजवायवः परमाणुवन्तः। अत एव तेषां परमाणवः द्व्यणुकादिकं जनयन्ति। तदितराणां आकाशकालदिगात्मनसां तु परमाणवः न सन्ति, ते तु नित्यद्रव्याणि, अत एव कञ्चिदपरं न जनयन्ति।

पृथ्वीप्रभृतीनां परमाणवः द्व्यणुकादिकं क्रमशो घटपर्यन्तं जनयन्ति। घटादयस्तु अन्त्यावयविनः अत एव ते कञ्चिदन्यं न जनयन्ति। तथा चोक्तं 'न च द्रव्यारम्भघटादावव्याप्तिः। अत एवात्र द्रव्यारम्भरूप साधर्म्यस्यार्थः—द्रव्यासमवायिकारणवृत्तिद्रव्यत्व व्याप्यजातिमत्त्वम्। इति द्रव्यादीनां साधर्म्यम्।

आकाशस्य आत्मनश्च विशेषगुणाः अव्याप्तवृत्तिनः भवन्ति। ये गुणाः स्व-आश्रयभूतस्य सर्वदेशं न व्याप्नुवन्ति, पृथ्व्यादीनां गुणाः गन्धादयः सर्वदेशं व्याप्नुवन्ति न तथा आकाशादीनां अतएव ते अव्याप्तवृत्तिरिति कथ्यन्ते। यथा संयोग गुण स्वआश्रयभूतयोः एकदेशं व्याप्नुवन्ति तथैवात्रावगन्तव्यम्। यथा शब्दः आकाशस्य एक देशं व्याप्नोति। यथा च ज्ञान-इच्छा-द्वेषादयो आत्म-विशेषगुणाः आत्मनः एक देषमेव व्याप्नुवन्ति इति।

तथैव च आकाशात्मनां विशेषगुणाः क्षणिकत्वमपि भजन्ते यथा शब्द अपर-शब्दमुत्पाद्य नश्यति। तथा च अन्तिमः शब्दः श्रोतृगत श्रवणेन्द्रियं प्राप्य स्वयं नश्यति। एवं च आत्मनः विशेषगुणाः इच्छाद्वेषादयोऽपि क्षणिका एव। एतत्तु आकाशात्मनां साधर्म्यम्।

पृथ्वीजलतेजांसि रूपवन्तः द्रवत्ववन्तः प्रत्यक्षविषयाश्च। इति तेषां साध-र्म्यम्। रूपवत्त्वन्तु तेजसो विशेषगुणः। यद्यपि क्षित्यप्सु रूपस्य न प्रत्यक्षं तथापि तत्र तेजस्त्वसत्त्वात्। यथा च सुवर्णादिषु पृथ्वीत्वं सत्यपि तेजस्त्वं द्रवत्वञ्चा-स्त्येव। तथैव वायुवशात् उत्पतितेषु रजः परमाणुषु जलपरमाणुषु तेजःपर-माणुषु च प्रथ्व्यादीनामनुमानः। अत एव बाह्यकरण प्रत्यक्षाभावेऽपि तत्र तत्र रूपवत्त्वं रसवत्त्वं ज्ञातव्यम्।

पृथ्वी-जलेषु च गुरुत्वं रसवत्त्वमपि इति साधर्म्यम्। तत्रापि अनुमानमेव प्रमाणम्। इति दिक्।

(३०) प्रश्नः—"................ अथाकाशशरीरिणाम्।
अव्याप्तवृत्तिः क्षणिको विशेषगुण ईष्यते॥"

इति पादोनकारिका व्याख्येया।

उत्तरम्—अत्र २९ तम प्रश्नस्योत्तरे आकाशस्य आत्मनश्च इत्यारभ्य एतत्तु आकाशादीनां साधर्म्यम् इति पर्यन्तं द्रष्टव्यम्।

(३१) प्रश्नः—पृथिव्यादीनां गुणाः उद्देशमात्रेण दर्शयत।

उत्तरम्—न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे पृथिव्यादीनां गुणाः निर्दिष्टाः। ते यथा—

वायोः—स्पर्शसंख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्ववेगाख्याः। तत्र स्पर्शं विशेषः शेषाः सामान्याः।

तेजसः—स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-रूप-वेग-नैमित्तिकद्रवत्वानि । तत्र स्पर्शरूपे विशेषौ शेषाः सामान्याः ।

अपाम्—स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-वेगाख्य-संस्कार-सांसिद्धिकद्रवत्व-गुरुत्व-रूप-रस-स्नेहानि । तत्र स्पर्शसांसिद्धिकद्रवत्व-रूप-रस-स्नेहानि विशेषगुणाः शेषाः सामान्याः ।

पृथिव्याः—स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-वेग-नैमित्तिकद्रवत्व-गुरुत्व-रूप-रस-गन्धाः । तेषु स्पर्शरूपरसगन्धाः विशेषाः शेषाः समान्याः ।

आत्मनः—बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-संख्यापरिमाण-पृथक्त्व-संयोग-विभाग-भावनाख्यसंस्कार-धर्माधर्माः । तेषु बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-भावना-धर्माधर्माः विशेषाः शेषाः सामान्याः ।

दिक्कालयोः—संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः ।

आकाशस्य—संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-शब्दाः । तत्र शब्दः विशेषः ।

ईश्वरस्य—संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-बुद्धि-इच्छा-प्रयत्नाः । तत्र बुद्धीच्छाप्रयत्नाः विशेषाः ।

मनसः—परत्वापरत्व-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-वेगाख्याः । सर्व एव सामान्याः । इति दिक् ।

(३२) प्रश्नः—पृथ्व्याः लक्षणं सयुक्ति प्रदर्श्यताम् ।

उत्तरम्—'गन्ध हेतुः पृथ्वी' इति पृथ्व्याः लक्षणमुक्तं पं० विश्वनाथतर्क-पञ्चाननभट्टाचार्यैः ।

तत्र गन्धवत्त्वं पृथ्वीत्वमित्यपि वक्तुं शक्यते तत्र किमर्थं हेतुग्रहणमिति तदुच्यते—पृथ्वीत्वजाति सिद्धयर्थम् इति तदग्रे वक्ष्यते । गन्धहेतुरित्यस्य गन्धसमवायिकारणमित्यर्थः । यथा हि दिक्कालौ सर्वत्र कारणत्वमुपयान्ति । अत एव गन्धस्यापि दिक्कालौ कारणत्वमिति । अत एवोक्तम् समवायिकारणमिति । दिक्कालौ तु दैशिक-कालिकसम्बन्धेन कारणतां गच्छन्ति । न तु समवायसम्बन्धेन । गन्धस्तुसमवायसम्बन्धेन पृथिव्यामेव तिष्ठतीति । अत एव दिक्कालेषु नातिव्याप्ति । अत एव 'गन्धसमानाधिकरणं द्रव्यत्व-साक्षाद्व्याप्यजातिमत्त्वं पृथ्वीत्वम्' ।

यत्तु घटोत्पत्त्यनन्तरं प्रथमक्षणे गन्धाभावात् तत्र पृथ्वीत्वं न स्यादित्युच्यते तदपि न। गन्धवद्वृत्ति द्रव्यत्वव्याप्यजातिमत्वम् इति लक्षणपरिष्कारेण तद्दोष निराकरणसम्भवात्। नवद्रव्याणाम्मध्ये पृथ्वी एव गन्धगुणस्य समवायकारणम् अत एव तदेव युक्तम्।

(३३) प्रश्नः—पृथ्वीत्वजातौ किं मानमिति विवृणुताम्।

उत्तरम्—गन्धसमवायकारणं पृथ्वीत्वमिति पृथिव्याः सामान्यलक्षणमुक्तम्। तत्र कारणत्व(हेतुत्व)ग्रहणम् पृथ्वीत्वजातिसिद्धयर्थम्। पृथ्वीत्वजाति सिद्धौ तु अनुमानमेव प्रमाणम्। तत्र चानुमानप्रक्रिया, यथा—यद्यत्कार्यं तत्तत् किञ्चितकारणतादच्छेदकं, सकारणत्वात् घटादिवत्। गन्धन्तु कार्यं, अतएव किञ्चितकारणतावच्छेदकधर्मवत् कार्यत्वात् तदेव पृथ्वीत्वम्। अथवा समवाय सम्बन्धावच्छिन्ना गन्धत्वावच्छिन्नगन्धनिष्ठकार्यता निरूपिता या तादात्म्य सम्बन्धावच्छिन्ना पृथ्वीनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणता त्वात् घटनिष्ठकार्यतानिरूपित कपालगतकारणतावत् यथा कपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना तथा पृथ्वीनिष्ठा कारणता पृथ्वीत्वधर्मावच्छिन्ना अव गन्तव्या। इति।

अस्यार्थः गन्धत्वं प्रति समवायकरणत्वं पृथ्वीत्वम् अथवा यत्तु गन्धसमवायि कारणताया अवच्छेदकम् तत्पृथिवीत्वम्। इति पृथ्वीत्वजातिसिद्धिः, अन्यथा तु—यदि पृथ्वीत्वं गन्धत्वं प्रति समवायिकारणताया अवच्छेदकं न स्यात् तर्हि गन्धोत्पत्तिः कारणरहितेति ग्राह्यम्। न हि तथा सम्भवेत् कारणरहितस्य कस्यचिदपि कार्यस्यासत्त्वात्। एवं सति कारणे तस्यावच्छेदकं किञ्चिद् धर्म स्यादेव। इति सर्वमुपपन्नम्।

(३४) प्रश्नः—पाषाणादौ पृथ्वीत्वं कथं सिद्धयतीति विवृणुत।

उत्तरम्—गन्धसमवायिकारणत्वं पृथ्वीत्वमिति पृथ्वीत्वलक्षणम्। तत्रास्यार्थ यत्र यत्र गन्धोपलब्धिः तत्र तत्र पृथ्वीत्वम्। यत्र यत्र पृथ्वीत्वाभावः तत्र तत्र गन्धस्याभावः इति वा।

ननु पाषाणादौ गन्धत्वाभावः। (पाषाणे गन्धं नास्ति, यद्यत्र गन्धं स्यात् तर्हि लभ्येत् न च लभ्यते अत एव नास्त्येव।) अत एव पाषाणादौ पृथ्व्या भाव स्यादिति शङ्कयते। अस्यार्थः पाषाणः न पृथ्वी गन्धाभावत्त्वात्। इति चेत्? न।

पाषाणे गन्धाभावः इति अप्रामाणिकमेव । यत्तु अनुपलब्धिः हेतुः दर्शितः तदपि न युक्तं स्वरूपासिद्धत्वात् । अत एव हेत्वाभास एव तत् । असद्धेतुभ्यो-ऽनुमानकल्पना न युक्तम् ।

पाषाणे यद्गन्धानुपलब्धिः तत्तु न गन्धाभावद्योतकं अस्फुटगन्धत्वमेव तत् । अनुद्भूतगन्धत्वादेव तदप्रत्यक्षः ।

यदि पाषाणे गन्धः न स्यात् तर्हि पाषाणभस्मेऽपि गन्धाभावः स्यात्, परन्तु न तत्तथा । पाषाणभस्मे यद्गन्धोपलब्धिः तस्योपादानकारणन्तु पाषाणस्थगन्ध एव, अत एव पाषाणः गन्धवान् इति सिद्धम् । अत्रानुमानप्रक्रिया—पाषाणभस्मः पाषाणोपादानोपादेयं पाषाणध्वंसजन्यत्वात् महापटध्वंसजन्यखण्डपटवत् । पाषाणस्य ये परमाणवः त एव पाषाणभस्मस्यापि, यत्तु पदार्थं यद्द्रव्यनाशाद् द्रव्यखण्डाद् वा जायते तस्य परमाणवः पूर्वद्रव्यस्य उपादानोपादेयम् एव (परमाणूनां नित्यत्वात्)। अस्यार्थः पाषाणस्य पाषाणभस्मस्य च परमाणवः तुल्या एव अत एव पाषाणभस्मे गन्धोपलम्भाद् पाषाणेऽपि गन्धोपलब्धिः युक्त-मेवेति यदि गन्धोऽत्र न लभ्यते तर्हि तद् अनुद्भूतमेव स्यात् न तु तस्याभावः इति सर्वमुपपन्नम् ।

एवं च पाषाणे गन्धसिद्धयनन्तरं यत्र यत्र गन्धः तत्र तत्र पृथ्वी इति नियमात् पाषाणे पृथ्वीत्वसिद्धिः निर्विवादमेवेति दिक् ।

(३५) प्रश्नः—पृथ्व्या लक्षणं विलिख्य तस्य रूपरसगन्धस्पर्शान् व्याख्यायताम् ।

उत्तरम्—पृथ्वीनिरूपणप्रसङ्गे कारिकावलीकारैः श्रीविश्वनाथतर्कपञ्चानन-पादैरुक्तम्—

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः । इति

तथा च स्वयं तैरेव वृत्तौ गन्धहेतुः इति कारिकांशव्याख्यानावसरे गन्ध-समवायकारणत्वं पृथ्वीत्वमिति उक्तम् । तेन दैशिककालिकसम्बन्धेन कारणत्वं यातानां दिक्कालानां निवृतिः । समवायसम्बन्धेन गन्धस्य कारणं पृथ्वीति पृथ्वीलक्षणम् निर्विवादमेव । गन्धस्तु पृथिव्यामेव समवायसम्बन्धेन तिष्ठति ।

यत्तु घटोत्पत्त्यनन्तरं प्रथमक्षणे निर्गन्धघटस्य पृथ्वीत्वं कथमुच्यते इति

चेत् तत्रैव 'गन्धहेतुः' इत्यस्य 'गन्धवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्' इ
व्याख्या कृता।

हेतुग्रहणं किमिति चेत्? तेन पृथ्वीत्वजातिसिद्धिः। गन्धस्य हेतुत्वे किञ्चित् कारणतावच्छिन्ना स्यादिति स्पष्टमेव। तत्तु कारणता पृथ्वीत्वमेव इति गन्धसमवायिकारणत्वं पृथ्वीत्वमिति लक्षणमुपपन्नमेव।

पृथ्व्यारूपन्तु नाना—अनेकविधमित्यर्थः। नीलशुक्लपीतादिभेदेनेत्यर्थः पृथ्वीगतानां विविधजातीनां पाषाण मृत्पिण्डादीनां विविधजातीनां पृथ्वीग भूतानां, तेषां विविधपाकजानां च रूपाणामनन्तत्वात् नाना रूपवतीत्युक्तम् विशेषतः नानात्वन्तु पाकजन्यमेव। नाना इत्यस्य एकाधिकरूपवत्त्वमित्यर्थः।

यथैको घटः पूर्वं धूसरवर्णः पश्चाच्च रक्तवर्णः भवति यथा वा फलं प हरितवर्णः पश्चाच्च रक्तपीतादिवर्णान् धारयति एवं स्थिते वर्णपरिवर्तन पाकजन्यमेव। वर्णपरिवर्तनमिदं पृथिव्यामेव सम्भवति न तु जलतेजःआदि द्रव्येषु। (पाकभिन्ननानारूपत्वन्तु पूर्वमेवोक्तम्) तदित्थं नानारूपत्वन्तु द्विवि स्वाभाविकं पाकजन्यञ्च।

पाकश्च द्विविधं पीलुपाकं पिठरपाकञ्च। घटस्य पाकजन्यं यद् धूसररू नाशद्वारा रक्तरूपोत्पत्तिः तदेव वैशेषिकमतेन पीलुपाकः नैयायिकमतेन तु पिठ पाक इति भेदः। पीलुपाकमतेन तु यत् घटस्य पाकप्रक्रिया भवति तत्तु प्रत्येक परमाणुपाकद्वारा सम्पूर्णघटस्य पाकः भवतीति। नैयायिकास्तु तत्र पिठरपाकमे स्वीकुर्वन्ति तन्मतेन सम्पूर्णमेव घटं पाकक्रिया द्वारा वर्णपरिवर्तनं लभते ते नैतत् परमाणुपाक इति। एवं पीलुशब्दस्य परमाणुः पिठरइत्यस्य पिण इत्यर्थः।

पृथिव्यां रसः षड्विधः—अम्ल-मधुर-लवण-कटु-तिक्तकषाय-भेदात्। षड् सन्तु आयुर्वेदादिषु प्रसिद्धमेव। तथाप्यत्र रस इत्यस्य प्रत्यक्षविषयत्वं न अपि प्रत्यक्षयोग्यत्वम् इत्यर्थः।

पृथिव्यां गन्धन्तु द्विविधं—सुरभ्यसुरभिभेदात्। अत्र द्विविधत्वन्तु वस्तु स्थितिमात्रम्। न तु लक्ष्यबोध्यमिति दिक्।

स्पर्शन्तु अनुष्णाशीतम्—अनुष्णम् अशीतमित्यर्थः। वायोरपि तथा। यद् ऊष्णशीतादि अनुभूतम् तद् बाह्यपदार्थसंसर्गजन्यमेव इति दिक्।

(३६) प्रश्नः—पृथिव्या लक्षणं विलिख्य तस्या भेदान् प्रदर्शयत।

उत्तरम्—(पृथिव्या लक्षणं ३२ तमे प्रश्नस्योत्तरे द्रष्टव्यम्।) पृथ्वी द्विविध

नित्या-अनित्या च । नित्या परमाणुरूपा, अनित्या द्व्यणुकाद्यारभ्य घटपटादिपर्यन्ता ।

नित्य पदार्थस्य लक्षणम्, यथा—'प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वम्' । अस्यार्थः यस्य न कदाचित्प्रागभावः न वा कदापि प्रध्वंसाभावः सम्भवति तन्नित्यम् । जन्यवस्तुषु अतिव्याप्तिनिवारणाय प्रागभावाप्रतियोगित्वमिति । ध्वस्तपदार्थेषु अतिव्याप्तिनिवारणाय ध्वंसाप्रतियोगित्वमिति । परमाणवस्तु न कदापि जायन्ति न वा नश्यन्ति इति ध्वंसाप्रतियोगित्वमिति ।

अनित्यस्य लक्षणं च प्रागभावप्रतियोगित्व-ध्वंसाप्रतियोगित्वाऽन्यतरवत्त्वं अनित्यत्वम् । द्व्यणुकादि घटपर्यन्ताः पुनः पुनः जायन्ति नश्यन्ति चेति अनित्यानीत्युच्यन्ते ।

अनित्या पृथ्वी त्रिविधा—शरीररूपा, इन्द्रियरूपा, विषयरूपा चेति । शरीरं द्विविधं योनिजमयोनिजञ्च । योनिजत्वं द्विविधं जरायुजमण्डजञ्च । जरायुजाः पशुमनुष्यादिरूपाः अण्डजाः पक्षिप्रभृतयः । अयोनिजाः स्वेदजोद्भिज्जा चेति । स्वेदजा यूकामशकादयः उद्भिज्जा वृक्षगुल्मादयः । पार्थिवं इन्द्रियम् घ्राणम् । विषयरूपा पृथ्वी तु द्व्यणुकादि ब्रह्माण्डपर्यन्तम् । तत्सम्पूर्णं यथा—

- पृथिवी
  - नित्या (परमाणुरूपा)
  - अनित्या
    - शरीररूपा
      - योनिजम्
        - जरायुजम् (मनुष्यपश्वादिकम्)
        - अण्डजम् (पक्ष्यादिकम्)
      - अयोनिजम्
        - स्वेदजम् (यूकामशकादिकम्)
        - उद्भिज्जम् (वृक्षलतागुल्मादिकम्)
    - इन्द्रियरूपा (घ्राणम्)
    - विषयरूपा (द्व्यणुकादि ब्रह्माण्डपर्यन्तम्)

(३७) प्रश्नः—पूर्वपक्षनिराशपूर्वकं अवयविनः सिद्धिः प्रदर्श्यताम्।

उत्तरम्—द्व्यणुकादि ब्रह्माण्डपर्यन्तं पृथ्वी अवयवी। परमाणुरूपा पृथ्वी अवयवस्वरूपा इति अवयवावयविभेदेन पृथ्वी द्विविधा।

तत्र बौद्धास्तु अवयवसमूहरूप एव अवयवी। परमाणुसमूह एव घटः इति अवयवावयवीभेदं न तात्त्विकमिति स्वीकुर्वन्ति। एवं विविधतन्तूनां समू एव पटः। अत एव अवयवीनाम्नः पृथक् पदार्थस्य कल्पनैव निरर्थका गौर दोषावहा च।

सांख्यास्तु अवयवानां परिणामरूपेण अवयवीपदार्थं कल्पयन्ति तथा कारणकार्ययोः अभेदव्याख्यया अवयविनं पृथक् पदार्थं न स्वीकुर्वन्ति। अ पटस्तु तन्तुपरिणामत्वात् तन्तुभ्यो न पृथक् रूपेण न किञ्चिद् वस्तुः। वस्तु तन्तुः अव्यक्त पट एव, पटश्च तन्तुषु अव्यक्तरूपेण तिष्ठति एवं सति तन्तुवा कर्म तु अव्यक्तपटस्य अभिव्यक्तये न तु नवीनपदार्थविरचने क्षमः। एवं अवय भूतस्य तन्तुपदार्थस्य पटरूपकार्यान्न कश्चिद्भेदः इति।

नैयायिकास्तु तन्न स्वीकुर्वन्ति न्यायवैशेषिकसिद्धान्तानुसारं तु तन्तवः हि पटरूपेण परिणामं गच्छन्ति। तन्तवस्तु स्वरूपमेव (तन्तुरूपमेव) अर्थ यन्ते। एवं सति तन्तुषु पटः असदेव। एवं सति नैयायिकाः सांख्यशास्त्री सत्कार्यवादस्थाने आरम्भवादमसत्कार्यवादं वा स्वीकुर्वन्ति। अत एव तन्मत नुसारं अवयवी घटपटादयस्तु अवयवभूतेभ्यः परमाणुभ्यो भिन्न एव।

बौद्धानां स्वलक्षणवादन्तु ब्रह्माण्डं यावत् पदार्थानां पृथक् पृथक् स्वलक्ष कल्पनया कल्पनागौरवदोषम् आवहति! बौद्धाः परमाणूनां सूक्ष्मत्वात् तत्सम भूतानां घटपटादीनां प्रत्यक्षे समूहमेव कारणत्वेन कल्पयन्ति।

नैयायिका बौद्धमतं तथा न स्वीकुर्वन्ति परणाणुनां सूक्ष्मत्वात् तत्सम रूपस्य घटादिपदार्थजातस्यापि अप्रत्यक्षत्वमेव सिद्ध्यति। प्रत्यक्षायोग्यानां स प्रत्यक्षायोग्यत्वमेव सम्भवति न तु प्रत्यक्षत्वम्। यथा वायौ उत्पततां पर कणानां समूह अपि प्रत्यक्षायोग्यमेव भवति। यथा वा चाक्षुष प्रत्यक्षाभाव वायुपरमाणूनां समूहे सत्यपि वायौ न चाक्षुपप्रत्यक्षम्। अत एव अवय पदार्थाद् भिन्नं अव्रयविपदार्थं स्वीकर्तव्यम्।

तथा च प्रत्यक्षायोग्यं किञ्चिद्वस्तु प्रत्यक्षयोग्यस्य न समवायिकार प्राप्तुं शक्नोति। दृश्यत्वादृश्यत्वं वस्तुनः न प्राकृतिकं गुणः। तत्तु मह लघुत्वजन्यमेव इति दिक्।

यत्तु सांख्याः सत्कार्यवादं गृह्णन्ति तदपि न युक्तम् । तन्तुषु अव्यक्तपटस्थितेः प्रमाणाभावात् अत एव अवयवी नाम किञ्चित् पृथगेव वस्तु ।

(३८) प्रश्नः—परमाणुसिद्धौ किं मानमिति सविस्तरं व्याख्याय तस्य नित्यत्वं साधयत ।

उत्तरम्—पृथिव्यादयः अवयविनः, अवयवजन्यत्वात् घटवत् । अस्यार्थः पृथ्वी-मेरुघटपटसर्षपादयः सर्वे एव अवयवेभ्यः उत्पन्नाः भवन्ति । तथा च तेषामवयवा अपि अवयवजन्या पृथ्वीत्वात् चाक्षुषत्वात् वा । एवं अवयवधारा प्रवाहिता स्यादिति । अस्या अवयवधारायाः क्वचिद्विश्रान्तिः स्याद् अन्यथा मेरुसर्षपयोः समानपरिमाणत्वप्रसङ्गः । परिमाणस्तु अवयवजन्य एव । यस्मिन् पदार्थे यावन्मात्राणि परमाणवः भवन्ति तत्र तावन्मात्र एव परिमाणः इति सिद्धान्तः । एवं यावन्मात्राणि परमाणवः मेरौ भवन्ति न तावन्मात्राणि सर्षपादौ इति विवेकः ।

तथा चोक्तम् ग्रन्थकारैः—तेषां चावयवावयविधारायाः अनन्तत्वे मेरुसर्षपयोः अपि साम्यप्रसङ्गः । अतः क्वचिद्विश्रामो वाच्यः । इति ।

अत्र परमाणुः अन्त्यावयवः । अवयवधारायाः विश्रान्तभाग एव परमाणुः अथवा सूक्ष्मतमोऽवयवः परमाणुः । ततः सूक्ष्मं न किञ्चिद् भवतीति विवेकः । परमाणोः लक्षणन्तु 'मनोभिन्नत्वे सति परमाणुपरिमाणवान् परमाणुः' ।

अन्त्यावयवस्तु परमाणु एव, अन्त्यावयवी द्व्यणुकः । परमाणुस्तु नित्यः अन्त्य-अवयवत्वात् । यदि परमाणुः अनित्यः स्यात्तदा असमवेतभावकार्योत्पत्ति-प्रसङ्गः स्यात् । असमवेतञ्च तद्भावकार्यञ्च इति कर्मधारयः । परन्तु भावकार्यन्तु स्वावयवेषु समवायसम्बन्धेन जायते । यथा घटपटादीनि भावकार्याणि स्वावयवेषु कपालतन्त्वादिषु समवायसम्बन्धेनोत्पद्यन्ते । तदेव समवेतभावकार्योत्पत्ति-रित्युच्यते । एवञ्चावयवधारायाः विश्रान्तिस्थानमेव अन्त्यावयमिति । अन्त्यावयवत्वात् तदसमवेतम् । ननु तस्याप्यवयवित्वं कथं न इति चेद् भावकार्यत्वसम्भवात् इति भावकार्ये सति पुनः अनवस्थाप्रसङ्गः ।

न च परमाणोरनित्यत्वम्, अनित्यत्वे तु जन्यत्वम् तेन च भावकार्यत्वमिति पुनः अनवस्थापातदोषस्य सम्भावना स्यात् । तथा चावयवधारायाः विश्रान्तिः न सम्भवेदिति कारणात् परमाणोः नित्यत्वं असमवेतत्वं मूलकारणत्वं च कल्प्यते । महत्परिमाणस्य व्योम्नि यथा विश्रान्तिः तथैवात्र परमाणौ एव विश्रान्तिः स्यात् इति दिक् ।

ननु त्रिसरेणौ कथं न विश्रान्तिः इति चेत् उच्यते—त्रिसरेणो चाक्षु प्रत्यक्षत्वात् तस्य भावकार्यत्वम् जन्यत्वं वा सम्भाव्यते। यद्यत् प्रत्यक्षविषय तत्तत् अनित्यम् जन्यं वा।

न वा द्व्यणुकेष्वेव विश्रान्तिः महदारम्भकत्वात् तस्य सावयव सिद्ध्यति। द्व्यणुकः अवयवजन्यः महदारम्भकत्वात् कपालवत् इत्यानुमा द्व्यणुकमपि न अन्त्य अवयवः इति दिक्।

(३९) प्रश्नः—पार्थिवं शरीरं किम्? किन्नामशरीरत्वम्? कथ नृसिंहशरीरे तल्लक्षणसमन्वयः?

उत्तरम्—'चेष्टाश्रयत्वं शरीरत्वम्' अथवा 'भोगायतनमन्त्यावयवि शरीरम् सुख दुःखान्यतरसाक्षात्करो भोगः। स च यदवच्छिन्न आत्मनि जायते तद्भो यतनम्। तदेव शरीरम्। चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रिया न स्पन्दनमात्रम्।

'योनिजादिर्भवेद् देहम्' इति श्रीविश्वनाथतर्कपञ्चाननमतेन पार्थिवं शरी द्विविधं योनिजमयोनिजञ्च। योनिजं द्विविधं जरायुजमण्डजञ्च। अयोनि द्विविधं स्वेदजमुद्भिज्जं च। तत्र जरायुजं देहम्—मनुष्यपश्वादीनाम्, अण्डज पक्ष्यादीनाम्। स्वेदजं यूकामशकादीनाम् उद्भिज्जं देहवृक्षलतागुल्मादीन मिति विवेकः।

शरीरत्वन्तु न जातिः पृथ्वीत्वादिना सङ्कर्यात्। सङ्करो नाम जातिबाध दोष अत्र बाधकम्। तस्य लक्षणन्तु—परस्परात्यन्ताभावसमानाधिकरणयो कत्र समावेशः सङ्करः। शरीरत्व-पृथिवीत्वस्यैकाधिकरणे शरीरे अधिकरणत्वा शरीरत्वं न जातिः।

वृक्षलतागुल्मादिषु यद् वायुवशाच्चलनम् न तद् शरीरत्वसाधकम्। आध्या त्मिकवायुसम्बन्धस्य प्रमाणात् तत्र शरीरत्वम् भग्नक्षतसंरोहणादिकन्त्व आध्यात्मिकवायु सम्बन्धे अनुमानसाधकम् कल्प्यते। हस्तपादादीनां चेष्टाश्रय सत्यपि न तत्र शरीरत्वम् उद्देश्यविरहात्। उद्देश्यन्तु अन्तःकरण-विका परिणामः। अथवा हस्तपादादीनाम् अन्त्यावयवित्वविरहात् न शरीरत्वम्।

न च शरीराणां पार्थिवत्वे किं मानमिति वाच्यम्। गन्धस्यैव प्रामाण्यात् यत्र तु गन्धस्याव्यक्तत्वम् तत्रापि अनुद्भूतगन्धस्यैव कल्पना सम्भाव्यते क्लेदोदिष्वपि गन्धः शरीरस्था एव। जलीयजीवानामपि शरीरं पार्थिवं जलन्तु तेषामधिकरणम् भोगः वा।

नृसिंहशरीरे कथं लक्षणसमन्वय इत्यपि न वाच्यम् चेष्टाश्रयत्वात्, भोगायतनत्वात् च। न वा देवत्वजातिवशात् तैजसं शरीरमिति कल्पनीयम्, मनुष्यवत् कर्मकर्तृत्वात्। प्रतिकल्प-अवतारात् नृसिंहत्वस्य सर्वत्रव्याप्तिः तेन च नृसिंहत्वव्याप्यजातिमत्त्वं नृसिंहत्वम्। भोगायतनान्त्यावयवित्वात्, चेष्टाश्रयत्वाच्च शरीरकल्पना सम्भवात्।

(४०) प्रश्नः—घ्राणेन्द्रियस्य पार्थिवत्वं साधयत।

उत्तरम्—ज्ञानेन्द्रियाणि पञ्च—चक्षु-श्रोत्र-घ्राण-रसना-त्वक्-भेदात्। तेषां विषयाण्यपि पञ्च—रूप-शब्द-गन्ध-रस-स्पर्शाख्यानि क्रमशो ग्राह्यानि। तत्र—यदिन्द्रियं रूपादिषु मध्ये यं गुणं गृह्णाति तादिन्द्रियं तद्गुणयुक्तम्।

घ्राणेन्द्रियन्तु—"गन्धसमानाधिकरणद्रव्यत्वसाक्षाद् व्याप्यजातिमेवेन्द्रियं पार्थिवेन्द्रियम्" इति। यथा—रूपशब्दादीन् विषयान् क्रमशः चक्षुश्रोत्रादयः गृह्णन्ति। तत्रानुमानम्—'घ्राणेन्द्रियं गन्धवत् गन्धग्राहकेन्द्रियत्वात्, चक्षुरादिवत्'। अथ च 'घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमादिव्याप्तद्गन्धव्यञ्जकगोघृतवत्' अथवा वायूपनीतसुरभिपार्थिवभागग्राहकत्वात्। यद् यद् गन्धाभिव्यञ्जकं तत्तत् पार्थिवम्। इति घ्राणेन्द्रियस्य पार्थिवत्वं सिद्धम्।

अथवा—कस्तूरीकुङ्कुमादीनां वायुवशादुत्पतितं यत् पार्थिवभागम् तद् रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकम्। अत एव सुरभिभागस्य पार्थिवत्वं तत्पार्थिवभागस्य घ्राणेन्द्रियेणैवाभिव्यञ्जकत्वात् घ्राणेन्द्रियस्य पार्थिवत्वम् सिद्धम्।

ननु गन्धस्य मनसा सह घ्राणेन्द्रियेण ग्राह्यत्वमिति मनसोऽपि पार्थिवत्वम् स्यादिति चेत् न, साक्षात् सम्बन्धाभावात्। मनसो गन्धेन सह न साक्षात्सम्बन्धः। अत एव मनसि नातिव्याप्तिः कथनीया। तथा च मनः गन्धस्यैव रूपादीनामपि ग्राहकः अत एव तत्र घ्राणेन्द्रियलक्षणं न व्याप्नोति।

कुङ्कुमादिव्याप्तगन्धव्यञ्जकगोघृतवदिति। अस्यार्थः—कुङ्कुममिश्रितगोघृतस्तु कुङ्कुमादीनां केवलं गन्धमेव व्यञ्जयति न तु रूपरसादीनपि। तथा च गोघृतं स्वस्य रूपरसादीन् व्यञ्जयति इति। अस्यार्थः—गोघृतमत्र स्वस्य रूपादीनां परस्य गन्धस्याभिव्यञ्जकः। तदेवोक्तम्—'न च दृष्टान्ते स्वरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम् परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्।' इति।

ननु एवं नवशरावादिषु गन्धस्याभिव्यञ्जकत्वं तावदेव सम्भवति यावत् कालपर्यन्तं तत्र जलसिञ्चनं क्रियते इति जलमपि गन्धस्याभिव्यञ्जकम्। अत एव पार्थिवत्वसाध्याभावाधिकरणरूपे जले गन्धेतरविषयकज्ञानाजनकत्वे सति गन्धविषयकज्ञानजन्यत्वात् व्यभिचारः सम्भवेत् इति चेत् ?

न। नवशरावादिष्वभिसिक्तं जलन्तु न केवलं गन्धस्यैवाभिव्यञ्जक अपितु सक्तु-चायादीनां रसस्यापि अभिव्यञ्जकत्वात् न तु जले व्यभिचारः। इति सर्वमुपपन्नम्।

(४१) **प्रश्नः**—जलानां स्वरूपं निरूप्य जलत्वजातिः साधयत।

उत्तरम्—'रूप-रस-स्पर्शवत्य आपो द्रवाः स्निग्धाः' इति वैशेषिकसूत्रकारः। 'अप्त्वसामान्ययुक्ता आपः' इति केशवमिश्रः। तेषान्तु शरीरेन्द्रियविषयभेदात् त्रैविध्यम्।

जलीयं शरीरन्तु अयोनिजं वरुणलोकाधिष्ठितम्। जलीयेन्द्रियं रसना जलीयं विषयन्तु नदीसमुद्रकूपतडागादिः। तदिदं जलं द्विविधं नित्यमनित्यञ्च। नित्यं परमाणुरूपम् अनित्यं कार्यरूपम्। तदुक्तं—

नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।
इन्द्रियं रसनं सिन्धु हिमादिर्विषयो मतः॥ इति।

अप्सु रूप-रस-स्नेह-स्पर्शाः विशेषगुणाः। संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-गुरुत्व-द्रवत्व-संस्काराः सामान्यगुणाः। रूपं शुक्लं, रसः मधुरः, स्पर्शं शीतः। अथवा अभास्वरशुक्लमात्ररूपवत्त्वम्, शीतमात्रस्पर्शवत्त्वम्, स्नेहवत्त्वम्, सांसिद्धिकद्रवत्ववत्त्वम् अप्त्वम् इति।

जलत्वजातेः सिद्धिस्तु अनुमानगम्या एव। तदनुमानं यथा 'जन्यजलनिष्ठा या स्नेह समवायि कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् पटनिष्ठ-कार्यतानिरूपिततन्तुनिष्ठसमवायिकारणतावत्।" यत्र यत्र कारणता तत्र तत्र किञ्चिद्धर्मावच्छिन्नत्वम्। निरवच्छिन्नाया कारणताया असम्भवात्। जलनिष्ठ-कारणताया अवच्छिन्ना तु जलनिष्ठजलत्वजातिरेव। तदतिरिक्तस्य कस्यचिदप्य-सम्भवात्. 'अन्यूनानतिरिक्तस्या एव वृत्तेः धर्मस्य अवच्छेदकत्वसम्भवात्'। एवं स्नेहगुणस्य समवायिकरणता तु अप्सु मात्रे सम्भाव्यते। एवं जातिबाधकाभाव-सहकृते नानुमानेन जलत्वजातिसिद्धिरिति।

सत्यपि जन्यजलत्वे सत्ता-द्रव्यत्वजातयोः किं न तावेव कारणताया अवच्छेदकानीति न वक्तव्यम्, तयोः अप्सु मात्रेष्वेव व्याप्यत्वाभावात्।

अथवा समवायसम्बन्धावच्छिन्नजन्यस्नेहत्वावच्छिन्न-जन्यस्नेहनिष्ठजन्यता-निरूपिता तादात्म्यसम्बन्धावच्छिन्ना या जलनिष्ठा समवायिकारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् पटनिष्ठकार्यतानिरूपिततन्तुगतकारण-तावत् । इत्यपि अनुमानप्रकारः स्यात् ।

(४२) प्रश्नः—वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥

इति कारिका व्याख्येया ।

उत्तरम्—'अप्त्वसामान्ययुक्ता आपः' इति जलस्य सामान्यं लक्षणमुक्तम् । तथा च वैशेषिकसूत्रकारः—'रूपरस-स्पर्शयुक्ता आपो द्रवाः स्निग्धाः' इति ।

जन्यस्नेहगुणसमवायिकारणतावच्छेदकतया तु जलत्वजातेः सिद्धिः सा च जातिबाधकदोषाभावसहकृतमिति प्रमाणपदवीं याति ।

अप्सु शुक्लं रूपम् । शुक्लन्तु द्विविधम्—अभास्वरं भास्वरं च । भास्वरन्तु तेजसि अभास्वरं पृथ्वीजलादिषु । पृथ्व्यादिषु स्फटिकादौ अपि शुक्लत्वमेव अत एव अभास्वर शुक्लत्वं न पृथ्वीजलानां लक्षणम् । अथवा शुक्लरूपस्य जाति-वत्वे सति तदेव लक्षणतां याति । तद्यथा—अभास्वरशुक्लतररूपा समानाधि-करणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं जलत्वम् । तेन स्फटिकादौ नातिव्याप्तिः ।

अथवा पृथ्वीतेजोभिन्नत्वे सति अभास्वरशुक्लवर्णत्वम् जलत्वम् ।

ननु कालिन्दी जलादौ नीलत्वं सत्यपि कथं शुक्लवर्णत्वमुक्तमिति चेत्, न । कालिन्द्या जले यन्नीलत्वं तत्तु तद्गत पृथ्वीवशादेवेति दिक् ।

जलस्य रसस्तु मधुर एव, स्पर्शस्तु शीत इति कारिकायां स्पष्टम् । अस्यार्थः तद्भिन्नरसस्पर्शयोः निराशः । रसस्पर्शयोः जलेन सम्बन्धस्तु समवाय एव । तद्भिन्नौ यद् रसस्पर्शौ तत्तु पृथिव्याः तेजसो वा संयोगादेव । अनेन जाति-घटितलक्षणस्यापि प्राप्तिः । यथा—मधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वे सति पृथ्वीभिन्नत्वम् जलत्वमिति । कटुकशायादौ यद्रसं शीतभिन्नं यद् स्पर्शं जले प्राप्यते तदपि पृथ्वीतेजःसंयोगवशादेव । अत एव शर्करामिश्रनारिकेर जलादौ यत् भिन्नरसत्वं तदौपाधिकम् एव ।

स्नेहस्तु सामान्यतः अप्सु सर्वत्रैव दृश्यते विशेषतः घृतादौ यत्स्नेह तदपि तद्गत जलस्यैवेति दिक् ।

सांसिद्धिक द्रवत्वे जातिविशेषः प्रत्यक्षसिद्धः। तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः। तैलादौ जलस्य द्रवत्वं स्नेहाधिक्येन तु दहनानुकूल्यम्।

(४३) प्रश्नः—तेजसः किं लक्षणम् तस्य स्पर्शरूपादीन्निरूप्य भेदान् प्रदर्शयत।

उत्तरम्—'उष्णस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत् तेजः' अथवा—'द्रव्यत्वे सति ऊष्ण स्पर्शवत्त्वं तेजस्त्वम्'। ऊष्णस्पर्शस्तु समवायसम्बन्धेन वह्निसूर्यादिषु तिष्ठते। तेजस्त्वं जातिरपि समवायसम्बन्धेन तेजस एव।

समवायसम्बन्धेन उष्णस्पर्शवत्त्वम् तेजस्त्वम्। उष्णत्वस्य प्रत्यक्षन्तु त्वगिन्द्रियबोध्यमेव। येनेन्द्रियेण यद् गृह्यते तेनैव तन्निष्ठा जातिरपीति नियमेन तेजस्त्वप्रत्यक्षमपि नेत्रेन्द्रियेणैव। एवं प्रत्यक्षप्रमाणेनापि तेजस्त्वजातेः सिद्धिः। तदुष्णस्पर्शस्तु जन्य एव। जन्य तेजस्त्वसिद्धौ तु अनुमानमपि प्रमाणं समवायसम्बन्धावच्छिन्न जन्योष्णस्पर्शत्वावच्छिन्न-जन्योष्णस्पर्शनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नजन्यतेजोनिष्ठा या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्। इति तेजस्त्वसिद्धिः। परमाणुवृत्तितेजस्त्वसिद्धिस्तु परमाणूनां अखिलतेजस्त्वकारणत्वात् स्वयमेव सिद्धिः। नित्यपरमाणुषु ऊष्णस्पर्शत्वं नित्यम्, अनित्य द्व्यणुकादिषु अनित्यत्वमेव इति स्पष्टमेव। चन्द्रकिरणादौ—यत् शीतस्पर्शं तदपि तेजोजन्यमेव स्वीक्रियते। तत्र कथं उष्णस्पर्शत्वमिति चेत् उच्यते। तत्र तेजस उष्णत्वन्तु अनुद्भूतम्।

तेजसि रूपस्तु अभास्वरशुक्लम्। यत्र शुक्लत्व न दृश्यते, तत्र तदनुद्भूतमेवेति दिक्। यत्तु वह्नेः पीतरक्त स्फुलिङ्गा अथवा अभाश्वरशुक्ल भिन्न वह्नेः रूपं दृश्यते तदपि औपाधिकमेव। तत्र पार्थिवरूपेणाभिभूतं तैजसरूपं ग्राह्यम्। तैजसवर्णाभिभवात् तेजसोऽपि अभिभवः स्यादिति न वक्तव्यम्, तेजसः विशेषगुणस्य रूपस्य अभिभवः सत्यपि पार्थिवरूपेऽपि तेजसः प्राप्तेरिति भावः। यथा पीलिमारोगग्रस्तः शङ्खे यत् पीतत्वम् पश्यति तत्पीतन्तु औपाधिकमेव तथैवात्रापि अवगन्तव्यम्। अर्थात् अन्यदीय रूपेणापि धर्मिणो ग्रहणसम्भवात्।

अग्नौ द्रवत्वन्तु नैमित्तिकमेव। तन्नैमित्तिक द्रवत्वन्तु स्वर्णे एव दृश्यते। अत एव यन्नैमित्तिकद्रवत्वमुक्तं तदव्याप्तमेवेति चेत्, न। पृथ्व्यवृत्तिनैमित्तिकद्रवत्ववदवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वस्य विवक्षितात्। अस्यार्थः

'नैमित्तिकद्रवत्व'शब्दस्यात्रार्थः 'पृथिव्यवृत्ति नैमित्तिकमत् द्रव्यत्वसाक्षाद् व्याप्य-जातिमत्वम्' इति ।

तेजस्तु द्विविधं नित्यानित्यभेदात् । नित्यन्तु परमाणुरूपम् अनित्यन्तु कार्यरूपमिति भेदः । अनित्य तेज अपि चतुर्विधम्--(१) उद्भूतरूपस्पर्शः, (२) अनुद्भूतरूपस्पर्शः, (३) अनुद्भूतरूपमुद्भूतस्पर्शम् (४) उद्भूतरूप-मनुद्भूतस्पर्शञ्चेति ।

तत्र--(१) उद्भूतरूपस्पर्शम् यथा—सूर्यवह्नि इत्यादयः ।

(२) अनुद्भूतरूपस्पर्शम् यथा—चक्षुरिन्द्रियम् ।

(३) अनुद्भूतरूपमुद्भूतस्पर्शम्, यथा—तप्तवारिस्थं तेजः ।

(४) उद्भूतरूपमनुद्भूतस्पर्शम्, यथा—प्रदीपप्रभामण्डलम् ।

(४४) प्रश्नः—स्वर्णस्य तैजस्त्वे किम्प्रमाणमिति स्फुटं प्रतिपाद्यताम् ।

उत्तरम्—तेजस्तु 'उष्णस्पर्शसमानाधिकरणद्रव्यत्वव्याप्य जातिमत्' इति तेजोलक्षणं निरूपितम् । अथवा 'उष्णस्पर्शवत्त्वे सति द्रव्यत्वम् तेजस्त्वम्' इति । तत्तेजः स्वरूपेण चतुर्विधः—उद्भूतरूपस्पर्शः, अनुद्भूतरूपस्पर्शः, उद्-भूतरूपानुद्भूतस्पर्शः अनुद्भूतरूपमुद्भूतस्पर्शश्च । तत्र च नैयायिका स्वर्णं तेजः-स्वरूपमिति स्वीकुर्वन्ति । न इति केचित् अनुष्णाशीतस्पर्शं स्पर्शवत्त्वात् । तन्न युक्तम्—चन्द्रमरीचिषु शीतस्पर्शं, चक्षुरिन्द्रिये च अनुष्णाशीतस्पर्शं सत्यपि तत्र तेजस्त्वस्वीकारात् ।

तत्र स्वर्णस्य तेजस्त्वे किं मानमिति चेत्—उच्यते । अनुमानमेवात्र प्रमाणम् । तत्तु यथा—स्वर्णं तैजसम्, असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यनुच्छिद्य-मानजन्यद्रवत्वात् । यन्नैवं तन्नैवं, यथा—पृथ्वीति । न च अप्रयोजकं पृथ्वी-द्रवस्य जन्यजलत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात् । इति बलवान् अनुमान-प्रमाणत्वात् स्वर्णस्य तेजस्त्वम् सिद्धम् ।

तत्र चतुर्विधतेजःस्वरूपेषु स्वर्णस्य कुत्रान्तर्भाव इति चेत्, उच्यते—उद्भूत-रूपस्पर्शेषु द्रव्येषु तेजस अन्तर्भावः तथाप्यत्र सूर्यवह्निवन्न तेजस तथा रूपं प्रत्यक्षगम्यमिति चेत् अभिभवादिति । पार्थिवांशेन पृथिव्या तेज अंशस्याभिभवः भवति तेन उष्णस्पर्शस्य शुक्लरूपस्य चाभिभवः स्यात् । अत एव तेजस उद्भूताभिमतरूपस्पर्शवत्त्वं अप्रतिबन्धकमेव ।

ननु उद्भूतरूपस्पर्शवत्त्वे सति अन्धकारे तस्य चाक्षुषं प्रत्यक्षं स्यादिति च-न वक्तव्यम्। अभिभूतरूपस्पर्शवत्त्वात् तेजस-चाक्षुषप्रत्यक्षासम्भवादिति। यथा अरूपानां पदार्थानां चाक्षुषप्रत्यक्षासम्भवः तथैवाभिभूतरूपानामपि पदार्थानां प्रत्यक्षासम्भवः इति स्पष्टमेव। स्वर्णस्य यत्तैजसं रूपं तस्य पार्थिवांशकृतपीतरूपेणाभिभवः स्यादिति वक्तव्यम्।

केचिदन्ये स्वर्णस्य तैजसत्वम् अन्यविधिना साधयन्ति। यथा पार्थिवरूपाणामग्निसंयोगेन परिवर्तनं दृश्यते। यथा घटः अग्निसंयोगेन स्वकृष्णरूपं त्यक्त्वा रक्तरूपं भवति। तथा स्वर्णे वर्तमानं पीतिमाया आश्रयं पृथ्वीपदार्थं अत्यन्ताग्निसंयोगेऽपि न स्ववर्णं त्यजति इति तस्य पृथ्वीभिन्नत्वं स्पष्टमेव। तदत्र अनुमानंप्रक्रिया—'अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात् जलमध्यस्थपीतपटवत्।' अस्यार्थः अत्यन्ताग्निसंयोगी यः पीतिमाया गुरुत्वस्य चाश्रयः पार्थिवभागः सः विजातीयरूपस्य प्रतिबन्धकः द्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपस्य यद्विजातीयनीलादिरूपं तस्य अनधिकरणत्वात्। यथा जलस्थः पीतपटः।

एवं स्वर्णस्य पृथ्वित्वं निरस्य तैजसरूपत्वे तस्य नियमात् स्वर्णस्य तेजस्त्वं स्पष्टमेव।

(४५) प्रश्नः—न्यायसिद्धान्तमुक्तावल्यनुसारं वायुं निरूपयत।

उत्तरम्—'वायुत्वाभिसम्बन्धवान् वायुः इति वायोः लक्षणम्। अथवा स्पार्शप्रत्यक्षविषयद्रव्यत्वे सति तिर्यग्गमनवान् वायुः। इति। तत्तु त्वगिन्द्रियप्राणवातादिप्रभेदः। विशेषगुणः स्पर्शः, सामान्यगुणा-संख्या-परिमाण-पृथक्त्व-संयोग-विभागपरात्वापरत्व-वेगाः। स्पर्शाद्यनुमेयश्च।

वायुः द्विविधः नित्यः अनित्यश्च। नित्यः परमाणुरूपः अनित्यः कार्यरूपः। अनित्योऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् वायवीयं शरीरम् अयोनिजं पिशाचादीनाम् इन्द्रियं त्वक् देहव्यापीति, विषयञ्च प्राणादिरिति।

स तु चाक्षुषप्रत्यक्षायोग्यः त्वाचप्रत्यक्षविषयः सन्नपि, विजातीयस्पर्शेन, विलक्षणशब्देन, तृणादीनामुत्पतनेन, शाखादीनां कम्पनेन अनुमेयः। वस्तुतो अनुमानविषयस्तु वायो गतिरेव। तदपि नित्याभ्यासवशात् प्रत्यक्ष इव प्रतीयते।

वायोः पृथ्वीजलादावपि व्याप्तिः, जलादौ वायोः सत्त्वात् जलीयप्राणिनाम् मत्स्यादीनां जीवनसम्भवः तथैव भूगर्भस्थिता जन्तवः पृथ्वीस्थप्राणवायोः सत्त्वात् जीवन्तीति ।

यद्यपि अनित्यो वायुः शरीरेन्द्रियविषयभेदात् त्रिविधः उच्यते तथापि चतुर्थस्य प्राणवायोः सत्त्वात् तन्मूलतः चतुर्विधः एव प्राणवायुरपि शरीरे स्वक्रियावशात् पञ्चविधः सन् प्राणापानव्यानसमानोदानेति पञ्चविधत्वं भजते । तानेव केचन नागकूर्मकृकलदेवदत्तधनञ्जय भेदात् पञ्चविधान् मन्यन्ते । इति प्राणवायोः समासेन भेदाः ।

(४६) **प्रश्नः**—आकाशस्य सत्त्वे प्रमाणं निर्दिश्य तत्र विशेषान् निरूपयत ।

उत्तरम्—शब्दगुणकम् आकाशम् । अथवा शब्दसमवायिकारणम् आकाशम् । समवायिकारणत्वात् तस्य द्रव्यत्वं सिद्धमेव ।

आकाशत्वं तु न जातिः आकाशस्य एकत्वात् । एकवस्तुनि तु न जातिः एवं दिक्कालयोरपि न जातिः तयोः एकैकत्वात् । अत्र तु शब्दाश्रयत्वम् आकाशत्वम् । तत्र शब्द इति विशेषगुणः संख्यापरिमाण पृथक्त्व-संयोगविभागाः सामान्यगुणाः । तेष्वपि संख्यापरिमाणपृथक्त्वानि नित्यानि शेषाण्यनित्यानि ।

ननु आकाश अस्तीत्यत्र किं प्रमाणम् ? न च आकाशस्य चाक्षुषः प्रत्यक्षः; न वा मानसी अनुभूतिः । तर्हि कथमाकाश आकाश इति जोघुष्यते इति चेत् ।

अनुमानमत्र प्रमाणम् । तत्तु शेषवत् । तद्यथा—शब्दः विशेषगुणः सामान्यवत्त्वे सति अस्मादादि बाह्यैकेन्द्रियग्राह्यत्वात् रूपादिवत् । इति शब्दस्य विशेषगुणत्वं सिद्धम् । विशेषगुणस्यापि गुणिन आकांक्षितत्वं विशेषगुणत्वात् रूपादिवत् । पृथ्व्यादयस्तु न शब्दस्याश्रया अत एव तत्परिशिष्टं आकाश एव शब्दगुणकमिति अनुमानप्रक्रिया ।

अस्यार्थः शब्दः विशेषगुणः, चक्षुः ग्रहणायोग्यत्वे सति बाह्यकरणग्राह्यत्वात् स्पर्शवत् । अत्र घटपटादावतिव्याप्तिनिरसनाय चक्षुग्रहणायोग्यत्वम् । इति प्रथमः ।

शब्द कुत्रचित् द्रव्ये समवायसम्बन्धेन तिष्ठति विशेषगुणत्वात् रूपवद् । इति द्वितीयः ।

शब्दः पृथिव्यादिषु समवायसम्बन्धेन न तिष्ठति पृथिव्यादीनां समवायसम्बन्धेन गन्धादिविशेषगुणाश्रयत्वात्। अत एव पृथिव्यादिव्यतिरिक्तद्रव्याश्रयत्वं सिद्ध्यति तदेव आकाश इति।

तदयम् आकाशाभिधं द्रव्यं पृथ्व्यादिवन्न नित्यानित्यभेदाद्द्विविधम्। आकाशस्य नित्यत्वात्। तथा च आकाश विभुरपि। परममहत्परिमाणत्वात्। आकाश एक एव मेघाद्याच्छन्नत्वात् औपाधिक दिगादिभेदवशाद् वा यदस्य विभाग इव व्यवह्रियते तदपि अयुक्तमेव अथवा औपाधिकं भेदं तद्दृश्यते न तु वास्तविकम् इति दिक्।

(४७) प्रश्नः—कालस्य सत्त्वे किं प्रमाणमिति पं० विश्वनाथतर्कपञ्चाननभट्टाचार्यदिशा दर्शयत।

उत्तरम्—'जन्यानानां जनकः कालो जगतामाश्रयो यतः।' इति कारिकावल्यां पं० विश्वनाथतर्कपञ्चानभट्टाचार्यपादैरुक्तम्। उत्पन्नपदार्थानां उत्पादक कालः 'कलनात् सर्वभूतानां स कालः परिकीर्तितः।' इति। समस्तजन्यपदार्थानां कलनात् स काल इति कथ्यते। अथवा 'कार्यत्वावच्छिन्नम्प्रति कालिकसम्बन्धावच्छेदेन निमित्तकारणत्वं कालत्वम्।' अर्थात् 'कालिकसम्बन्धावच्छिन्नकार्यतावच्छिन्ना या कार्यता तान्निरूपिता या तादात्म्यसम्बन्धावच्छिन्नाधिकरणता, तादृशाधिकरणतया निमित्तकारणत्वम् कालत्वम्'। इति। तथा च वैशेषिकसूत्रे 'नित्येष्वभावादनित्येषु भावाद् कारणे कालस्ये'ति। तथा च कालस्य लक्षणं—'अतीतादिव्यवहारहेतुः कालः' इत्यन्नंभट्टः। अथवा—'विभुत्वे सति दिगसमवेतपरत्वासमवायिकारणाधिकरणं कालः।' 'परत्वानाश्रयत्वे सति विजातीय परत्वासमवायिकारणसंयोगाश्रयः।' इति वा कालस्य लक्षणं प्राप्यते।

अत्र 'जगतामाश्रय' इति शब्देन कालसिद्धौ अनुमानप्रमाणं प्रदर्शितम्। तद्यथा—इदानीं घटः; इति प्रतीतिः सूर्यपरिस्पन्दरूपगतिक्रिया विषयिका इति लोकव्यवहारदर्शनात् प्रत्यक्षसिद्धा एव। अनेन सूर्यपरिस्पन्द रूप गतिक्रियाया इदानीं काल विद्यमान घटपटादीनां सम्बन्ध अवश्यमेव। तत्सम्बन्धस्तु संयोगादिव्यतिरिक्तः काल एव। तत्परम्परासम्बन्धस्तु स्वाश्रय तपनसंयोगि संयोगः। अत्र स्व शब्देन सूर्यक्रिया रूपोऽर्थग्राह्य। तदाश्रयस्तु तपन (सूर्य) एव तत्संयोगी कालः एव। विषयैः घटादिभिः तु तस्य सम्बन्धः कालिक एव।

अथवा देवदत्तः यज्ञदत्ताज्ज्येष्ठ अथवा यज्ञदत्तः देवदत्तात्कनिष्ठ इति

प्रतीतिः येन कारणेन भवति स कालः। अथवा कालिकपरत्वापरत्वयोः ज्येष्ठ-कनिष्ठयोः निमित्तकारणं काल इति कथ्यते।

एकस्य कालस्य सिद्धो क्षणदिनवर्षादि समयभेदो न स्यादित्यपि न वक्तव्यम् क्षणादीनां तु यत् विभाग तदौपाधिक एव। उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्न विभागो वा।

(४८) प्रश्नः—दिशः-लक्षणं कृत्वा तस्यैकत्वं साधयत।

उत्तरम्—'कालविपरीतपरत्वापरत्वानुमेया दिक्' इति दिक् पदार्थस्य लक्षणं कृतं तर्कभाषाकारैः। अथवा 'अकालत्वे सति अविशेषगुणा महती दिक्' किं वा 'प्राच्यादिव्यवहारहेतुर्दिक्' अथवा 'दूरान्तिकत्वधीहेतुर्दिक्' इति अनेकप्रकारेण दिग्लक्षणं कर्तुं शक्यते। तत्तु एकं नित्यं विभुश्च संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः दिशः सामान्यगुणाः। पूर्वपश्चिमादिदिग्विभाग उपाधिरूपा एव। दिशस्तु संख्या एक एव। यत्पूर्वादिदश-दिक्त्वं व्यवहारसिद्धम्, तदौपाधिकमेव। एकस्थानात् सर्वदिग्व्यवहारं दिशां अनन्तत्वद्योतकम् तदपि कल्पनागौरवदोषमावहति। अतएव दिश एकत्वमुक्तम्।

(४९) प्रश्नः—आत्मनः किं लक्षणमिति सम्यग्विविच्य, आत्मनः अस्तित्वे आत्मत्वजातिसिद्धौ च प्रमाणमुपस्थाप्यताम्।

उत्तरम्—आत्मतत्त्वनिरूपणप्रसङ्गे प्रथमम् आत्मानमुपस्थापयति न्यायसिद्धान्तमुक्तावलीकारः—

'आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्।' इति अस्यार्थः १. इन्द्रियाद्यधिष्ठातृत्वम् आत्मत्वम्। २. आत्मनः सिद्धिः करणानां सकर्तृकत्वात्।

जनकतासम्बन्धेन करणेषु ज्ञानवत्तासम्पादकः, अवच्छेदकतासम्बन्धेन शरीरे ज्ञानवत्तासम्पादको वा आत्मा। अधिष्ठातृत्वम् इत्यस्य समवायेन ज्ञानाधिकरणत्वम् इत्यर्थः।

आत्मा तु द्विविधं जीवात्मा-परमात्मा (ईश्वरात्मा) भेदात्। तत्र किं ज्ञानवत्त्वं नित्यं स्याद् उत वा अनित्यमित्याकाक्षायां जातायाम्, नित्यज्ञानवत्त्वे सति जीवात्मन्यव्याप्तिः, अनित्यज्ञानवत्त्वे सति ईश्वरेऽव्याप्तिः उभयविधज्ञानवत्त्वे सति अप्रसिद्धत्व दोषापत्तिः। अत एव स्वावच्छिन्नाधिकरणत्वसम्बन्धेन ज्ञानवत्त्वम् इति युक्तम्। एवं आत्मत्वजातिमत्त्वम् आत्मनो लक्षणम् इत्यर्थः पर्य-

वसितम्, अत्रापि विप्रतिपत्तिः स्यात्—प्रथमम् आत्मत्वं साधयतामिति। तत्तु वक्ष्यते।

प्रथमं तावत् ज्ञानाधिकरणत्वं इत्यस्य सुखदुःखादीनां समवायिकारणत्व इति वक्ष्यते तत्रापि ईश्वरे सुखाद्यभावात् अव्याप्तिः। ईश्वरे तु अदृष्टरूप-निमित्तकारणाभावात् सुखाद्यभावः। इति विप्रतिपत्तिनिराशायोच्यते। ईश्वरे तु बाह्यकरणानामभावेऽपि नित्यज्ञानवत्त्वम् अत एवात्र नाव्याप्तिप्रसङ्गः। अथवा ईश्वरे तु फलोपधायकतारूपकारणताभावेऽपि स्वरूपोपधायकता रूप-कारणता सम्भवात् सुखाद्युपलब्धिः इति नात्र दोषः।

ननु 'क्षित्यप्तेजोमरुद्व्योमकलादिग्देहिनो मनः' इति यद्द्रव्यनिरूपणप्रसङ्गे उक्तम्, तत्र आत्मनः शरीरीति संज्ञाभिहिता तस्यार्थस्तु जीवात्मा इव तत्र कथं न जीवात्मभिन्नम् ईश्वरतत्त्वं नवद्रव्यातिरिक्तं दशमं द्रव्यं नोच्यते इति। एवं सति आत्मलक्षणे दोषप्रसक्तिरेव न स्यादिति चेत् न। जीवात्मनः ईश्वराद् भिन्नत्वकल्पने प्रमाणाभावात्। प्रसिद्धप्रस्थानव्यतिरेकात् तर्कासहत्त्वाच्च। अत एवोक्तम्—ज्ञानवत्त्वेन विभाजनादित्याहुरिति।

अत्र आत्मत्वेन ज्ञानवत्वमेव गृहीतम् न तु द्रव्यविभाजकमिति। ज्ञानवत्त्वं तु समवायसम्बन्धेनेश्वरेऽपि। अत एव आत्माशब्देन जीवात्मा-परमात्मा-उभयोरेव गृहणं युक्तम्।

एवं आत्मनः स्वरूपं सर्वविप्रतिपत्तिनिराशपूर्वकं प्रतिपादितम्। सम्प्रति आत्मसत्त्वे आत्मत्वजातौ च प्रमाणं दर्शयति।

आत्मसत्त्वे प्रमाणं दर्शयन्नाह ग्रन्थकारः 'करणं हि सकर्तृकम्' इति। चक्षुरादीनि इन्द्रियाणि करणानि तेषामेव सकर्तृकत्वमपेक्षितम्। यथा छिदाकरणस्य परशोः स्वकार्यसम्पादनाय कस्यचिच्चेतनस्य अपेक्षा भवति तथैवेन्द्रियाणां स्वकार्यसम्पादनाय कस्यचिच्चेतनस्यापेक्षा अस्तीति तच्चेतन मेव आत्मेति। तत्र अनुमानप्रक्रिया यथा 'इन्द्रियं सकर्तृकम् फलोपधानात्मककरणत्वघटितकारण-त्वात्, छेदन फलोपधायकवास्यादिवत्'। अथवा 'चक्षुरादीनि इन्द्रियाणि रूपा-द्युपलब्धौ सकर्तृकाणि करणत्वात् छिदादिक्रियासाधकतमकुठारादिवत्' इति। तच्चेतन कर्तृकमेव आत्मा। अस्यार्थः—ज्ञानस्य करणभूतानीन्द्रियाणि येन चेतने-नाधिष्ठितानि तदेवात्मा। यद्यत् करणं तत्तत् चेतनेनाधिष्ठितम्, यथा छिदा-करणं वास्या। यन्न चेतनेनाधिष्ठितं तन्न करणम्। इत्यन्वयव्यतिरेकाभ्याम् आत्मसिद्धिः।

ननु आत्मत्व जातौ किं मानमिति, तदप्युच्यते—'समवायसम्बन्धावच्छिन्न-सुखत्वावच्छिन्नसुखनिष्ठकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नात्मनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, तन्तुनिष्ठकारणतावत्' इति यः किञ्चिद् धर्मः स आत्मत्वम्। इत्यनेन आत्मजन्यप्रतीतिः आत्मत्वेति सर्वमुपपन्नम्।

(५०) प्रश्नः—आत्मविषये चार्वाकमतं प्रदर्श्य न्यायदिशा तं परीक्ष्यताम्।

उत्तरम्—चार्वाकस्तु सम्प्रदायविशेषः। देवगुरुबृहस्पतिप्रणीतं मतमेतत् इति केचिन्मन्यन्ते। चार्वाक नाम्ना विदुषा प्रणीतमिति अन्ये स्वीकुर्वन्ति। इतर दर्शनकारैः अरुन्धती न्यायेन स्वमतस्थापनाय पूर्वपक्षत्वेन मतमेतत् प्रणीतमिति अस्मादृशा। तत्र चार्वाकास्तु प्रत्यक्षवादिनः प्रत्यक्षेतरप्रामाण्यं न स्वीकुर्वन्ति।

आत्मविषये चार्वाकमतं त्रिविधं (१) देहात्मवादः (२) इन्द्रियात्मवादः (३) मन आत्मवादः। कुत्रचिद्देहात्मवादइन्द्रियात्मवादौ समानतन्त्रमेव अत एव द्विविधं चार्वाकमतं प्रदर्शितम्।

शरीरात्मवादिचार्वाकमतचर्चा—तत्र स्थूलात्मवादिनः चार्वाकाः आत्म-विषये—

'किण्वादिभ्यो समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।
अहं स्थूलः कृशोऽस्मीति समानाधिकरण्यतः॥
देहः स्थौल्यादि योगाच्च स एवात्मा न चापरः।'

इति एवं रूपेण स्वमतं स्थापयन्ति।

'स्थूलोऽहं' 'कृशोऽहम्' इति लौकिकप्रतीतिप्रमाणात् अहंपरविषयतया स्थूलशरीरमेव आत्मेति उपपद्यते। क्रियाया कारणभूता इच्छा इच्छाया कारण-भूतं ज्ञानं शरीरे एव अधिष्ठितम्। अत एव शरीर एव आत्मेति। अस्यार्थः समवायेन ज्ञानं प्रति शरीरमेव कारणम्। अत्र तु यद्व्यभिचारं मृतशरीरे चैतन्याभावरूपः दृश्यते तत्तु नैयायिकमतेऽपि तथैव। नैयायिका तु मुक्तात्मनि चैतन्याभावं स्वीकुर्वन्ति। अत एव व्यभिचारं तु चार्वाकमते यथा न्यायमतेऽपि तथैव दृश्यते। यत्तु नैयायिकः 'समवायेन ज्ञानं प्रति शरीरविशिष्टमनःसंयोगा-वच्छिन्नात्मनः कारणत्वम् इति व्यभिचारं निराकुर्वन्ति तत्तथैव चार्वाकमतेऽपि 'समवायेन ज्ञानं प्रति प्राणविशिष्टशरीरं कारणमिति' मृतशरीरे व्यभिचारं निराकर्तुं शक्यते। अस्यार्थः न्यायमते ज्ञानेच्छाधिकरणं चैतन्यम्। मुक्तदशायां

आत्मनि चैतन्याभावं ज्ञानाभावत्वे कारणम्, तथैवास्माकं (चार्वाकानां) मते मृतदशायां शरीरे प्राणाभावः ज्ञानाभावे कारणमस्तीति तत्र न विप्रतिपत्तिः युक्ता इति ।

तदिदं चार्वाकमतसारः—

किण्वादिभ्यः······(इति पूर्वमेवोक्तम्) ।
मम देहोऽयमित्युक्तिः सम्भवेदौपचारिकी ॥
अङ्गनालिङ्गनाजन्यं सुखमेव पुमर्थता ।
कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते ॥
लोकसिद्धो भवेद्राजा परेशो नापरः स्मृतः ।
देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते ॥

× × ×

अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः ।
केनेदं चित्रितं तस्मात् स्वभावात् तद्व्यवस्थितिः ॥
न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः ।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिका ॥

तन्न युक्तमिति नैयायिकाः । शरीरमेवात्मा इति चार्वाकमते शरीराणां प्रतिक्षणं परिवर्तनशीलत्वात् स्मृतेः अप्रसङ्गात् । यच्च शरीरानुभूतसंस्काराणां प्रतिक्षण-अपरशरीरसंसरणम् उच्यते चेत् तदपि न । अनन्तसंस्कारकल्पनात् गौरवास्पदमेव तदिति । यत्तु कल्पनागौरवदोष-निरसनायोक्तम् फलमुखं गौरवं न दोषाय । तथापि स्मृतिज्ञानाय तदयुक्तमेव । य सद्योजातस्य प्रथमस्तन्य-पानप्रवृत्तिः तन्न चार्वाकमतेन सम्भवेदिति । तत्र तु पूर्वजन्मकृतसंस्कार एव कारणत्वं याति । शरीरात्मवादिनां मते तु पूर्वजन्मस्यैवासम्भवात् कथं स्तन्य-पानाय प्रवृत्तिः स्यादिति । नैयायिकानां मते तु आत्मनो नित्यत्वात् पूर्वजन्म-सहकृत संस्कारवशात् स्तन्यपानं मदिष्टसाधनमिति सद्योजातस्य वृत्तेः उपपत्तिः सम्भाव्यते ।

यत्तु चार्वाकमते पूर्वजन्मसहकृतस्मृतिवशात् स्तन्यपान इव सुखदुःख-इच्छा-द्वेषकामादीनामपि स्मृतिः स्यादिति शंका क्रियते तदपि न युक्तम् । संस्काराणा-मुद्बोधका भावात् । स्मृति सत्यपि उद्बोधकाभावात् संस्कारा विस्मृतिपथं यान्ति इति दिक् ।

अत एवोक्तम्—

'तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः।'

इन्द्रियात्मवादिचार्वाकमतविवेकः—काणोऽहं बधिरोऽहं इत्यादिलोकक्तानुभवाद् इन्द्रियाण्येवात्मेति केचिच्चार्वाकाः। अस्यार्थः इन्द्रियव्यतिरिक्तः न कश्चिदात्मपदार्थः। अस्यार्थः करणत्वकर्तृत्वयोः समानाधिकरण्यम्। करणत्वन्तु साधकतमत्वं ज्ञानस्य साधकतमं इन्द्रियमेव करणत्वेन गृह्यते। यदेव करणं तदेव कर्ता छिदाकर्तृपुरुषपरशोः तादात्म्यवत्।

व्यापारवत्वे सति कारणत्वम् करणत्वम् इति करणलक्षणम्। तत्कर्तृकन्तु फलभागि। व्यापारवत्त्व-करणत्व-फलभाक्त्वानां समानाधिकरण्यं युक्तमेव तद्युक्त्या एव प्रत्येकस्य सप्रयोजनप्रवृत्तेः सम्भवाद्। यत्फलभाक् तदेवात्मा। अत एव इन्द्रियाण्येव आत्मा इति व्यवसितम्। चक्षुरादीनि कर्तृणि करणत्वात् इति अनुमानव्यवस्था।

न इति अन्ये कर्तृकरणयोः पृथक्त्वमेव लोकसिद्धम्। तेनैव कर्तृकरणव्यवस्था सम्भवात् परस्परविरुद्धस्वभावाच्च। अन्यथा उभयोः संज्ञयोरेव पृथक्त्वं निरर्थकं स्यादिति।

चार्वाकः तन्निकरोति विरोधे साधकाभावादिति। अस्यार्थः कर्तृकरणयोः पृथक्त्वं न प्रमाणसहं, तर्कसहं वा। अर्थात् न कर्तृकरणयोः पृथक्त्वे किञ्चित् प्रमाणमस्ति। साधकाभावात् कर्तृकरणयोरैक्यं प्रमाणितं स्वीकर्तव्यम् इति तस्यैव युक्तत्वं सिद्ध्यति।

न इति नैयायिकाः कर्तृकरणयोरैक्यन्तु असम्भवमेव। करणानां धर्मस्तु विषयेन सह संयुज्य तद्ग्रहणमात्रमेवेति प्रसिद्धम्। विषयग्राहकानां करणानां सङ्कल्पकेन, निर्णायकात् च पृथक्त्वम्। यत् विषयग्राहकम् तन्न आलोचकमिति निर्णयः। अपरञ्च इन्द्रियाणां कर्तृत्वे सति त एव अनुभवितारः तन्न युक्तम् अनुभवनस्य पृथक्कर्मत्वात्। तथा च अनुभवस्मृत्योः समानाधिकरण्यात् इन्द्रियाणामेव स्मृतिधर्मत्वं सम्भवेत् य अनुभवति स एव स्मरति इति नियमः अन्यथा देवदत्तकृतानुभवस्य यज्ञदत्तकृतस्मरणप्रसङ्गात्। तत्तु लोकविरुद्धमेव। अत्र तु इन्द्रियाणां स्मरणप्रसङ्गं नोपपद्यते। अन्यथा इन्द्रियापघाते स्मरणस्याप्यनुपपत्तिः। यथा कस्यचिद् नेत्रयोरपघाते तद्दृष्टसौन्दर्यस्य स्मरणमनुपपन्नमेव स्यात् तदपि लोकविरुद्धमिति। अनुभवस्मरणयोस्तु कारणकार्यभावात्।

अपरञ्च इन्द्रियाणां पृथक्त्वे एकस्मिन्नेव शरीरे अनेकात्मप्रसङ्गापत्तिः। तत्तु अयुक्तमेव। अन्यथा इन्द्रियाणां परस्परसम्बन्धविरहापत्तिः। अपरं वा एकस्यैवात्मनः पृथक् पृथक् इन्द्रियरूपेण व्यवस्थितिश्चेत् नेत्रापघाते कर्णाभ्यां दर्शनापत्ति सम्भवात्। इति सर्वमेवोपपन्नम्।

मनआत्मवादिनश्चार्वाकाः—केचन चार्वाकाः मनस आत्मत्वं निरूपयन्ति तत्र—

(१) 'कामःसङ्कल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव'। इति, 'अन्योऽन्यतर आत्मा मनोमयः'। इति च श्रुतिः।

(२) 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इति स्मृतिः,

(३) 'अहं सुखी' 'अहं दुःखी' 'सङ्कल्पवानहं' 'विकल्पवानहम्' इति लोकप्रमाणात् च,—

मन एव अहं प्रत्ययविषय आत्मा इति सिद्धम्। तेन चक्षुरादि-बाह्यकरण-आत्मवादे प्रसक्तदोषानां निराशः च। मनस अपघाता भावः नित्यत्वेन तस्य युक्तत्वञ्च युक्तमेव।

नैयायिकास्तु तन्मतमपि न स्वीकुर्वन्ति। तत्र प्रथमं भवन्मते मन अणु-परिमाण मध्यमपरिमाणो वा विभुपरिमाणस्य मनसस्तु मध्यमपरिमाणे शरीरे स्थितिरेवासम्भवा। अणुत्वस्वीकारपक्षे तस्य विषयग्रहणा सामर्थ्यप्रसङ्गः। इन्द्रियविषयभूतानां पदार्थानां महत्परिमाणत्वात्। महत्परिमाणभूतानां विषयाणां अणुपरिमाणभूते मनसि स्थितिरसम्भावा एव 'अहं सुखी' 'अहं दुःखी' इत्यादि लोकानुभवसिद्धानामनुपपन्नात्।

मध्यमपरिमाणे सति च समकालमेव समस्तज्ञानानामेवोत्पत्तिप्रसङ्गः। तथा च 'मम मनः' इति लोकप्रमाणविरोधः, 'मनसैवानुदृष्टव्यम्' इति श्रुतेश्च विरोधापत्तिः। अत एव आत्मा मनसः पृथगेव तत्त्वमिति निश्चितम्। अत एवोक्तम्—

'मनोऽपि न तथा ज्ञानाद्यनध्यक्षन्तदा भवेत्'। इति।

(५१) प्रश्नः—आत्मविषये क्षणिकविज्ञानवादिबौद्धमतमुपस्थाप्य तन्निराक्रियताम्।

उत्तरम्—आत्मस्वरूपप्रतिपादनप्रसङ्गे प्रथमं पूर्वपक्षं प्रतिपादयन् न्याय-सिद्धान्तमुक्तावलीकारः चार्वाकमतं निरस्य विज्ञानवादिबौद्धमतं दर्शयति। ननु विज्ञानमेवात्मा इति।

शरीरेन्द्रियमनसाम् आत्मत्वं (चार्वाकमतं) तु न युक्तम् इति उचितमेव। परन्तु द्वितीयक्षणध्वंसप्रतियोगिरूपं यद् विज्ञानं अथवा प्रवृत्ति आलयरूपमुभयविधं यद्विज्ञानं तदात्मा इति विचिकित्सा स्यात्।

बौद्धमते तु 'यत्सत्तत्क्षणिकं यथा जलधरः' इति इह संसारे सर्वमेव पदार्थजातं क्षणिकमेव। तत्र द्वितीयक्षणध्वंसप्रतियोगि अनुभूतस्मृतविषय-अर्पणरूपा या प्रवृत्तिः तदेव विज्ञानम्। अत एव तन्मतानुसारं सर्वमेव जगदिदं विज्ञानरूपमेव। तद् विज्ञानं च भावरूपं क्षणिकं, पूर्वपूर्वविज्ञानमुत्तरोत्तरविज्ञानस्य कारणरूपञ्च।

अत एव बौद्धनामेतद् विज्ञानं कल्पनात्मकं स्मरणात्मकं वा। सर्वमेवेदं विज्ञानं आभ्यन्तरमेव, यत्तु बाह्यपदार्थप्रत्यक्षरूपं तदपि आभ्यन्तरं कल्पनाप्रसूतमेव केवलं बाह्यरूपेण प्रतीयमानमित्येव विशेषः।

विज्ञानप्रवाहस्त्वयम् अनेकवस्त्रपोटलिकावेष्टितकस्तूरीगन्धवत् क्रमशः परंपरं सरन् अनन्तं प्रवाहरूपं सन्नपि स्वयं क्षणिकम् एवं प्रतिक्षणप्रवाहमानेऽस्मिन् विज्ञाने आत्मत्वकथने न चार्वाकमतवत् स्मरणानुपपत्तिः।

विज्ञानमेतद् द्विविधं प्रवृत्तिविज्ञानम् आलयविज्ञानञ्च। जाग्रतावस्थाव्याप्तं प्रवृत्तिविज्ञानं सुप्तावस्थाव्याप्तञ्च आलयविज्ञानम्। अथवा सुषुप्तावस्थाव्यतिरिक्त सर्वकालव्याप्तं प्रवृत्तिविज्ञानमेव। उभयविधविज्ञानमेवात्मा। उभयविधम् एव प्रवाहरूपमिति संक्षेपेण बौद्धविज्ञानवादः। अथवा द्वितीयक्षणध्वंसप्रतियोगिबुद्धिरेव विज्ञानमिति दिक्।

तद् विज्ञानन्तु मूलतः चैतन्यांशरहितम् तथापि स्वयंप्रकाशरूपम्। सर्वमेव चराचरात्मकं जगदेतत् बाह्यरूपेण तद्भिन्नं सदपि विशेषतः तद्रूपमेव। अत एव स्वप्रकाशत्वात् तत्र अचेतनत्वजन्या विप्रतिपत्तिरपि न कार्या।

अहं जानामि, अहं सुखी इत्याद्यात्मकं तत् विज्ञानमेव ज्ञानसुखादिरूपेण प्रतिभासमानं सत् तदभिन्नत्वं सत् तद्भिन्नमिव भासमानं प्रतीयते। अत एव ज्ञानसुखादय ये आत्मनः गुणाः कथ्यन्ते त एव विज्ञानरूपत्वात् विज्ञानमात्मेति न काचित् विप्रतिपत्तिः स्यात्।

पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानं कारणमस्तीति अत्र स्मरणजन्या विप्रतिपत्तिरपि न स्यात्। (यत्तु चार्वाकानाम् इन्द्रियात्मवादे स्मृतौ विप्रतिपत्तिः दर्शिता तदपि अत्र न स्यादित्यर्थः।) भावपदार्थत्वात् प्रतिक्षण(सुषुप्तावपि)-

प्रवाहमानत्वात् च तस्य अनित्यत्वे सत्यपि नित्यवद् व्यवहारेऽपि न कश्चिद् दोष इति।

तदेव क्षणिकविज्ञानवादिमतं समासेनोक्तम्, यथा—

"नन्वस्तु विज्ञानमेवात्मा तस्य एव प्रकाशरूपत्वात् चेतनत्वं ज्ञानसुखादिकं तस्यैवाकारविशेषस्तस्यापि भावत्वादेव क्षणिकत्वम्, पूर्वपूर्वविज्ञानस्योत्तरोत्तर-विज्ञाने हेतुत्वात्, सुषुप्तावयालयविज्ञानधारा निराबाधैव मृगमदवासनावसित-वसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणाम् उत्तरोत्तरविज्ञाने सङ्क्रान्तत्वान्नानु-पपत्तिस्मरणादेरिति"।

नैयायिकस्तु तन्मतं निराकरोति—न इति। विकल्पद्वयवदिदं विज्ञान-वादिबौद्धमतं—किमेतद् विज्ञानं सर्वविषयकम् उत वा यत्किञ्चिद्विषयम्। सार्वविषयकमिति चेत्—सर्वेषामेव सर्वज्ञत्वप्रसङ्गापत्तिः। परन्तु न कश्चिदिह सर्वज्ञो दृश्यते। यत्किञ्चिद् विषयकमिति चेत्—विनिगमनाविरहः यत्किञ्चिद्-विषयकमित्यत्र निर्णायकयुक्त्यभावः। बौद्धमते तु सर्वमेव ज्ञानम् आन्तरपदार्थ-विषयकम्। 'अयं घटः' 'अयं पटः' इत्यपि न बाह्यपदार्थविषयकज्ञानम्। अतः विज्ञानमेतत्किंविषयकं स्यादिति निर्णायकयुक्त्यभावः। बाह्यपदार्थविषयाभावात् बाह्यपदार्थं ज्ञानस्य विषयं न स्यादिति एव विनिगमनाविरहः। कस्यचिदपि पदार्थस्य ज्ञानविषयाभावात् क्षणिकविज्ञानवादि बौद्धमतम् आमूलमयुक्तमेव।

सुषुप्तिकाले आलयविज्ञानधारायाः (निर्विषयकचित्सन्ततेः) स्वप्रकाशत्वे प्रमाणाभावः। ज्ञानत्वस्य विषयताव्याप्यत्वात्। यदि निर्विषयकविज्ञानस्य स्वयं प्रकाशत्वं स्यात्, तर्हि घटपटादीनामपि स्वयं प्रकाशत्वं कथं न इति अनु-कूलतर्काभावः। ज्ञानविषयानां घटपटादीनां निर्विषयत्वं स्यात् तर्हि तेषां ज्ञानत्वापत्तिः।

बौद्धमते तु बाह्यपदार्थानां विज्ञानव्यतिरिक्तानां न सत्ता स्वीक्रियते, अत एव घटपटादीनामपि विज्ञानमयत्वात्, ज्ञानरूपत्वे न कश्चिद् दोषः इति भणति चेत् तदपि न। 'ज्ञानस्य विषयो ह्यन्यं फलमन्यदुदाहृतम्'। इति लोकसिद्धं शास्त्रसिद्धञ्च। अत एव सर्वेषामेव पदार्थानां ज्ञानरूपत्वमनुपपन्नमेव। अस्तु चेत् विज्ञानादिपदार्थानाम् ज्ञानरूपत्वम्, तथा सति विज्ञानस्वरूपं घटपटादिभिः भिन्नमस्ति अभिन्नं वा? भिन्नं चेत् ओमिति विज्ञानवादं निरस्तमेव। अभिन्नमिति चेत् समूहालम्बनात्मकं ज्ञानं नीलपीतादिभ्रान्तिजनकमिति, नील-

पीताद्याकाराणां समानविज्ञानमयत्वात्। स्वतन्त्ररूपेण कस्यचिदपि विषयस्य ग्रहणासम्भवात्।

नीलत्वपीतत्वादीनाम् अपोहरूपेण ग्रहणमपि न युज्यते। (अपोहं तु तद्भिन्नभिन्नत्वम्।) समानविज्ञानस्वरूपे नीलपीतत्वादिकं भ्रान्तिरूपमेव। नीलन्तु समानस्वरूपत्वे कथं पीतत्वाद् भिन्न भवेदिति न तर्कसहम्। यत्तु अपोहरूपधर्मः तदपि विज्ञानरूपत्वात् मिथ्याभूत एव। तथा च नीलत्व-पीतत्वादीनां परस्परासमानाधिकरणानां विज्ञानरूपिणि एकस्मिन् धर्मे स्थितिः न युज्यते। यथा उष्णत्वंशीतत्वरूपविरुद्धधर्माणां एकस्मिन् धर्मिणि स्थितिरसम्भवा।

अत एव परस्परविरुद्धधर्माणाम् अधिकरणत्वाय विज्ञानव्यतिरिक्तं भिन्नभिन्नं पदार्थग्राहकं कल्पनीयम्, तथा च तद्ग्राहकत्वादात्मा तस्माद् भिन्नमेव किञ्चिदुपपन्नमिति दिक्।

यत्तु विज्ञानवदिभिः समूहालम्बनात्मकं वासनासङ्क्रम स्वीक्रियते तदपि न युक्तम्। विज्ञानवादिमतानुसारं वासनासङ्क्रमादेव स्मरणानुपपत्तिः। तदपि न युक्तम् कारणवासनया कार्यस्य वासितत्वमपि न युक्तम्, अन्यथा मात्रनुभूतसस्काराणां पुत्र द्वारा स्मरणोपत्तिः स्याद्।

यत्तु उपादानकारणानां वासनासङ्क्रम एव युक्तम्, माता तु पुत्रं प्रति निमित्तकारणमेवेति उच्यते तदपि न युक्तम् पूर्वपूर्वविज्ञानानामुत्तरोत्तरविज्ञानं प्रति सङ्क्रमस्यासम्भवाद्। सर्वं क्षणिकमिति बौद्धसिद्धान्तविरोधाच्च।

गुणेषु गुणक्रिययोरभावः। इति नियमाच्च वासनानाम्नि गुणे सङ्क्रमरूपक्रियाया अभाव एव।

नेदं सङ्क्रम उत्पत्तिरेव तदिति चेत्, तदपि न उत्पादकाभावात् उत्पादकपूर्वविज्ञानस्य प्रथममेव नाशसम्भवात्, संस्कारानन्त्यप्रसङ्गाच्च।

एवं बौद्धमते यद्विज्ञानं तस्य आत्मत्वं कथमपि न युज्यते बौद्धकृततर्काणां निरस्तत्वात्। एवमेव क्षणिकशरीरेष्वपि आत्मत्व कल्पनानिराशः इति सर्वमुपपन्नम्।

(५२) प्रश्नः—आत्मविषये नित्यविज्ञानवादि-अद्वैतवेदान्तिमतमुपस्थाप्य निराक्रियताम्।

उत्तरम्—वेदान्तिनस्तु नित्यविज्ञानवादिनः इति विशेषणेनाभिहिता। भगवान् वादरायणव्यास-शङ्कराचार्य-प्रभृतिभिः प्रतिपादितमेतद् अद्वैतवेदान्ति-

मतं प्रसारितं च । उपनिषद्-श्रीमद्भगवद्गीता-ब्रह्मसूत्राणि इति ग्रन्थत्रयं (प्रस्थानत्रयनाम्ना ख्यातम्) प्रमाणत्वेनोपस्थापितम् ।

वेदान्तमतानुसारं नित्यं स्वप्रकाशरूपं चैतन्यम् आत्मा । अतएवोक्तम्— 'अविनाशीवाऽरेऽयमात्मा' 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिः । यथा नीलमुत्पलमित्यत्र नीलपदं विशेषणपरम्, उत्पलमिति विशेष्यपदम् । तथैवं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र ब्रह्मपदं विशेष्यम् । 'सत्यं ज्ञानम् अनन्तम्' इति विशेषणपदानि । सत्यं इत्यनेन असत्यभूतानां निवृत्तिः, सत्यपदं त्रिकालाबाधितमर्थम् द्योतयति । ज्ञानम् इत्यस्यार्थः चित्स्वभावः तेन अचित्पदार्थानां स्थावराणां निवृत्तिः । अनन्तम् इत्यस्य देशकाद्यपरिच्छिन्नमिति अर्थः । तेन परिच्छिन्नानां लौकिकपदार्थानां निवृत्तिः । यथा नीलमुत्पलम् इत्यत्र नीलशब्देन तद्व्यतिरिक्तानां निवृत्तिः नीलपदस्य च स्वार्थस्थापनम् उभयमेवार्थम् उपपन्नम् । तथैव सत्यं ज्ञानम् अनन्तमिति पदानि स्वार्थम् अभिधाय स्वार्थव्यतिरिक्तानां व्यावर्तक रूपेण च वर्तन्ते । एवमेतैः सत्यमित्यादिभिः पदैरभिधेयं तद्व्यावृतपदार्थव्यतिरिक्तं ब्रह्मरूपपदार्थम् अहं प्रत्ययविषयः । तदेव आत्मा ।

तद् ब्रह्मरूपपदार्थम् आत्मा वा सर्वव्यापकं, सर्वसाक्षि, अकर्ता, अभोक्ता नित्यज्ञानरूपं केवलं ब्रह्म एव । अज्ञानो पाधिवशाज्जीवभावं गत स आत्मा एव; नाना उपाधिवशान्नानात्वं गतश्च । निरूपाधिस्वरूप स ब्रह्म, मायोपाधिगतः स एव ईश्वरः अविद्योपाधिगतः स एव जीव इति नानात्वं भजते ।

ज्ञानेन तदविद्योपाधिनिराशात् जीवात्मा ब्रह्मस्वरूपं स्वनित्यशुद्धबुद्धरूपं प्राप्नोति । तदेव मोक्ष इति कथ्यते । तत्त्वमसि इति महावाक्योपदेशेन तच्छ्रवणमनननिदिध्यासनवशाद्या अखण्डाकाराकारि 'अहं ब्रह्मास्मी'त्यकारा चित्तवृत्तिरुदेति सा एव विद्या, ज्ञानं वा पदेनाभिधीयते । तद्वशादेव मुक्तिः मोक्षः अपवर्गो वा प्राप्यते ।

आत्मविषयकमेतत् वेदान्तिमतमपि क्षणिकविज्ञानवादिबौद्धमतमिवाग्राह्यम् इति नैयायिकः । प्रथमन्तावत् वेदान्ति अभिमतं नित्यविज्ञानमेव अयुक्तम् । तत्र आकांक्ष्यते नित्यविज्ञानमेतत् सविषयकं निर्विषयम् वा ? यदि सविषयं स्यात् तत्र किं समस्तविषयकं स्यात् उत यत्किञ्चित्विषयकम् ? समस्तविषयकं चेत् तथा सर्वेषां सर्वज्ञत्वप्रसङ्गात् । न च जगति कस्यापि सर्वज्ञत्वं प्राप्यते । यत्किञ्चित् वस्तुविषयकञ्चेद् तथा सुषुप्तौ अपि रूपादिविषयज्ञापकत्वं लभ्येत् ।

अथवा नित्यविज्ञानरूपस्यात्मनः निर्विषयकत्वं अस्ति चेत् तदपि न युज्यते प्रमाणाभावात्। ज्ञानस्य निर्विषयत्वं तु न सम्भाव्यते। यद्यत् ज्ञानं तत्तत्-सविषयकमित्येव व्याप्तिः। यद्यत् घटविपयकं ज्ञानं तत्तत् घटस्वरूपं विषयी-करोति प्रकाशयति च। तथैव पटविषयकं ज्ञानं पटमेव विषयीकरोति प्रकाश-यति च निर्विषयकस्य ज्ञानस्य तु ज्ञानत्वमेव न सम्भवति।

अत एव नित्यविज्ञानस्य तु आत्मत्वं न सम्भाव्यते।

अपरञ्च सत्यं ज्ञानमनन्तं ब्रह्म इति तु ब्रह्मपरं वाक्यम्। न तु आत्मपर-मिति।

यत्तु जीवात्म-परमात्मनोरभेदे सति जीवात्माऽपि सत्यं ज्ञानम् अनन्तमिति पदैः लक्ष्यते इति चेत् तदपि न लोके कस्यचित् ज्ञानित्वं कस्यचिदज्ञत्वम् कस्य-चित्सुखित्वम् कस्यचिच्च दुःखित्वम् इति भेदव्यवस्थया जीवात्मनो नानात्वम् ब्रह्मस्वरूपाद्भिन्नत्वञ्च स्पष्टमेव अन्यथा एकस्य मुक्तौ सति सर्वेषामेव मुक्तिः एकस्य बन्धे सति सर्वेषामेव बद्धत्वम् स्यात्। न च तथास्थितिः इति नानात्वम् उपपन्नमेव। अत एव जीवेशौ परस्परभिन्नौ विरुद्धधर्माक्रान्तत्वात् दहन-तुहिनवत्।

यत्तु 'ममैवांशो जीवलोके' इति भगवद्वाक्यात् जीवेश्वरयोः अभेदम् आप्त-वाक्यप्रमाणात् सिद्धमेवेति तन्न भगवद्वाक्यस्य अन्यथा पर्यवसन्नत्वात् अन्यथा भेदव्यवहारं बद्धमुक्तव्यवहारमेवानुपपन्नम् इति। एवं 'तत्त्वमसि' 'अहं ब्रह्मा-स्मी'ति वाक्यपि अन्यथैव पर्यवसन्नमित्यर्थः। 'तत्त्वमसी'त्यत्र 'तत्' 'त्वमि'ति पदार्थद्वये लक्षणापेक्षया 'तत्' इत्यस्य 'तस्य' इति लक्ष्यार्थग्रहणे लाघवमिति युक्त-मेव। अत्र 'यजमानः प्रस्तरः' 'आदित्यः यूपः' इति वद् लक्ष्यार्थमेवोपपन्नमिति दिक्।

अन्यच्च जीवब्रह्मणोरभेदेन तयोः श्रुतिप्रतिपादितं सेवकसेव्यभावमपि न युज्यते इति श्रुतिविरोधापातात्। यदि मोक्षदशायाम् अज्ञाने निवृत्ते सति अभेदः स्यादिति उच्यते, तदपि न भेदस्य नित्यत्वाद् तस्य नाशासम्भवम्। तेन जीवात्म-परमात्मनो पृथक्त्वमेव नित्यम्। तथा च वेदान्ति मतेन ब्रह्मणो निर्धर्मकत्वात् तत्र सत्यत्वादिधर्माणां स्थितिरप्यसम्भवा एव। परन्तु तत्र सत्यत्वन्तु अस्त्येव। एवं द्वित्वधर्मस्यासम्भवत्वे सत्यपि जीवात्मपरमात्मो भेदं सम्भवत्येव। यत्तु मिथ्यात्वस्याभावे सति सत्यत्वं कल्पितमिति चेत्। द्वित्वधर्मस्याभावे कथं नैकत्वं न कल्पयेत्। यत्तु मोक्षदशायामेकत्वकल्पनं तत्सादृश्यपरकमेव न तु ऐक्यव्य-

ञ्जकमिति पुरोहितोऽयं राजा संवृत इति वद् अर्थवादपरकमिदं वाक्यम्। अत एव 'निरञ्जनः परमं साम्यमुपैति' इति श्रुतिवाक्यं सार्थकं भवेत्। अस्यार्थः दुःखत्रयविनिर्मुक्तः ब्रह्मसमत्वं प्राप्नोति इत्यर्थः। अथवा 'नित्यं ज्ञानमानन्दं ब्रह्म' इति वाक्ये ब्रह्मणि ज्ञानाश्रयत्वं उच्यते। यथा च 'यः सर्वज्ञः सर्ववित्' इत्यत्र तत् ज्ञानाश्रयः न तु ज्ञानस्वरूपः इत्युक्तम्।

'नित्यं ज्ञानमानन्दम्' इत्यत्र आनन्दशब्दात् अच् प्रत्ययः मत्वर्थे एव। यथोक्तम्—'अर्श आदिभ्योऽच्' (५।२।१२७)। अत एवास्य आनन्दाधिकरणत्वमेव युक्तम् न तु आनन्दस्वरूपत्वम् अन्यथा तस्य पुंस्त्वापत्तिः स्यात्। अत एव आनन्दशब्दोऽत्र दुःखाभावव्यञ्जकः उपचारत्वेन प्रयुक्तम्।

एवं वेदान्तिमतं सर्वथा अनुपपन्नमेव। आत्मा तु प्रतिशरीरभिन्नं ज्ञानसुखाद्यधिकरणम् एवेति दिक्।

(५३) प्रश्नः—आत्मविषये सांख्यमतं प्रस्तूय न्यायसिद्धान्तानुसारं तं निरस्यताम्।

उत्तरम्—आत्मस्वरूपं प्रतिपादयन् प्रथमं पूर्वपक्षनिराकरणप्रसङ्गे सांख्यशास्त्रसम्मतं पुरुषं विवेचयति ग्रन्थकारः। सांख्यमते तु प्रकृतिपुरुषाभिधे द्वे पदार्थे। तत्र पुरुष एव आत्मस्थानीय स चेतनः अकर्ता सत् बुद्धौ प्रतिबिम्बितः तत्रस्थान् ज्ञानसुखादीन् आत्मीयान् इति कृत्वा सुखी दुःखी इव प्रतिभाति।

सांख्यमतानुसारं तु प्रकृतिरेव कर्त्री, पुरुषस्तु असङ्ग एव किन्तु चेतनः। पुरुषस्तु न कार्यकारणभिन्नो निर्विकार एव। कार्यकारणाभेदात् कार्यनाशे करणस्यापि नाश इति कृत्वा पुरुषः प्रकृतिविकृतिभिन्नः कल्पितः। बुद्धौ तु पुरुषप्रतिबिम्बत्वात् चैतन्यभासः, पुरुषं विना तत्र चैतन्याभासाभावः अत एव पुरुषं नाम तत्त्वं कल्पितम्। बुद्धिस्तु प्रकृतेः कार्यं महदिति अभिधानं भजते। तस्या बुद्धेरेव इन्द्रियप्रणालिकाभिः विषयैः सम्बन्ध ज्ञानरूपं परिणामं जनयति। अत एव ज्ञानन्तु बुद्धेर्धर्मं न तु पुरुषस्य। पुरुषस्य कर्तृत्वाभिमानं बुद्धेश्च चेतनत्वाभिमानं प्रकृतिपुरुषयोः भेदग्रहणाभावेनैव भवति। ममैतत् कर्तव्यमिति (अमुक विषयं प्रति मया प्रवर्तितव्यम्) इत्यत्र पुरुषस्याभास बुद्धौ प्रतिबिम्बितत्वादेव अत एवावास्तविक इति तथ्यम्। अयमेव मिथ्याप्रतीतिः इन्द्रियप्रणालिकया विषयान् विषयीकृत्य बुद्धेः वास्तविकं परिणामं जनयति। ममेति बुद्धिविकारन्तु अत्र कारणम्। यथा दर्पणमालिन्यात् मुखप्रतिबिम्बस्यासम्भवात् तथैव मलिनबुद्धौ चैतन्यप्रतिबिम्बाभावात् स्पष्टार्थग्रहणमसम्भवम्। तेन ज्ञानादीनां ग्रहणमप्य-

सम्भवम् । कर्तव्यम्—अर्थात् विषयं प्रति प्रवृत्तिः एव व्यापारः । एवम् अंशत्रयवत्या बुद्ध्या (मम, इदं, कर्तव्यमिति त्रयो अंशाः) पुरुषेण सम्बन्धस्त्ववास्तविक एव । अयमवास्तविकसम्बन्ध एव उपलब्धिः इत्यभिधीयते ज्ञानेच्छाद्वेषसुखदुःखादयस्तु बुद्धेरेव धर्माः कृतिसमानाधिकरण्यात् । बुद्धिस्त्वचेतना परिणामित्वात् । इति सांख्यमतसारः ।

तन्न युक्तमिति नैयायिकाः । कृति-धर्माधर्म-सुख-दुःखवत् चैतन्यस्यापि समानाधिकरण्यात् तदधिकरणभिन्नस्य सत्त्वे प्रामाण्याभावः । तेन यथा चैतन्याधिकरणे यथा भ्रान्तिरिति कल्प्यते तथा कृत्यधिकरणे कथं न भ्रान्तिरिति कथं न कल्पितव्यम् । तेन यथा बुद्धेः नित्यत्वकल्पने मोक्षाभावः तथैव अनित्यत्वकल्पनेऽपि ततः पूर्वं संसाराभावः इति न प्रमाणसहः । ननु अचेतनस्य कार्यत्वात् बुद्धौ चैतन्यभावः कार्यस्य कारणादभेदात् इति चेत् तदपि न युज्यते । प्रयत्नादयस्तु ज्ञानाश्रयाः प्रकृतिकार्यरूपा इति बुद्धौ प्रमाणाभावः । कृतिज्ञानाश्रयस्य कर्तुं जननधर्मे च मानाभावः । रागरहितस्य जन्यत्वे प्रमाणाभावात् तस्य अनादित्वम् अनादिनोऽविनश्यत्वात् तस्य नित्यत्वमपि अत एव प्रकृतेः कल्पनैव व्यर्था । अनादि-अनन्तः तु न्यायसम्मत आत्मा एव इति प्रकृतिकल्पना निरर्थका इत्यर्थः ।

संक्षेपेण नैयायिकः साख्यमतं निराकरोति—यथा कृत्यदृष्टभोगानां समानाधिकरण्यं प्रतीयते तथैव 'चेतनोऽहं करोमि' इति एवं रूपा या प्रतीतिः तत्र चेतनत्व-कृतित्वयोः समानाधिकरण्यं प्रतीयते । किन्तु चेतनत्वं ज्ञानभिन्नं न किञ्चित्पदार्थम्, य एव चेतनः स एव कर्ता । चेतनोऽहं करोमीत्यत्र चेतनस्यैव कर्तृत्वं सिद्धयति । सांख्यास्तु तत्र चैतन्यांशं भ्रमरूपं मन्यन्ते । तत्र किमर्थं कृत्यंशेऽपि कथं न भ्रमरूपा प्रतीतिरिति मन्यते । कर्तृत्वमपि चेतनधर्मं स्यादिति । यत्र यत्र चेतनत्वं तत्र तत्र कर्तृत्वम् इति व्याप्तिग्रहणाद् । तथा च चेतनत्वं द्रव्यस्यैवेति । बुद्धिस्तु न द्रव्यरूपा ज्ञानरूपत्वात् गुणरूपा हि तत् । अत एव सांख्यमते या व्याप्तिः—'बुद्धिः न चेतना परिणामित्वात् मृद्वत्' इति न युज्यते, 'बुद्धिः कर्तृत्वाभाववती जन्यत्वात् घटवत्' इत्यनुमानेन बुद्धेः अकर्तृत्वमपि सिद्धम् । अतः 'चेतनोऽहं करोमि' इति प्रतीतौ बुद्धेः कर्तृत्वमपि भ्रान्तिमूलकमेवेति प्रतीयते । सांख्यास्तु बुद्धिं पृथक्द्रव्यरूपेण स्वीकुर्वन्ति तथा च तस्या सत्त्वासत्त्वेन बन्धमोक्षे आमनन्ति ।

तत्रेयं कर्तृरूपाबुद्धिः अनित्याऽस्ति नित्या वा ? नित्या चेत् बुद्धिसत्त्वाधीनस्य

पुरुषस्य सर्वदा बन्धमेव सिद्धयति न मोक्षलाभ न च मोक्षार्थं प्रवृत्तिः सम्भवेत्। अनित्या चेत् बुद्धयुत्पत्तिपूर्वं पुरुषस्य संसारे अस्तित्वाभावप्रसङ्गः समापतति। बुद्धयुत्पत्तिपूर्वं पुरुषस्यासंसारित्वेन बुद्धयुत्पत्तिपश्चात्तस्यैव संसारे बन्धप्रसङ्गः स्यात् एवं अनित्यत्वपक्षे मुक्तस्य पुनः बन्धनं सम्भाव्यते। तथा च बुद्धयुत्पत्तिपूर्वं पाप-पुण्य-अद्रष्टजनक-विहितनिषिद्धकार्यादीनामपि अभावः स्यात्। एवं बुद्धे नित्यानित्यत्वोभयमपि न युज्यते।

तथा च सांख्या प्रधानं (प्रकृतिं) अचेतनं, चेतनात् स्वतन्त्रमपि स्वीकुर्वन्ति एवं स्थिते प्रकृतिरूपत्वम् (महदादिकार्यजनकत्वम् अपि अयुक्तमेव।

यत्तु सांख्याः—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढ़ात्मा कर्ताहमिति मन्यते॥

इति श्रीमद्भगवद्गीतावाक्यप्रमाणेन प्रकृते कर्तृत्वं स्थापयन्ति तदपि न युक्तम्। तत्र प्रकृति शब्दस्यादृष्टरूपमेवार्थं स्वीकर्तव्यम्। अन्यथा—

अधिष्ठानं तथा कर्ता करणञ्च प्रथग्विधम्।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥
शरीरवाङ्मनोभिः यत्कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥
तत्रैवं सति कर्तारमात्मानं केवलन्तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥

इति भगवद्वाक्येन विरोधापत्तिः स्यादिति सर्वमुपपन्नम्।

(५४) प्रश्नः—न्यायसिद्धान्तमुक्तावलीदिशा न्यायशास्त्रसम्मतं आत्मतत्त्वं विविच्यताम्।

उत्तरम्—न्यायसिद्धान्तमुक्तावल्यां ग्रन्थकार आत्मविषये चार्वाकबौद्धवेदान्त-सांख्य-शास्त्राणां मतानि दूषयित्वा ततः किमात्मेति जिज्ञायां तन्निवृत्त्यर्थं न्यायसम्मतमात्मस्वरूपं प्रतिपादनाय स्तौति—

'धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः॥
प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथी।
अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः॥
विभुबुद्धयादि गुणवान्……………… … । इति ।

आत्मा तु धर्माधर्मयोः पुण्य-पापयोः आश्रयः, कर्ता अधिकरणं वा अयं अध्यक्षः = प्रत्यक्षगम्यः आत्मतत्त्वम्। दृश्यमानशरीराद्भिन्नः मानस प्रत्यक्ष-गम्यः इत्यर्थः। शरीरस्य तदाश्रयत्वे अन्यकृत कर्मणाम् अन्यः फलभोक्तेति-प्रसङ्गपातः सम्भाव्यते। शरीर एव यदि धर्माधर्माणां आश्रयः स्यात् तर्हि तस्य अत्रैव पातात् अन्यस्मिन् जन्मनि यत् प्रारब्ध कर्मफलभोक्तृत्वं दृश्यते तन्न उपपद्येत्। विशेषगुणयोगतः इति ज्ञानसुखदुःख-ईच्छाद्वेषप्रयत्नानां सम्बन्धेन आत्मनः मानसप्रत्यक्षं भवति।

अयमात्मा प्रत्यक्षप्रमाणबोध्यः अनुमानविषयश्च। स्वकीयात्मनः मानस-प्रत्यक्षं परकीयात्मनश्च अनुमानगम्यत्वं सम्भवति। स्वीयात्मनः प्रत्यक्षे अहं प्रत्ययविषयत्वम् अहङ्काराश्रयत्वञ्च दृश्यते। परकीयशरीरे अनुमानं तु—'अयं शरीरं चेतनाधिष्ठितं चेष्टाश्रयत्वात् रथादिवत्' इति प्रक्रिया। अत्र—अयं शरीरं चेतनाधिष्ठितम्, इति प्रतिज्ञा, चेष्ठाश्रयत्वात् इति हेतुः, यत्र यत्र चेष्टाश्रयत्वं तत्र तत्र चेतनाधिष्ठितत्वम् यथा रथादिः, इति हेतुः, तथा चायम्, इति उपनयम्, तस्मात्तथा इति निगमनम्। प्रवृतिः अत्र चेष्टारूपलक्ष्यार्थं गमकम्। चेष्टा तु हिताहितप्राप्तिपरिहारानुकूलक्रिया।

एवं अहम् इत्याकारको प्रत्ययः अहङ्कार इत्युच्यते। अहं प्रतीतिविषयस्तु आत्मा। अनेन शरीरेन्द्रियमनोबुद्धीनां व्यावृत्तिः स्पष्टमेव।

अस्यार्थः मनोभिन्नचक्षुरादीन्द्रियजन्यप्रत्यक्षनिरूपितलौकिकविषयताशून्यत्वे सति मानसत्वावच्छिन्ननिरूपितलौकिकविषयतावान् प्रत्यक्षः।

तदात्मा विभुः परममहत्त्ववत्वम्। समवायसम्बन्धेन परममहत्परिमाणवान् तेन महत्परिमाणवतां विषयाणां धारणासम्भवात्। तस्य गुणाश्च बुद्धिसुखदुःख-इच्छाद्वेषप्रयत्नधर्माधर्मसंस्कार-संख्यापरिमाणपृथक्त्वसंयोगविभागाः इति चतुर्दश।

(५५) प्रश्नः—किं नाम बुद्धिः? कतिविधा च? इति सप्रपञ्चं व्याख्यायताम्।

उत्तरम्—'अर्थप्रकाशो बुद्धिः। नित्या अनित्या च। ऐशी बुद्धिर्नित्या। अन्यदीया अनित्या।' इति तर्कभाषाकारः। अथवा—'बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्याऽभिधीयते सा बुद्धिः'। इति स एवान्यत्र। न्यायसूत्र-कारस्तु—'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्' (१।१।१५) इति। आचार्य विश्वनाथस्तु—

'..........बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।' इत्यादिः ।

एवं बुद्धितत्त्वं विवेचयति ।

यद्यपि द्रव्य निरूपणप्रसङ्गे 'क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः' इत्युक्त्वा आत्मपर्यन्तानां निरूपणानन्तरं मनस्तत्त्वं निरूपणीयम् स्यात् तथापि बुद्धि मनस उपलक्षणमिति कृत्वा बुद्धितत्त्वमेव निरूपयति तत्रैव प्राप्तप्रसङ्गे सति मनः अपि वक्ष्यते । अथवा बुद्धिस्तु आत्मनो विशेषगुण एव इति तद्-विवेचनं प्रसङ्गप्राप्तमेव ।

अर्थप्रकाशो बुद्धिरिति । अर्थानां द्रव्यगुणकर्मसामान्यविशेषसमवायाभावानां प्रकाश उपलब्धिर्येन भवति अथवा द्रव्यादीनां प्रकाशनं ग्रहणमेव बुद्धिः ।

अथवा 'जानामीत्यनुव्यवसायविषयवृत्तिगुणत्वव्याप्यजातिमती बुद्धिः' । अर्थात् अहं इदं जानामि इत्येव प्रकारकं यदनु-व्यवसायात्मकं ज्ञानविषयवृत्तिः, तद् गुणत्वव्याप्य जातिमान् आत्मनो विशेषगुण एव बुद्धि संज्ञयाभिधीयते ।

तर्कभाषाकारस्तु बुद्धिभेदान् वर्णयन् नित्याबुद्धिरूपेण ऐशीं बुद्धि कथयति । लौकिकी बुद्धिस्त्वनित्या एव अतो न्यायसिद्धान्तमुक्तावलीकारः लौकिकीं बुद्धिमेव वर्णयन् तद्भेदान् दर्शयति—

बुद्धिस्तु द्विविधा—अनुभूतिः स्मृतिश्च । तत्र च ज्ञातविषयकं ज्ञानं स्मृतिः तद्व्यतिरिक्तम् अनुभवं नाम । अथवा प्रथमं ज्ञानमनुभूतिः द्वितीयादिकं स्मृति-रिति । यथा—सर्वप्रथमं दृष्टिगतं घटम् अनुभूतिरूपेण बुद्ध्या ग्राह्यते । तस्य द्वितीयादिज्ञाने तु पूर्वघटस्यैव स्मृतिः ।

यत्तु गोपदार्थं प्रथमं दृष्ट्वा तत्सदृश गवयपदार्थं पश्यति तत्र गोविषयकं ज्ञानं स्मृति गवयविषयकन्तु अनुभूतिरेव । इति दिक् ।

अनुभूतिस्तु चतुर्विधा प्रत्यक्षानुमानोपमानशब्दभेदेन । तदेव दर्शनशास्त्रे प्रमाणपदेनाभिधीयन्ते । तत्र इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्, लिङ्गलिङ्गि-पूर्वकं ज्ञानमनुमिति, सादृश्यजन्यं ज्ञानं उपमिति, आप्तवाक्यजं शाब्दमिति कथ्यते ।

अनेन चतुर्विधानुभूतिकथनेन प्रमाणविषयकमन्यमतं निराकृतम् । तत्र केचित् प्रत्यये एकं प्रमाणं स्वीकुर्वन्ति केचन् द्वयं एवं नवविधप्रमाणपर्यन्तं केचन्

केचन् स्वीकुर्वन्ति इति। न्यायदर्शने तेषां चतुर्विधत्वकथनेन अन्यमतानि निराकृतानि।

तत्र इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। तत्रापि मनोरूपेन्द्रिय जन्यं ज्ञानन्तु सर्वमेवेति अतिव्याप्तिः। अत एव इन्द्रियत्वरूपेणेन्द्रियाणां यज्ज्ञानम्प्रति साक्षात् कारणता स्यादित्यर्थं ग्राह्यम्। अथवा साक्षात् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति युक्तम्। तत्रापि योगिप्रत्यक्षे अव्याप्तिरिति चेत् न, योगिनां मनोरूपेन्द्रियेण साक्षात् प्रत्ययः सम्भवतीति। अथवा ईश्वरप्रत्यक्षं नात्र विषयमिति विचारणीयमेव। तदेवोक्तम् न्यायसूत्रकारैः—'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'। (१।१।४)।

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। प्रकृष्टं कारणमेव करणम्। न करणमिति अकरणम्, यस्य ज्ञानस्य करणम् अन्यद् ज्ञानं न भवति तदेव ज्ञानाकरणकं ज्ञानम्। अनेन अनुमानोपमानशब्दजज्ञानानां निवृत्ति। अनुमितौ व्याप्तिज्ञानं करणम्, उपमितौ सादृश्यज्ञानं करणम्, शब्दे पदज्ञानं करण एवमेव स्मृतौ अनुभवज्ञानं करणम्। प्रत्यक्षज्ञाने तु न कस्यचित् इतरज्ञानस्य करणत्वमत एव ज्ञानाकरणमित्युच्यते। ज्ञानाकरणकत्वन्तु ईश्वरप्रत्यक्षेऽपि सामान्यमेव।

परामर्शजन्यं ज्ञानमनुमितिः। परामर्शस्तु 'व्याप्तिविशिष्टपक्षधर्मताज्ञानम्'। यथा—वह्निव्याप्यधूमवानयं पर्वतः। इत्याकारकं यज्ज्ञानं तदेव परमर्शजन्यं ज्ञानमित्यर्थः। परामर्शस्य प्रत्यक्षमपि परामर्शजन्यमेव इति। वह्निव्याप्यधूमवानयं पर्वतः इत्यादौ परामर्शस्य प्रत्यक्षं—परामर्शमहं जानामि इत्याकारकं प्रत्यक्षमपि परामर्शजन्यमेव इति दोषसम्भावना निवारणाय पुनः लक्षणं परिस्करोति परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तदेवानुमितिरिति।

एवं ज्ञानविशिष्टाधारं यद्ज्ञानं तदेवानुमितिः अत एव ज्ञानकरणकं ज्ञानम् अनुमितिरिति।

एवं सादृश्यज्ञानाधारं यज्ज्ञानं तद् उपमिति। यथा कश्चिद् आप्तपुरुषात् प्राप्तं 'यथागौस्तथा गवय' इति वाक्यार्थं स्मरन् वने गत्वा गवयं पश्यति तथा आप्तपुरुषाच्छ्रुतं वाक्यार्थं स्मरन् अयं गौसदृशत्वाद् गवयपदवाच्यः इति जानाति तद् ज्ञानम् उपमितिरिति कथ्यते।

शब्दप्रमाणन्तु श्रुतिवाक्यं आप्तपुरुषादागतं वा। इति सर्वम् उपपन्नम् एव।

(५६) प्रश्नः—प्रत्यक्षस्य लक्षणं तस्य भेदांश्च सम्यङ्निरूप्य तस्य विषयांश्च प्रतिपाद्यताम्।

उत्तरम्—(प्रत्यक्षस्य लक्षणं ५५ तम प्रश्नस्योत्तरे—तत्र इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् इत्यारभ्य ईश्वरप्रत्यक्षेऽपि सामान्यमेव इति पर्यन्तम् द्रष्टव्यम् ।)

प्रत्यक्षं षड्विधम् । प्रथमन्तावत् प्रत्यक्षं द्विविधं लौकिकालौकिकभेदात् । लौकिक प्रत्यक्षं पञ्चविधम् घ्राणादि इन्द्रियसन्निकर्षभेदात् । तद्यथा—घ्राणज-प्रत्यक्षं पृथ्व्या, रासनप्रत्यक्षं जलानाम्, चाक्षुषप्रत्यक्षं तेजसः, त्वाचप्रत्यक्षन्तु वायोः, श्रावणप्रत्यक्षमाकाशस्य ।

एवं घ्राणादीन्द्रियभेदेन प्रत्यक्षस्य विषयाण्यपि पञ्च–घ्राणस्य विषयो गन्धः, रसनाया रसम्, चक्षुषो रूपम्, त्वचः स्पर्शम्, श्रोत्रयोश्च शब्दम् येनेन्द्रियेण यद्-विषयं ग्रह्यते तेनैव तद्गता जातिरपि इति नियमात् गन्धादीनां जातिरूपं गन्ध-त्वादिकमपि तत्तदिन्द्रियेण ग्रह्यते । तदेवोक्तम् ग्रन्थकारैः—

'घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं स्मृतम् ।
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ॥
तथा रसो रसज्ञायास्तथा शाब्दोऽपि च श्रुतेः ।
उद्भूतरूपं नयनस्य गोचरो………… ।
उद्भूत स्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ॥ इति ।

तेषां प्रत्यक्षानां मध्ये चक्षुः उद्भूतरूपस्यैव ग्राहकः, न तु अनुद्भूतरूप-स्यापि । अनुद्भूतरूपन्तु यथा उष्णजलगतम् तेजः । तस्य तु न चक्षुः ग्राहकमिति रूपस्य ग्राहकत्वात् तदाश्रयाः संयोगविभागपरत्वापरत्वस्नेहद्रवत्वपरिमाणक्रिया-जाति-आदीनां ग्रहणम् । रूपव्यतिरिक्तानां येषां विषयाणां चाक्षुषं प्रत्यक्षं तेषां त्वाच प्रत्यक्षमपि सम्भाव्यते । अतो सयोगविभागादीनां येषां पूर्वोक्तानां चाक्षुषं प्रत्यक्षं ग्रह्यते तेषां त्वाच प्रत्यक्षमपि ।

नवीनास्तु गङ्गेशोपाध्याय-गदाधर-जगदीश-मथुरानाथादयः, बहिरिन्द्रिय-जन्यप्रत्यक्षे रूपमात्रमेव न कारणं, न वा स्पर्शमात्रं कारणमिति प्रमाणाभावात् । वायोः अद्भूतरूपाभावेऽपि स्पार्शनप्रत्यक्षं भवति । तथैव कान्त्या उद्भूत-कारणेऽपि उद्भूतस्पर्शाभावेऽपि चाक्षुषं प्रत्यक्षं भवति । इति दिक् ।

वस्तुतस्तु द्रव्याणां प्रत्यक्षे चक्षुरिन्द्रियं त्वगिन्द्रियं वा एव कारणं नान्या-किञ्चित् । चाक्षुषप्रत्यक्षरूपस्यैव स्पर्शं कारणं भवति । अत एव प्रत्यक्षे रूपस्यैव विशेषतोकारणत्वमिति प्राचीना नैयायिकाः । अत एव वायोः "प्रत्यक्षं ते न स्वीकुर्वन्ति, अपि तु घृतिकम्पादिना तदनुमितिं स्वीकुर्वंते । नव्यास्तु बहि-रिन्द्रियजन्य-द्रव्यप्रत्यक्षमात्रे न रूपं कारणं किन्तु अन्वयव्यतिरेकाच्चाक्षुसप्रत्यक्षे

रूपं कारणम् । स्पार्शन प्रत्यक्षे तु स्पर्शः । इति बहिरिन्द्रियद्रव्यप्रत्यक्ष-मात्रे तु न किञ्चित्कारणं अथवा आत्मवृत्तिविशेषगुणत्वं तत्र कारणम् । रूपस्य कारणत्वे लाघवमिति च न वक्तव्यम् । वायोः त्वगिन्द्रियेणाग्रहणप्रसङ्गात् । इति ।

(५७) प्रश्नः—द्रव्यप्रत्यक्षे रूपस्य कारणत्वम् अस्ति न वा ? इति विषय प्राचीन नवीननैयायिक मतम् उपस्थाप्यताम् ।

उत्तरम्—त्वगिन्द्रियेण स्पार्शनप्रत्यक्षं भवति इति सर्वदर्शनसम्मतः सिद्धान्तः तत्र त्वगिन्द्रियेण उद्भूतस्पर्शं, स्पर्शत्वजातिः स्पर्शाभावश्च गृह्यन्ते । तथा च रूपभिन्नं, रूपत्वभिन्नं, रूपाभावभिन्नं यच्चाक्षुषप्रत्यक्षयोग्यम्, तत्त्वगिन्द्रिय-प्रत्यक्षयोग्यमपीति प्राचीनाः । त्वाचप्रत्यक्षेनैव पृथक्त्वसंख्या-संयोग-विभाग-परत्वापरत्व-स्नेह-द्रवत्व-परिमाणादयः गुणक्रियाजातिसमवायादयः अपि चाक्षुषवत् त्वाचप्रत्यक्षयोग्याऽपि ज्ञातव्याः स्पर्शेनापि तत्प्रत्यक्षसम्भवात् । त्वाचप्रत्यक्षे रूपवत्त्वमेव कारणम् । अत एव उद्भूत-रूपाणामेव बहिरिन्द्रियप्रत्यक्षत्वं साधितम् । रूपरहितानां प्रत्यक्षाभावः । अत एव वायोः प्रत्यक्षं न सम्भाव्यते । वृक्षादीनां सञ्चलनात् तदनुमितिः ।

एवं बहिरिन्द्रियप्रत्यक्षविषयानां क्षित्यप्तेजसां प्रत्यक्षं रूपस्य समवाय-सम्बन्ध एव कारणम् । स्पार्शानामेव द्रव्याणां प्रत्यक्षं सम्भाव्यते । रूपसमवायानां द्रव्याणां स्पार्शनवत् त्वाच प्रत्यक्षमपि मन्यते इति निष्कर्षः । तत्राऽपि स्पर्श-रूपयोः कारणत्वे सत्यपि लाघवात् रूपमेव कारणं स्वीकार्यते इति प्राचीननैया-यिकानां मतम् ।

नवीन नैयायिकास्तु गङ्गेशोपाध्याय-गदाधर-जगदीश-मथुरानाथादयः बहि-रिन्द्रियप्रत्यक्षे रूपं कारणत्वेन न स्वीकुर्वन्ति प्रमाणाभावात् । तेषां मतेन 'रूपसत्त्वे वायुप्रत्यक्षसत्त्वं, रूपाभावे वायुप्रत्यक्षाभावः' इत्यन्वय-व्यतिरेके न कश्चिद्युक्तप्रमाणं परिलक्षते । वायौ तु उद्भूतरूपाभावेऽपि स्पार्शनप्रत्यक्षं सम्भवत्येव । तथैव प्रभायाः स्पर्शाभावे रूपसत्त्वात् प्रत्यक्षं भवत्येव । अत एव 'स्पर्श सत्त्वे प्रभाप्रत्यक्षत्वं, स्पर्शाभावे प्रभाप्रत्यक्षाभावः' इत्यन्वयव्यतिरेके न काचिद् युक्तिः ।

अत्र तु यथा प्राचीनानां मतं—'उद्भूतरूपवतामेव प्रत्यक्षं भवति उद्भूत-रूपस्पर्शवताम् तु चाक्षुषप्रत्यक्षः त्वाचप्रत्यक्षश्च भवति । किन्तु यत् स्पर्शः सम्भवति न हि तत् द्रव्यप्रत्यक्षम् । अत एव वायोः प्रत्यक्षमसम्भवमेव ।

अनुमितिरेव तत्र स्वीक्रियते' इति। तन्न युक्तम्। 'रूपसत्त्वे चाक्षुषं प्रत्यक्षं तदभावे तदभावः' तथा च 'स्पर्शसत्त्वे त्वाचं प्रत्यक्षं तदभावे तदभावः' इत्यन्वय-व्यतिरेकेण चाक्षुषप्रत्यक्षे रूपं त्वाचप्रत्यक्षे तु स्पर्शमेव कारणं स्यात्। एवं सति वायोः त्वाचं प्रत्यक्षम् सम्भवति तत्र वायौ अनुमिति कल्पनम् अनावश्यकं गौरवग्रस्तञ्च। इति नवीनानां नैयायिकानाम्मतम्।

(५८) प्रश्नः—'त्वचो योगो मनसा ज्ञानकारणम्' इति कारिकांशः सम्यग्व्याख्येयः।

उत्तरम्—कारिकांशोऽयं ज्ञानसामान्यं प्रति कारणप्रदर्शनेच्छया प्रकाशितः। अत्र त्वङ्मनसंयोगः ज्ञानसामान्यं प्रति साधारणकारणं कथ्यते, सुषुप्तिकाले त्वङ्मनःसंयोगभावे बाह्यज्ञानस्याभावात्। तस्यामवस्थायां मनः त्वगिन्द्रियं विहाय पुरीततिनाडीं प्रति गच्छति। एवं त्वङ्मनःसंयोगाभावे ज्ञानाभावः। त्वङ्मनः संयोगस्य कारणत्वात्।

ननु सुषुप्त्यवस्थायां मनःपुरीततिनाडीसंयोगे किं कारणमिति चेत् उच्यते—'हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते। ताभिः प्रत्यवसृत्य पुरीतति शेते।' (बृहदा०) इति श्रुतिवचनात्। त्वङ्मनः संयोग सत्त्वे सुषुप्त्यवस्थायाम् अपि ज्ञानोदयः स्यादिति न च तदस्तीति कार्याभावे कारणाभावः स्वीकरणीयः।

ज्ञानसामान्यं प्रति मनसः करणत्वन्तु प्रसिद्धमेव। अत एव मनसोऽन्यत्र व्यावृततया ज्ञानसामान्यस्याभावः कल्पनीयः।

ननु सुषुप्त्यावस्थायामपि ज्ञानधारायाः अवच्छिन्नत्वं स्यादिति चेत् न। सुषुप्त्यवस्थायां किं ज्ञानं भविष्यति अनुभवरूपं स्मृति रूपं वा? नानुभवरूपम्, अनुभवसामग्र्यभावात्। अनुभवसामग्री तु इन्द्रियार्थसन्निकर्षः। इन्द्रियाणि विषयं प्रति न संयुज्यन्ते मनःसन्निकर्षाभावात्। चक्षुरादीनां मनः संयोगस्याभावात् न चाक्षुषप्रत्यक्षम्, ज्ञानादेरभावान्न मानसं प्रत्यक्षम्, तस्मादेव न आत्मप्रत्यक्षम्, व्याप्तिज्ञानाभावान्न अनुमितिः। पदज्ञानाभावान्न श्रवणप्रत्यक्षं सादृश्यग्रहणाभावान्नोपमितिः। इति अनुभवज्ञानस्य निरस्तत्वात् स्मृति रूपं ज्ञानं स्यादिति चेत् न। उद्बोधक कारणाभावात् स्मृत्यभावः।

तन्न स्मृतिप्रथमक्षणाव्यवहितपूर्वक्षणे आत्मनि वर्तमानानां इच्छादीनां प्रत्यक्षं सुषुप्ति यावत् स्यादिति तदवच्छिन्नत्वात् आत्मनोऽपि प्रत्यक्षं स्यात्।

तदतीन्द्रियत्वे प्रमाणाभावात् । यत्तु सुषुप्तिप्रथमक्षणव्यवहितपूर्वक्षणे निर्विकल्पकं एव ज्ञानं स्यात् इति न प्रमाणाभावात् ।

अथ त्वङ्मनःसंयोगस्यैव ज्ञानमात्रे कारणत्वे; रासन-चाक्षुषादि प्रत्यक्षेऽपि त्वङ्मनःसंयोगस्यैव कारणत्वं त्वाच्प्रत्यक्षं स्यादिति । अथवा परस्परबाधकभावात् किमपि ज्ञानं न स्यात् इति चेत् न । तत्र केचन चाक्षुषप्रत्यक्षसामग्र्याः त्वङ्मनःसंयोगे विरुद्धत्वम्, अन्ये चर्ममनःसंयोगमेव कारणत्वेन स्वीकुर्वन्ति । न तु त्वङ्मनःसंयोगम् । चाक्षुषप्रत्यक्षकाले त्वङ्मनःसंयोगाभावे न स्पार्शनं प्रत्यक्षं भवतीति स्वीकुर्वन्ति ।

(५९) प्रश्नः—किं नाम निर्विकल्पकज्ञानम् ? तस्य कथं प्रत्यक्षं न ? इति सविस्तरं विविच्यताम् ।

उत्तरम्—इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इति प्रत्यक्षलक्षणं प्रतिपादितम् । तत्रैव प्रथमक्षणजं ज्ञानं निर्विकल्पकं भवति ।

सामान्यतः ज्ञानं द्विविधं—निर्विकल्पकं सविकल्पकञ्चेति । तत्र नामजात्यादियोजनासहितं ज्ञानं सविकल्पकम्, तद्व्यतिरिक्तम् 'इदं किञ्चिद्' एवं रूपं यद्-ज्ञानं तन्निर्विकल्पकं भवति । अथवा विशेषणताशून्यं ज्ञानं निर्विकल्पकम् अथवा विशेष्यताशून्यं ज्ञानं निर्विकल्पकम्, अथवा संसर्गताशून्यं ज्ञानं निर्विकल्पकम् अथवा विलक्षणविषयताशालि ज्ञानं निर्विकल्पकम् अथवा बालमूकादिविज्ञानसदृशं निर्विकल्पकम् इति विविधप्रकारेण निर्विकल्पकज्ञानलक्षणं सम्भाव्यते । तर्कभाषाकारस्तु—'निर्विकल्पकं नामजात्यादि योजनाहीनं वस्तुमात्रावगाहि किञ्चिदिदमिति ज्ञानम्' इति निर्विकल्पकलक्षणं कृतवान् ।

वस्तुतः यज्ज्ञानं इन्द्रियविषयसंयोगस्य प्रथमक्षणे वस्तुविशेषणताशून्यं अथवा वस्तुमात्रावगाहि भवति तदेव निर्विकल्पकम् ।

आचार्य विश्वनाथपञ्चाननस्तु न्यायसिद्धान्तमुक्तावल्याम् अतीन्द्रियमिति कथयति ।

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते । इति ।

तत्र अतीन्द्रियस्यार्थः इन्द्रियज्ञानराहित्यम् आभासमात्रमित्यर्थः । सत्यपि इन्द्रियसंयोगग्राह्ये प्रामाण्याभावात् अतीन्द्रियमित्युच्यते ज्ञानन्तु नामजात्यादि सहितमेव भवति । निर्विकल्पके तु प्रकारता संसर्गराहित्यम्, प्रथम आभासमात्ररूपत्वमित्यर्थः ।

तज्ज्ञानन्तु न प्रत्यक्षम् । प्रत्यक्षे वस्तुआकारप्रकारादिविशेषणविशिष्टताज्ञानस्यावश्यकत्वात् । यथा 'घटमहं जानामि' इत्याकारकं ज्ञानमेव स्वीक्रियते निर्विकल्पकज्ञाने तु न तथाविधं प्रत्यक्षं जायते । ज्ञानन्तु घटत्वविशिष्टघटस्यैव भवति । तस्यापि प्रकारीभूतस्यैव घटस्य प्रत्यक्षमुच्यते । प्रकारत्वन्तु विशेषणं नाम । तदेव प्रमाणपदवीं याति ।

निर्विकल्पके तु प्रकारता संसर्ग शून्यत्वम् । अत एव तन्न प्रमाणम् । इति अलम् ।

(६०) प्रश्नः—षड्विध-प्रत्यक्षे महत्त्वस्य हेतुत्वं प्रतिपाद्यताम् ।

उत्तरम्—इन्द्रियार्थसन्निकर्षं प्रत्यक्षस्य कारणम् । तत्र इन्द्रियार्थसन्निकर्षे षड्विधमहत्त्वं कारणम् ।

महत्परिमाणं द्रव्यप्रत्यक्षे हेतुः । तन्महत् परिमाणमपि षड्विधं, षड्विधेन्द्रियभेदात् । तामहत्परिमाणमेव प्रत्यक्षे कारणम्, अणुद्व्यणुकयोः प्रत्यक्षाभावात् । महत्परिमाणस्तु त्र्यणुकादारभ्य ब्रह्माण्डपर्यन्तम् । तेषामेव प्रत्यक्षः सम्भवः । अर्थात् द्रव्यप्रत्यक्षं प्रति महत्त्वं समवायसम्बन्धेन कारणम् । महत्परिमाणन्तु द्रव्येषु समवायसम्बन्धेन तिष्ठति ।

गुणकर्मादीनां प्रत्यक्षेऽपि महत्त्वमेव कारणम् । परन्तु गुणकर्मादिषु महत्त्वं न दृश्यते । महत्त्वन्तु गुणम्, गुणं द्रव्येष्वेव समवायसम्बन्धेन कारणम् । गुणकर्मादिषु गुणा न तिष्ठन्ति अत एव गुणेषु महत्त्वं स्वाश्रयसमवायसम्बन्धेन कारणं भवति । तस्यार्थः महत्त्वस्य आश्रयं द्रव्यम्, तत्र गुणः समवायसम्बन्धेन वर्तते । एव कर्मणां प्रत्यक्षे महत्त्वं स्वाश्रयसमवेतसमवायसम्बन्धेन वर्तते । महत्त्वाश्रयं द्रव्यमेव । तत्र कर्माणि समवेतसमवायसम्बन्धेन तिष्ठन्तीति दिक् ।

(६१) प्रश्नः—किं नामेन्द्रियत्वम् ? न्यायसिद्धान्तमुक्तावलीदिशा तस्य जातित्वं निराक्रियताम् ।

उत्तरम्—इन्द्रियत्वं वर्णयन् ग्रन्थकारः 'इन्द्रियं करणं मतम्' इति कारिकांशं प्रस्तौति । तत्रैव वृत्तिग्रन्थे—

'.........इन्द्रियत्वं न जातिः, पृथ्वीत्वादिना साङ्कर्यप्रसङ्गात् । किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम् ।' इति विवेचयति । तस्यार्थः—सत्यपि अनेकत्वे, प्रत्येककार्यकारणकल्पनापेक्षया जातिकल्पने लाघवे च इन्द्रियत्वं न जातिरूपेण कल्प्यते । इन्द्रियत्वं

जातिरूपेण कल्पने न सङ्करेति जातिबाधकदोषस्य सम्भवात् । अत्र सङ्करदोषस्य स्वरूपं प्रदश्यते—चक्षुरादिषु इन्द्रियेषु पृथ्वीत्वधर्मातिरिक्तमिन्द्रियत्वधर्मः स्यात् । इन्द्रियत्वधर्मातिरिक्तम् घ्राणेन्द्रियादिषु पृथ्वीत्वं स्यात् एवं घ्राणेन्द्रिये इन्द्रियत्व-पृथ्वीत्वधर्मयोः साङ्कर्यम् । एवमन्यत्रापि कल्पनीयम् । अतः इन्द्रियत्वं न जातिः । उपाधिरेव तत् । अत्रानुमानप्रक्रिया यथा—'इन्द्रियत्वं जातित्वा-भाववत् स्वभाववद् वृत्तिसमानाधिकरणधर्माभाववद्वत्तित्वात् ।

इन्द्रियलक्षणन्तु यथा—शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकरण-मनःसंयोगाश्रयत्वमिन्द्रियत्वम् । शब्दातिरिक्ता प्रत्यक्षयोग्या ये विशेषगुणाः रूप-सुखादयः तेषामनाश्रयत्वे ज्ञानस्यासाधारणकारणीभूतः यः इन्द्रियमनःसंयोगः तदाश्रयत्वम् इन्द्रियत्वम् । ज्ञानकरणमनःसंयोगमात्रमाऽपि तत्रातिव्याप्ति निवा-रणाय सत्यन्तम् श्रोत्रेन्द्रियेऽतिव्याप्तिनिवारणाय शब्देतरेति । विशेषगुणस्य रूपादेः चक्षुरादावपि सत्त्वात् उद्भूतेति पदम् ।

इति इन्द्रियलक्षणमिदं पूर्णमित्यर्थः ।

(६२) प्रश्नः—षड्विधसन्निकर्षम् उदाहरणप्रदर्शनपूर्वकं निरूपयत ।

उत्तरम्—इन्द्रियार्थसन्निकर्षं अथवा विषयेन्द्रियसम्बन्धं व्यापार इत्युच्यते तत्तु षड्विधम् । तदेवोक्तं न्यायसिद्धान्तमुक्तावलीकारैः—

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।।
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ।।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ।।
विशेषणतया तद्वदभावानां ग्रहो भवेत् । इति ।

व्यापारो नाम विषयेन्द्रियसम्बन्धः । 'तज्जन्यत्वे सति तज्जन्यजनको व्यापारः' इति व्यापारस्य सामान्यं लक्षणम् । करणेन जन्यः तत्फलजनकश्चे-त्यर्थः । यथा—छिदाया करणेन जन्यः छेदनरूप व्यापारः वृक्षद्विधाकरणरूप-फलस्य जनकः अत एव तद्व्यापार इत्यर्थः । तथैव विषयेन्द्रियसम्बन्धः तत्फल-स्य ज्ञानस्य जनकः अत एव इन्द्रियजन्यत्वात् व्यापार इति कथ्यते ।

तद्व्यापारस्तु षड्विधः—इन्द्रियैः द्रव्यग्रहणं सयोगसम्बन्धेन भवति । द्रव्ये

तज्ज्ञानन्तु न प्रत्यक्षम् । प्रत्यक्षे वस्तुआकारप्रकारादिविशेषणविशिष्टता-ज्ञानस्यावश्यकत्वात् । यथा 'घटमहं जानामि' इत्याकारकं ज्ञानमेव स्वीक्रियते निर्विकल्पकज्ञाने तु न तथाविधं प्रत्यक्षं जायते । ज्ञानन्तु घटत्वविशिष्टघट-स्यैव भवति । तस्यापि प्रकारीभूतस्यैव घटस्य प्रत्यक्षमुच्यते । प्रकारत्वन्तु विशेषणं नाम । तदेव प्रमाणपदवीं याति ।

निर्विकल्पके तु प्रकारता संसर्ग शून्यत्वम् । अत एव तन्न प्रमाणम् । इति अलम् ।

(६०) प्रश्नः—षड्विध-प्रत्यक्षे महत्त्वस्य हेतुत्वं प्रतिपाद्यताम् ।

उत्तरम्—इन्द्रियार्थसन्निकर्षं प्रत्यक्षस्य कारणम् । तत्र इन्द्रियार्थसन्निकर्षं षड्विधमहत्त्वं कारणम् ।

महत्परिमाणं द्रव्यप्रत्यक्षे हेतुः । तन्महत् परिमाणमपि षड्विधं, षड्विधे-न्द्रियभेदात् । तामहत्परिमाणमेव प्रत्यक्षे कारणम्, अणुद्व्यणुकयोः प्रत्यक्षा-भावात् । महत्परिमाणस्तु त्र्यणुकादारभ्य ब्रह्माण्डपर्यन्तम् । तेषामेव प्रत्यक्षः सम्भवः । अर्थात् द्रव्यप्रत्यक्षं प्रति महत्त्वं समवायसम्बन्धेन कारणम् । महत्परिमाणन्तु द्रव्येषु समवायसम्बन्धेन तिष्ठति ।

गुणकर्मादीनां प्रत्यक्षेऽपि महत्त्वमेव कारणम् । परन्तु गुणकर्मादिषु महत्त्वं न दृश्यते । महत्त्वन्तु गुणम्, गुणं द्रव्येष्वेव समवायसम्बन्धेन कारणम् । गुण-कर्मादिषु गुणा न तिष्ठन्ति अत एव गुणेषु महत्त्वं स्वाश्रयसमवायसम्बन्धेन कारणं भवति । तस्यार्थः महत्त्वस्य आश्रयं द्रव्यम्, तत्र गुणः समवायसम्बन्धेन वर्तते । एव कर्मणां प्रत्यक्षे महत्त्वं स्वाश्रयसमवेतसमवायसम्बन्धेन वर्तते । महत्त्वाश्रयं द्रव्यमेव । तत्र कर्माणि समवेतसमवायसम्बन्धेन तिष्ठन्तीति दिक् ।

(६१) प्रश्नः—किं नामेन्द्रियत्वम् ? न्यायसिद्धान्तमुक्तावलीदिशा तस्य जातित्वं निराक्रियताम् ।

उत्तरम्—इन्द्रियत्वं वर्णयन् ग्रन्थकारः 'इन्द्रियं करणं मतम्' इति कारि-कांशं प्रस्तौति । तत्रैव वृत्तिग्रन्थे—

'.........इन्द्रियत्वं न जातिः, पृथ्वीत्वादिना साङ्कर्यप्रसङ्गात् । किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम् ।' इति विवेचयति । तस्यार्थः—सत्यपि अनेकत्वे, प्रत्येककार्यकारणकल्पना-पेक्षया जातिकल्पने लाघवे च इन्द्रियत्वं न जातिरूपेण कल्प्यते । इन्द्रियत्वं

जातिरूपेण कल्पने न सङ्करेति जातिबाधकदोषस्य सम्भवात्। अत्र सङ्करदोषस्य स्वरूपं प्रदश्यते—चक्षुरादिषु इन्द्रियेषु पृथ्वीत्वधर्मातिरिक्तमिन्द्रियत्वधर्मः स्यात्। इन्द्रियत्वधर्मातिरिक्तम् घ्राणेन्द्रियादिषु पृथ्वीत्वं स्यात् एवं घ्राणेन्द्रिये इन्द्रियत्व-पृथ्वीत्वधर्मयोः साङ्कर्यम्। एवमन्यत्रापि कल्पनीयम्। अतः इन्द्रियत्वं न जातिः। उपाधिरेव तत्। अत्रानुमानप्रक्रिया यथा—'इन्द्रियत्वं जातित्वाभाववत् स्वभाववद् वृत्तिसमानाधिकरणधर्माभाववद्वत्तित्वात्।

इन्द्रियलक्षणन्तु यथा—शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकरणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। शब्दातिरिक्ता प्रत्यक्षयोग्या ये विशेषगुणाः रूपसुखादयः तेषामनाश्रयत्वे ज्ञानस्यासाधारणकारणीभूतः यः इन्द्रियमनःसंयोगः तदाश्रयत्वम् इन्द्रियत्वम्। ज्ञानकरणमनःसंयोगमात्माऽपि तत्रातिव्याप्ति निवारणाय सत्यन्तम् श्रोत्रेन्द्रियेऽतिव्याप्तिनिवारणाय शब्देतरेति। विशेषगुणस्य रूपादेः चक्षुरादावपि सत्त्वात् उद्भूतेति पदम्।

इति इन्द्रियलक्षणमिदं पूर्णमित्यर्थः।

(६२) प्रश्नः—षड्विधसन्निकर्षम् उदाहरणप्रदर्शनपूर्वकं निरूपयत।

उत्तरम्—इन्द्रियार्थसन्निकर्षं अथवा विषयेन्द्रियसम्बन्धं व्यापार इत्युच्यते तत्तु षड्विधम्। तदेवोक्तं न्यायसिद्धान्तमुक्तावलीकारैः—

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः॥
द्रव्येषु समवेतानां तथा तत्समवायतः।
तत्रापि समवेतानां शब्दस्य समवायतः॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।
प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥
विशेषणतया तद्वदभावानां ग्रहो भवेत्। इति।

व्यापारो नाम विषयेन्द्रियसम्बन्धः। 'तज्जन्यत्वे सति तज्जन्यजनको व्यापारः' इति व्यापारस्य सामान्यं लक्षणम्। करणेन जन्यः तत्फलजनकश्चेत्यर्थः। यथा—छिदाया करणेन जन्यः छेदनरूप व्यापारः वृक्षद्विधाकरणरूपफलस्य जनकः अत एव तद्व्यापार इत्यर्थः। तथैव विषयेन्द्रियसम्बन्धः तत्फलस्य ज्ञानस्य जनकः अत एव इन्द्रियजन्यत्वात् व्यापार इति कथ्यते।

तद्व्यापारस्तु षड्विधः—इन्द्रियैः द्रव्यग्रहणं सयोगसम्बन्धेन भवति। द्रव्ये

समवेतानां गुणकर्मणां ग्रहणं संयुक्तसमवायसम्बन्धेन, तत्र समवेतानां गुणत्व-कर्मत्वादीनां सन्निकर्षस्तु संयुक्तसमवेतसमवायसम्बन्धेन भवति। श्रवणेन्द्रियैः शब्दसन्निकर्षस्तु समवायः, तत्रैव शब्दत्वसन्निकर्षः समवेतसमवायसम्बन्धेन भवति। समवायस्य ग्रहणं विशेषणतासम्बन्धेन भवति। तेनैव विशेषणतासम्बन्धेन अभावस्यापि ग्रहणं भवति इति षड्विध इन्द्रियार्थसन्निकर्षः।

एतदखिलप्रत्यक्षन्तु लौकिक एव। तत्र बाह्यकरणस्यापेक्षितत्वात् यद्यत् बाह्यकरणजन्यप्रत्यक्षं तत्तत् लौकिकं प्रत्यक्षम्। अलौकिकप्रत्यक्षे तु बाह्यकरणानामनपेक्षितत्वम्। तदलौकिकप्रत्यक्षमपि लौकिकप्रत्यक्षमिव षड्विधम्। तत्रापि न किञ्चिद्विशेषः। तत्र आत्मनः प्रत्यक्षे मनः सयोगः, आत्मविशेषगुणानां सुखादीनां प्रत्यक्षे सयुक्तसमवायसन्निकर्षः। एवमन्यत्रापि ज्ञातव्यम्।

(६१) प्रश्नः—'यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते' इति कारिकांशं व्याख्यायताम्।

उत्तरम्—निषेधमुखेन प्रतीतिविषयिकेयं कारिका। अस्यार्थः—यत्रेयं प्रसङ्ग आपतति यत्र यत्र प्रतियोगिसत्त्वं तत्र तत्र तस्योपलब्धिः, (न चात्र घट उपलभ्यते अत एव नात्र तस्य सत्त्वम्, इत्यभावग्रहणे हेतुः)।

यत्र यत्र प्रतियोग्यप्रत्यक्षत्वं तत्र तत्र अभावप्रत्यक्षत्वम्। (यद्यपि अभावं पृथक्रूपेण प्रमाणत्वेन न स्वीकुर्वन्ति नैयायिकाः अभावप्रतियोग्यप्रत्यक्षत्वमेव अभावप्रत्यक्षत्वमिति)। अस्यार्थः यत्र यत्र घटप्रत्यक्षत्वं तत्र तत्र घटभावासत्त्वम्। (तदेवोक्तं न्यायसूत्रकारैः—'शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावादर्थान्तरभावाच्चाप्रतिषेधः' इति।) अभावप्रत्यक्षे प्रतियोगिज्ञानस्याभावस्य हेतुत्वम्। प्रतियोग्युपलम्भाभावे योग्यताऽप्यपेक्षिता। योग्यताविशिष्टं यत्प्रतियोग्युपलम्भाभाव तदेव प्रतियोग्यभावप्रत्यक्षे हेतुः। सा योग्यता प्रतियोगिसत्त्वापादनेनापादिता प्रतियोगिकत्वरूपा। घटादिप्रतियोगिप्रसक्त्या यस्य प्रतियोगिनः उपलम्भरूपेणापादनं भवति तदेवोपलम्भाभावः अभावप्रत्यक्षे हेतुः। यथा—सत्यपि प्रकाशसंयोगे यदि घटः स्यात् तर्हि उपलभ्येत (चाक्षुषप्रत्यक्षविषयः स्यात्)। अन्धकारे तु घटस्य स्पार्शनं प्रत्यक्षः भवति। अत एव अन्धकारे स्पार्शनप्रत्यक्षाभावे (त्वाचप्रत्यक्षाभावे) घटाभाव एव कारणम्।

अत एव गुरुत्वादीनामभावस्य प्रत्यक्षं न सम्भवति। गुरुत्वादीनां प्रत्यक्षाभावात्। वायौ रूपभावः पाषाणे गन्धाभावः, गुणे तिक्तरसाभावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाभावः, एवमादयः तत्तदिन्द्रियैः प्रत्यक्षविषयतां यान्ति अर्थात्

येनेन्द्रियेण यद्विषयग्रहणं तेनैव तदभावोऽपि । संसर्गाभावे तु प्रतियोगिनः योग्यता अन्योऽन्याभावे अधिकरणस्य योग्यता उपलक्ष्यते । इत्यलं विस्तरेण ।

(६४) प्रश्नः—अलौकिकसन्निकर्षः कतिविधः ? तान् उदाहरणद्वारा पतिपादयत ।

उत्तरम्—सन्निकर्षः द्विविधः—लौकिकोऽलौकिकश्च । लौकिकः सन्निकर्ष षड्-विधः संयोगसंयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्याभावभेदात् । अलौकिकसन्निकर्षः त्रिविधः—सामान्यलक्षणज्ञान-लक्षण-योगजभेदात् ।

सामान्यमस्ति लक्षणं (स्वरूपं) यस्य सः सामान्यलक्षणसन्निकर्षः । सामान्यन्तु अनुवृत्तिप्रत्ययहेतुः । यथा अयं घट अयं घट इति वारम्बारप्रतीत्या यद् घटदर्शनसमकालमेव घटत्वप्रतीतिः तदेव सामान्यलक्षणोऽलौकिकः सन्निकर्ष इति कथ्यते । अथवा घटदर्शनानन्तरमेव घटत्ववानयं घटः इत्येवंरूपा या घट-सामान्यविषयका प्रतीतिः तदेव सामान्यलक्षणसन्निकर्ष इति कथ्यते । तद्विरहे तु सविकल्पकप्रतीतिरेव न भवतीति दिक् ।

ज्ञानलक्षणप्रत्यक्षस्तु सुरभिचन्दनमितिवत् । सुरभिपूर्णं भूयोभूयः अनुभूय ज्ञातसंस्कारः चन्दनचक्षुसन्निकर्षानन्तरमेव सुरभिपूर्णमिदं चन्दनमितिवत् प्रतीतिः जायते तत्र चक्षुषोः सौरभग्रहणासामर्थ्येऽपि सुरभिचन्दमिति प्रतीतिः जायते । तदेव ज्ञान लक्षणसन्निकर्षः ।

योगजसन्निकर्षस्तु युक्त युञ्जानभेदात् द्विविधम् । युक्तयोगजसन्निकर्षन्तु सिद्धतपस्विनां यथा 'सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन' इत्येवंरूपा या प्रतीतिः सा सिद्धयोगिभिरेव सम्भवत्वात् युक्तयोगिसन्निकर्षात्मिका । चिन्तन-ध्यानसहकृता या तपनिरतानां प्रतीति तद् युञ्जानयोगिसन्निकर्षात्मिका । इति दिक् ।

(६५) प्रश्नः—सामान्यलक्षणसन्निकर्षस्य स्वरूपं प्रपिपाद्यताम् ।

उत्तरम्—अनुमितिज्ञानप्रत्यक्षे यत् 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इत्येवं रूपा या व्याप्तिः ग्रहीता तत्र बौद्धैराक्षेपः क्रियते अखिलब्रह्माण्डवर्तिनां धूम-वह्नि-साहचर्यदर्शनमन्तरेण व्याप्तिग्रहणमसम्भवमिति । न च कश्चिदपि सकल वह्नि-धूमसाहचर्याणाम् दृष्टा सम्भवेत् अतः अनुमानन्तु प्रमाणमेव व्यर्थमिति बौद्धाना-

माक्षेपस्यार्थः । अत एव नैयायिकैः सामान्यलक्षणसन्निकर्षरूपमलौकिकसन्निकर्षः कल्पितः । तदेव व्याख्यायते न्यायसिद्धान्त-मुक्तावलीकारैः—

सामान्यमस्ति लक्षणं (स्वरूपं) यस्य सः सामान्यलक्षणः । तथाविधः सन्निकर्षः सामान्यलक्षणसन्निकर्ष इत्युच्यते । इन्द्रियसम्बद्धविशेष्यवत् यद्विशेषणं तस्य ज्ञानं सामान्यलक्षणसन्निकर्षेण भवतीति । यथा इन्द्रियसंयुक्तो धूमस्तत्सम्बद्धं यद् धूमत्वरूपं विशेषणं तस्य ज्ञानं येन अलौकिकसन्निकर्षेण भवति तदेव सामान्यलक्षणसन्निकर्षम् । तत्र तेन धूमत्वेनैव समस्तधूमानां सन्निकर्षं कल्पते । अत्र इन्द्रियसम्बद्धं यद् विशेष्यं तस्य यद्विशेषणरूपमित्यस्य स्थाने इन्द्रियसम्बद्धमित्येवं स्यात् तर्हि धूलीपटलसमूहे यद्धूमादिभ्रमः तत्र बाधः स्यात्, धूमत्वेन सहेन्द्रियसम्बन्धाभावात् । तत्र धूमत्वेनेन्द्रियसम्बन्धस्तु लौकिकः संयुक्तसमवायः । तेन सकलधूमानां ग्रहणमलौकिकः, अत एव अलौकिकः सन्निकर्षमध्ये तस्य ग्रहणम् ।

अत्र सामान्यशब्दं नहि जातिरूपार्थबोधकम् साधारणधर्मबोधकमेव तत् । तेन सामान्यं द्विविधम्-नित्यम् अनित्यञ्च । नित्यं जातिरूपं यथा धूमत्वम् । अनित्यन्तु घटवत् । कदाचित् घटाधिकरणरूपं भूतलं कदाचिच्च घटाभावाधिकरणवत् इति । सामान्यस्तु येन सम्बन्धेन अधिकरणे दृश्यते तेनैव सम्बन्धेनैव तत्र सन्निकर्षः स्वीकर्तव्यम् । यथा घटवति घटस्य संयोग सन्निकर्षः अनेन गृहीतं यद् सामान्यलक्षणसन्निकर्षः तदपि संयोगसन्निकर्ष एव स्यात् । इत्यलम् ।

इति प्रत्यक्षखण्डम् ।

अनुमानखण्डः

(६६) प्रश्नः—परामर्शस्य स्वरूपं प्रतिपाद्य, अनुमितिं प्रति तस्य कारणत्वं प्रतिपाद्यताम् ।

उत्तरम्—'लिङ्गस्य तृतीयं ज्ञानं परामर्शः ।' वह्निव्याप्य धूमवानयं पर्वतः इत्यत्र तृतीयं ज्ञानं दर्शयति । महानसे भूयो भूयः वह्नि-धूमयोः सहचारदर्शनं प्रथमं ज्ञानम्, पर्वते धूमदर्शनं द्वितीयं ज्ञानम्, वह्निव्याप्यधूमवानयं पर्वतः इति तृतीयं ज्ञानम् । तत्तृतीयं ज्ञानमेव परामर्श इत्युच्यते ।

किञ्च व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । व्याप्तिस्तु अन्वयव्यतिरेकात्मिका । यथा—'यत्र यत्र धूमः तत्र तत्र वह्निः यथा महानसे' इति भूयो भूयः सहचारदर्शनजन्यज्ञानमेव व्याप्तिः । तद्विशिष्टं यत् पक्षधर्मताज्ञानम् पक्षे पर्वतादौ धर्मत्ववह्नित्वज्ञानम् तदेव परामर्शः तेन वह्निव्याप्यधूमवानयं पर्वतः इति परामर्शः ।

अथवा व्याप्तिवैशिष्टयावगाहिज्ञानं परामर्शः । व्याप्तिस्तु महानसे वह्नि-धूमयोः भूयोभूयः सहचारदर्शनम् । तद्वैशिष्टयावगाहि यत् पर्वते वह्निज्ञानं तदेव परामर्श इति ।

तदेवोक्तम्—

'व्याप्यस्य पक्षधर्मत्वधीः परामर्श उच्यते' । इति

'व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्टयावगाहिज्ञानमनुमितौ जनकम्' इति च ।

परामर्शस्तु द्विविधः 'पक्षे व्याप्य' इति 'पक्षो व्याप्यवान्' इति च द्विविधपरामर्शस्य प्रकारम् । तत्र प्रथमेन ज्ञानेन 'पक्षे साध्यम्' इति परामर्शः, द्वितीयेन च 'पक्षः साध्यवान्' इत्याकारिकः परामर्शः जायते अनुमितिस्तु द्विविधादेव परामर्शात् समानमेव ।

व्याप्तिरपि द्विविधा—स्वाभाविकी औपाधिकी च । स्वाभाविकी तु यथा—'यत्र यत्र धूमस्तत्र तत्र वह्निः ।' औपाधिकी यथा—'यत्र यत्र मैत्रीतनयत्वं तत्र तत्र श्यामत्वम्' इति तत्र उपाधिस्तु शाकाद्याहारत्वम् । अत्र प्रथमैव व्याप्तिः परामर्शजनिका ।

परामर्शस्तु अनुमिति प्रति कारणं साधकमित्यर्थः। अनुमितेः नियतपूर्वभावित्वात् अनन्यथासिद्धत्वाच्च। परामर्शसाहाय्यादेव अनुमानसाफल्यात्। अत एव लिङ्गस्य परामर्शं प्रति कारणमिति। यत्तु लिङ्गपरामर्शोऽनुमानमिति कथयन्ति तदपि नायुक्तम् 'वह्निव्याप्यधूमवानयं पर्वतः' एवं रूपमेव अनुमानस्य सत्त्वात्। तर्हि कथम् कारणमित्युक्तम् चेत् परामर्शस्तु प्रक्रियात्मकः। अनुमानस्तु फलात्मक इति भेदात्।

(६७) प्रश्नः—अनुमानस्य पञ्चावयवान् निरूपयत।

उत्तरम्—प्रतिज्ञा-हेतूदाहरणोपनय-निगमनानि पञ्चावयवाः अनुमानस्य। तान् 'पर्वतो वह्निमान् धूमवत्त्वात्' इति वाक्ये दर्शयामः—

१. प्रतिज्ञा—पर्वतो वह्निमान्।

२. हेतुः—धूमवत्वात्।

३. उदाहरणम्—यो यो वह्निमान् स सोऽग्निमान् यथा महानसः।

४. उपनयम्—तथा (धूमवान्) चायम्।

५. निगमन्—तस्मात्तथा (वह्निमान्)।

इति पञ्चरूपोपपन्नत्वम्। तथा चानुमिति प्रक्रिया तु पञ्चावयवानां संयोग एव। यथा—पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो वह्निमान् स सोऽग्निमान् यथा महानसः, तथा चायम्, तस्मात्तथा।

अत्र वह्नि व्याप्यधूमवानयं पर्वतः इत्येव संक्षेपेण तथा चायं तस्मात्तथा इति संक्षेपेणोक्तम्। इति।

(६८) प्रश्नः—अनुमानस्य पञ्चरूपोपपन्नत्वं दर्शयत।

उत्तरम्—अनुमानसाधनप्रक्रियायां पञ्चरूपाणां साध्यत्वं आवश्यकम्। तानि पञ्चरूपाणि—पक्षसत्त्वम्, सपक्षसत्त्वम्, विपक्षव्यावृत्तत्वम्, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वञ्च। तत्र—पर्वतो वह्निमान् धूमात् इति उदाहरणे—

१. पक्षसत्त्वम्—पक्षे सत्त्वमिति, धर्मिणि साध्यत्वमित्यर्थः। यत्र धर्मिणि साध्यस्य निश्चितमिति यावत्। अत्र पर्वतः पक्षः वह्निः साध्यः तस्य निश्चय एव पक्षसत्त्वमित्युच्यते।

२. सपक्षसत्त्वम्—सपक्षस्तु पक्षसाधकम् उदाहरणम्। तत्र सत्त्वम् अस्तित्वमित्यर्थः। सपक्षे तु साध्यस्य सत्त्वम् अन्वयव्याप्तिप्रदर्शनायावश्यकमस्त्येव। अत्र उदाहरणे सपक्षस्तु महानसः तत्र साध्यस्य वह्नेः सत्त्वमावश्यकम्।

३. विपक्षव्यावृत्तत्वम्—विपक्षस्तु व्यतिरेकव्याप्तेरङ्गम् तत्र साध्यस्य असत्त्वं निश्चितं स्यादित्यर्थः। अत्र उदाहरणे महाह्रदं एव विपक्षः। तत्र असत्त्वम् वह्नेरभावं निश्चितमित्यर्थः।

४. अबाधितविषयत्वम्—पक्षे साध्यस्य सत्त्वे बाधाभाव एव अबाधितविषयत्वम्। यत्र धर्मिणि साध्यानुमितौ प्रयुक्तहेतौ साध्ये अभावस्य सत्त्वमेव निश्चितं स्यात्।

५. असत्प्रतिपक्षत्वम्—सत्प्रतिपक्षस्याभाव एव असत्प्रतिपक्षत्वम्। यत्र हेतौ प्रतिपक्षस्य सर्वथाऽभाव एव स्यात्। तदेव असत्प्रतिपक्षत्वम् इति उच्यते।

एवं पञ्चरूपोपपन्नैः हेतुभिः अनुमितिर्लभ्यते इत्यर्थः।

(६९) प्रश्नः—हेत्वाभासान् निरूपयत।

उत्तरम्—हेतोराभासा इति व्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वम् अभिप्रेतम्। हेतवः अनुमानसाधने कारणरूपाः ये हेतव न सन्तोऽपि हेतुवत्प्रतीयन्ते ते हेत्वाभासा इति कथ्यन्ते। ते पञ्चविधा यथा—

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा॥

अस्यार्थः हेत्वाभासाः पञ्च—१. अनैकान्तिकः, २. विरुद्धः, ३. असिद्धः ४. सत्प्रतिपक्षः, ५. बाधितविषयश्च इति।

१. अनैकान्तिकः—अनैकान्तिकः १. साधारण, २. असाधारण, ३. अनुपसंहारिति भदेन त्रिधा। तत्र—

साधारणः—साध्यवदन्यवृत्तिः अनैकान्तिक हेतु साधारण इति कथ्यते। साध्याधिकरणव्यतिरिक्तस्थानेऽपि वर्तमान इत्यर्थः। यथा 'पर्वतो धूमवान् वह्नेः' इत्यत्र धूमवत्त्वं साध्यं वह्निः हेतुः, स तु पर्वतरूपपक्षात्, महानसरूपसपक्षात् भिन्नेऽपि तप्तायः पिण्डे दृश्यते परन्तु तत्र धूमाभावः। अत एव अनुमितेः करणत्वमनुपपन्नम् इति।

असाधारणः— असाधारणस्तु साध्यसमानाधिकरणो हेतुः व्यभिचारी सन् असाधारण इत्युच्यते। यथा शब्दो नित्यः शब्दत्वात्। अत्र शब्दत्वम् हेतु न तु शब्दस्य नित्यत्व साधकः न वा अनित्यत्व बाधक अत एव शब्दोऽनित्यः शब्दत्वात् इत्यपि तथा।

अनुपसंहारी—अनुपसंहारी तु यस्य साध्यपक्षहेतवः अत्यन्ताभावाप्रतियोगिनः भवन्ति तत् अनुपसंहारीत्युच्यते । अनेन व्यतिरेकज्ञान प्रतिबन्धः क्रियते ।

२. विरुद्धः—यः हेतुः साध्ये नैवास्ति स विरुद्ध इति कथ्यते । यथा शब्दोनित्यः कृतकत्वात् । अत्र कृतकत्वं हेतुः विरुद्धः ।

३. असिद्धः—असिद्धहेत्वाभासस्त्रिधा—आश्रयासिद्ध-स्वरूपासिद्ध - व्याप्यत्वासिद्धभेदात् ।

आश्रयासिद्धः—यथा गगनारविन्दः सुरभिः अरविन्दत्वात्, वाप्यरविन्दवत् । इत्यत्र अरविन्दत्वात् हेतुः गगनश्चाश्रयः । आकाशे अरविन्दस्यैवाभावः अतः सुरभिसाधनन्तु अनर्थकम् ।

स्वरूपासिद्धः—यथा शब्दो गुणः चाक्षुषत्वात् रूपवत् । अत्र हेतुः चाक्षुषत्वात् इति पदम् । स तु स्वरूपेण असिद्धः शब्दस्तु न चाक्षुषः श्रावण एव तत् ।

व्याप्यत्वासिद्धः—सोपाधिकः हेतु व्याप्यत्वासिद्धः । यथा पर्वतो धूमवान् वह्निमत्वात्, महानसवत् । अत्र वह्निमत्त्वात् इति हेतुः धूमवत्त्वं साध्यम् । उपाधिश्च आर्द्रेन्धनसंयोगः ।

४. सत्प्रतिपक्षः—यस्य हेतोः प्रतिपक्षः तथैव बलवान् वर्तते स सत्प्रतिपक्ष इत्युच्यते यथा—'शब्दो नित्यः श्रवणत्वात्' इति अत्र श्रावणत्वम् हेतुः नित्यत्वं कार्यम् तत्प्रतिपक्षस्तु 'शब्दोऽनित्यः कार्यत्वात् घटवत्' ।

५. बाधितविषयः—यस्य हेतोः पक्षे बाधः सम्भवति तद् बाधितविषय इत्युच्यते यथा 'वह्निरनुष्णो द्रव्यत्वात् घटवत्' अत्र द्रव्यत्वम् हेतु अनुष्णत्वं साध्यम् तच्च प्रत्यक्षविरुद्धः । इति ।

इति अनुमानखण्डं समाप्तम्

उपमानखण्डम्

(७०) प्रश्नः— उपमितिं निरूपयत ।

उत्तरम्—उपमितिः उपमाबोध्यः प्रमाणविशेषः उपमितिरित्युच्यते । यथा कश्चित् वृद्धः कञ्चिद्बालमुपदिशति—यथा गोस्तथा गवय इति गवयपदार्थमजानन्तं बालं प्रति कृतोपदेशः कदाचित्तं गवयसाक्षात्कारे सति गवयपदार्थं बोधयति । तदेव निर्दिशति ग्रन्थकारः—

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मता ॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमाफलम् ॥ इति ।

तत्र गवयमजानतः जनस्य गवयपदार्थदर्शने जाते वृद्धवाक्यस्मरणात् यद् गवयादिबोधः तदेव उपमितिः प्रमाणम् ।

अत्र केचन सांख्यादयो उपमितिं पृथक् प्रमाणत्वेन न स्वीकुर्वन्ति अनुमाने एव तस्यान्तर्भावकथनात् । नैतद्युक्तमिति नैयायिकाः । अनुमानस्तु व्याप्तिमूलः लिङ्गपरामर्शात्मक नोपमितिस्तथा । गोपदार्थस्यापि न लिङ्गत्वम् हेतुभिन्नत्वात् । न वा स्मृतेर्लिङ्गत्वं विषयासम्बद्धत्वात् । स्मृतिस्तु न विषयस्य लिङ्गम् बुद्धेर्लिङ्गमेव तत् इति ।

अत एव उपमानं पृथगेवप्रमाणम् सादृश्यमूलत्वात् । अत्र न काचिद् विचिकित्सा स्यादिति अलं विस्तरेण ।

इत्युपमानखण्डं समाप्तम् ।

शब्दखण्डम्

(७१) प्रश्नः—पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी ॥

इति कारिका सप्रपञ्चं व्याख्येया ।

उत्तरम्—शाब्दबोधः फलम् । पदज्ञानादयः साधनभूताः । किंवा शाब्दबोधः कार्यम् पदज्ञानादयः कारणभूतानि । तत्र—यथा लोके घटरूपकार्याय मृत्पिण्डभूतकरणेन दण्डचक्रादिभिः सहकारिकारणैः व्यापारवान् कुम्भकारः घटं करोति तथैवात्र शाब्दबोधरूपफललाभाय पदज्ञानरूपकरणेन शब्दशक्तिरूपैः सहकारिभिः पदार्थज्ञानरूपं व्यापारं क्रियते । इति ग्रन्थकारस्याभीष्टम् ।

पदज्ञानं तु करणमिति । करणं साधकतममिति वैयाकरणाः । कारणानां मध्ये यत्प्रकृष्टरूपेण कारणं तदेव करणमिति वृद्धाः । तस्यार्थः यथा घटरूपकार्याय मृत्पिण्डं कपालं वा करणम् यथा वा पटकार्याय तन्तु एव करणं तथैव शाब्दबोधाय पदज्ञानं करणभूतमित्यर्थः ।

पदज्ञानमिति ज्ञायमानपदनिराशः । अन्यथा मौनिश्लोकादौ शब्दबोधः स्यात् । ज्ञायमानेति शानच् प्रत्ययात् वर्तमानकालिकेति बोधः मौनिनः श्लोके वर्तमाने श्रूयमाणत्वाभावात् न तत्र शाब्दबोधः स्यादिति पदज्ञानस्य तु सर्वत्र सम्भवात् श्रूयमाणत्वाभात् न पदार्थज्ञानसम्भवः ।

द्वारमित्यत्र व्यापार इत्यर्थः । यथा कमलमिति पदम् श्रूयमाणसमकालमेव सति पदज्ञाने सरोजरूपपदार्थं संकेतयति । एवं पदार्थानां बोधे जाते सत्येव शाब्दबोध इति तात्पर्यात् द्वारमित्यस्य व्यापार इत्यर्थः ।

शक्तिः—अभिधादयः शब्दशक्तयः शाब्दबोधे सहकारिकारणरूपा । पदार्थज्ञानसाधनभूतत्वात् । यथा सरोजमिति पदम् मत्स्यमशकादिपदार्थान् निवार्य कमलरूपमर्थम् शब्दशक्तिविशेषेणैव बोधयन्ति एवं पदार्थज्ञाने कारणभूतत्वात् शाब्दबोधे सहकारिकारणा इति युक्तमुक्तम् । तथा चोक्तम्—पदेन सह पदार्थसम्बन्धः शक्तिः । स च अस्माच्छब्दादयमर्थो बोद्धव्यमितीश्वरेच्छारूपः ।

अत्र ईश्वरेच्छा इत्यत्र किञ्चिन्मतभेदं लक्ष्यते प्राचीनास्तु ईश्वरेच्छा पदार्थबोधे कारणमिति आमनन्ति नव्यास्तु केवलमिच्छाया एव कारणत्वमिति । तन्मत-

भेदन्तु यदृच्छावाचकशब्दे एव न तु सर्वत्र । यथा डित्थ-डवित्थादि संज्ञाविधाने इच्छायाकारणत्वमिति नव्या । प्राचीनास्तु एकादशेऽहनि पिताऽस्य नाम कुर्यादिति शास्त्रवचनाद् ईश्वरेच्छां कल्पयन्ति । एवं सत्यपि वैयाकरणानां नदीघीभसंज्ञादयो भ्रमजनका एवेति नैयायिका स्वीकुर्वन्ति न तु तथाविधानां लोके प्रसिद्धिरिति प्रमाणमत्र ।

(७२) प्रश्नः—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सन्निध्यतः सिद्धपदस्य वृद्धाः ॥

इति पद्यं सोदाहरणं सप्रपञ्चं व्याख्येयम् ।

अथवा

शक्तिग्रहसाधनान् व्याकरणादीन् सप्रपञ्चं दर्शयत ।

उत्तरम्—शक्तिग्रहमिति—शक्तिः शङ्केतः तस्य ग्रहणम् । अथवा शक्ति अभिधादिशक्तीनां ग्रहणम् । व्याकरणादिभिः भवतीति वृद्धाः=ज्ञानवृद्धा इति भावः ।

व्याकरणेन सङ्केतग्रहः—व्याकरणमिति धातु-प्रत्यादिकम् । तत्र भू सत्तायाम् इत्यनेन भू धातोः शक्तिग्रहः अथवा साधकतमं करणम् इत्यनेन करणेऽर्थे एवञ्च व्याकरणेन शक्तिग्रहः । क्वचिच्च व्याकरणेनार्थ बोधस्य बाधश्च ।

क्वचित् सङ्केतग्रह उपमानसाहाय्येनापि सम्भाव्यते । यथा कश्चित् प्रति कस्यचिदुक्तिः 'यथा गौस्तथा गवय' इत्यत्र गवयशब्दार्थं बोधयति ।

कोशात्तु सङ्केतग्रहं प्रसिद्धमेव । यथा "यमानिलेन्दुचन्द्रार्कविष्णुसिंहांशु वाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ।" इत्यत्र हरि शब्दस्य सङ्केतग्रहः द्योत्यते ।

आप्तवाक्यात् शक्तिग्रहः यथा उत्तमवृद्धेन मध्यमवृद्धं प्रत्युक्तिः बालः गृह्णाति तदनुसारं मध्यमवृद्धाचरणं च द्रष्ट्वा बालकः तत्तच्छब्दानां तत्तदर्थं गृह्णाति । अथवा आप्तपुरुषेणोक्तम् अयमेतत् पदबोध्यमिति च शक्तिग्रहाय समर्थं भवति ।

व्यवहारस्तु उत्तमवृद्ध-मध्यवृद्धयोराचरणात् स्पष्टमेव । अथवा नीलोघटः इत्यादिभियद् नीलादीनां शक्तिग्रहः स्वीकार्यते तदपि प्रसिद्धमेव ।

अथवा 'ब्राह्मण ! पुत्रस्ते जातः' ब्राह्मण कन्या ते गर्भिणी' इत्यादि वाक्य-

श्रवणात् मुखे मोदयालिन्ययोः दर्शनाच्च तथा तथा वाक्यार्थबोधः । तेन शाब्दबोधमपीति दिक् ।

वाक्यशेषमुदाहरति । यवमयश्चरुः इति । यवपदस्य दीर्घशूक इति धान्ये आर्याणां प्रयोगः म्लेच्छानान्तु कङ्गुधान्ये । अत्र चरुशब्दयोगे दीर्घ सूत्रे एव शक्तिग्रहः । इति वाक्यशेषात् ज्ञायते अथवा—

वसन्ते सर्वशस्यानां जायते पत्रशातनम् ।
मोदमानश्च तिष्ठन्ति यवा कणिशशालिनः ॥

अत्र वाक्यशेषात् यव शब्दस्य दीर्घ सूकार्थे नियमनम् ।

विवृत्तिर्व्याख्या । कस्यचिदपि शब्दस्य व्याख्यया न शक्तिग्रहमति काठिन्वं यातीति दिक् ।

सिद्धपदस्य सान्निध्यात्तु 'इह सहकारतरौ मधुरं पिको रौति' इति वाक्ये सहकारपदस्य सान्निध्यात् पिकः कोकिल इत्यर्थे नियम्यते ।

(७३) प्रश्नः—तिङानां शक्तिः कर्तृष्वस्ति उत वा धातुषु ? इति विषये वैयाकरणमतं निरस्य न्यायसम्मतसिद्धान्तं प्रतिपादयत ।

उत्तरम्—शक्तिग्रहं व्याकरणेन इति पदस्यवृत्तौ न्यायसिद्धान्तमुक्तावलीकारः वैयाकरणमतं प्रस्तौति—'धातु-प्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति । इति । अत्र आदिग्रहणात् समासे शक्तिग्रहः स्वीकार्यते । वैयाकरणाः समासेऽपि शक्ति स्वीकुर्वन्ति यथोक्तम्—

'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्'

वैयाकरणाः तिङानां शक्तिः कर्तरि स्वीकुर्वन्ति । तस्यार्थः चैत्रः पचतीति पाकक्रियायाः शक्तिः कर्तरि सती एव पचतीति क्रियाया चैत्रेण (कर्त्रा) सह अभेदेनान्वयः भवति । अनेक 'चैत्राभिन्नः पाककर्ता' इति रूपेण वाक्ये अभिन्नत्वेनान्वयः इत्येवावसितम् ।

अस्यार्थः—चैत्रः पचतीत्यत्र, चैत्रसंज्ञायां सु प्रत्ययः प्रातिपदिकार्थमात्रबोधकत्वात् न पृथक् पदार्थं सङ्केतयति । पचतीत्यत्र 'पच' इति धातु. तिबिति प्रत्ययः तत्तु प्रथमपुरुषैकवचनबोधकत्वात् चैत्रेणान्वितः तथा च लट स्थानीयत्वात् वर्तमानकालबोधकोऽपि एवं तिप् प्रत्ययस्य वर्तमानकालिकचैत्रेणान्वितत्वात् तिपा साहितस्य पचधातोरपि चैत्रे एव शक्तिः अवसिता । अत एव 'चैत्र-

भिन्नैकत्वावच्छिन्न कर्तृवृत्तिर्वर्तमानकालिको विक्लित्यनुकूलो व्यापारः' इति शाब्दबोधः।

एवं धात्वर्थः कर्तरि चैत्रे अन्वितः सन् वाक्यस्याभिन्नार्थ एव प्रतीयते। यथा धात्वर्थः कर्तरि व्यापृत एव शक्ति बोधयति तथैव वर्तमानकालस्यापि कर्तरि एव शक्तिग्रहः स्वीकार्यते। अस्यार्थः—व्यापारस्तु विशेषणः विशेष्यस्तु कर्ता एव, तत्रैव वाक्यार्थस्यावसितत्वात्। तथा चात्र फलस्य मुख्यत्वम्, फलभाक् तु चैत्र एव अत एव क्रियार्थस्य तत्रैव शक्तिः।

एवं च चैत्रेण पच्यते इत्यत्र धात्वर्थः व्यापारः फलञ्च। कर्मणि प्रत्ययेन प्रत्ययार्थस्तु कर्म, काल अपि प्रत्ययार्थः। अत्र च 'चैत्राभिन्नकर्तृभिन्नवर्तमान कालिकव्यापारजन्यतण्डुलाभिन्नैकत्वावच्छिन्नाश्रयवृत्तिर्विक्लितिः इति शब्दबोधः' तदपि चैत्रे एव अवसितत्वात् च कर्तरि शक्तिः ग्रह्यते।

न इति नैयायिकाः। कर्तृत्वन्तु कृतिमत्त्वं कृतिरेव प्रधानम्। इति। 'लः कर्मणि भावे चाकर्मकेभ्यः' इति सूत्रव्यवस्थया लकाराणां कर्तरि कर्मणि वा शक्तिकल्पनमयुक्तम्। कर्तृत्वमेव कृतिमत्त्वम्, कर्मत्वमेव फलवत्त्वम् इति। वैयाकरणमतेन तु कर्तरि कर्मणि वा शक्तिरिति कल्पने शक्यतावच्छेदकं कृतिमत्त्वं फलत्वञ्च अनेकसंख्यकमिति गौरवम्। अत एव लकाराणां शक्तिः कृतौ फले च कल्पनीया। इत्येव लाघवम्। कृतित्वन्तु चैत्रादौ प्रकारतारूपेण तण्डुलेन प्रतीयेत्। तेन 'चैत्रः तण्डुलं पचति' इत्यस्यार्थः एवं निष्पद्यते—'तण्डुलवृत्तिविक्लित्यनुकूलव्यापारानुकूलवर्तमानकालिककृतिमाननेकत्वावच्छिन्नः चैत्रः' इति। चैत्रेण तण्डुलः पच्यते इत्यस्य वाक्यस्य तु 'चैत्रवृत्तिकृतिजन्यव्यापारजन्य विक्लित्याश्रयः एकत्वावच्छिन्नस्तण्डुलः' इति शब्दबोधः। तदेव प्रथमान्तर्थः मुख्यविशेष्यकः शाब्दबोधः। 'चैत्रः तण्डुलं पचति' इत्यत्र चैत्रः प्रथमान्तः तदेव विशेष्यः। 'चैत्रेण तण्डुलः पच्यते' इत्यत्र तण्डुलः प्रथमान्तः तदेव विशेष्य इति स्पष्टम्।

ननु कृतौ शक्तिश्चेत् चैत्रः पचतीति वाक्ये तिङर्थः कृति न तु कर्ता। तेन 'कर्तृकरणयोस्तृतीया' इत्यनेन अनुक्ते कर्तरि तृतीया स्यात् तत्तु व्याकरणविरुद्धमेव इति चेत्।

न। 'कर्तृकरणयोस्तृतीया' 'द्व्येकयोः द्विवचनैकवचने' 'अनभिहिते च' इत्यत्र वाक्यत्रये एकवाक्यत्वमेव, तेन 'कर्तृगतैकत्वेऽनभिहिते तृतीयैकवचनम्' 'कर्मगतैकत्वेऽनभिहिते द्वितीयैकवचनम्' इत्येव समीचीनम्। तेन कर्तृपदस्यानभिहिते एव तृतीयाप्राप्तिः। तेन चैत्रः पचतीत्यत्र कर्तुरुक्तत्वात् न तृतीया।

तेन 'चैत्र इव मैत्रो ग्रामं गच्छति' इत्यत्र चैत्रस्य अनुक्तत्वे सति 'ग्रामवृत्तिसंयोगानुकूलव्यापारानुकूल - कृतिमानैकत्वावच्छिन्न - चैत्रप्रतियोगिकसादृश्यानुयोगी मैत्रः' इति शाब्दबोधः उपपन्नः।

किन्तु 'कर्मत्वाद्यनवरुद्ध' पदस्य इतरविशेषणत्वेन तात्पर्याविषयत्वरूपार्थकरणेन 'चैत्र एव पचती'ति स्थले 'चैत्रेतरावृत्ति पाककृतिमान् चैत्रः' एवं प्रकारकः शाब्दबोधः प्राप्यते यदयुक्तम्। चैत्रपदार्थे अन्ययोग व्यवच्छेद्य रूप एवकारार्थे यद्भेद् तत्र विशेषणत्वम्। अतः चैत्रे इतरविशेषणत्वेन तात्पर्य विषयत्वेन संख्याया अन्वयासम्भवः। एवं चैत्रश्चैत्रं पश्यतीति वाक्ये संख्याया अन्वयाभाव तेन चैत्रवृत्ति चक्षुःसंयोगजन्यज्ञानाश्रयश्चैत्र इति शाब्दबोधे चैत्रविशेषणत्वेन तात्पर्यविषय एव।

एवं इतरविशेषणत्वमात्रेण तात्पर्यविषयत्वमेवार्थः। तेन विशेष्यत्वे सति संख्याया उक्तत्वे न कश्चिद्बाधः।

यद्वा—यदि कर्मत्वाद्यनवरुद्ध पदस्य धात्वर्थातिरिक्ताविशेषणे इत्यर्थेऽपि न कश्चिद्दोषः। चैत्र इव मैत्रो ग्रामं गच्छतीति स्थले धात्वर्थातिरिक्ते इवार्थं सादृश्ये प्रतियोगितासम्बन्धेन विशेषणे चैत्रे संख्यान्वयाबाधः। मैत्रे तु विशेषणाबाधः तेन तत्र संख्यान्वयत्वम्। इति सर्वमुपपन्नम्।

(७४) प्रश्नः—शक्तिग्रहं जातौ किंवा व्यक्तौ भवतीति पूर्वपक्षोत्तरपक्षं प्रस्तूय पूर्वपक्षनिरसनपूर्वकम् उत्तरपक्षं स्थापयत।

उत्तरम्—सङ्केतविषयं जातिरुत वा व्यक्तिः इति विषये वैयाकरण-मीमांसक-बौद्ध-नैयायिकादिभिः सर्वैरपि विचार्यते। तत्र केचन जातौ सङ्केतं स्वीकुर्वन्ति केचिद् जातिविशिष्टव्यक्तौ केचिद् वा तद्भिन्नभिन्ने सङ्केतं स्वीकुर्वन्ति इति मतवैविध्यं दृश्यते। तत्र प्राधान्येन जातिवादिनो व्यक्तिवादिनश्च विचारपदवीं यान्ति। अत एव त एव क्रमशः प्रस्तूयन्ते।

पूर्वपक्षः—प्रवृत्तिपरको निवृत्तिपरको वा वाक्यार्थः। केचन वाक्यानि प्रवृत्तिपरकानि केचन निवृत्तिपरकानि। तदितराणि तु निरर्थकत्वात् न वाक्यत्वं लभन्ते। तत्र च प्रवृत्तिनिवृत्तिविषयं व्यक्तिरेव प्राप्नोति अत एव व्यक्तौ एव शक्तिग्रहः युज्यते, तथापि आनन्त्याद् व्यभिचाराच्च तत्र सङ्केतं कर्तुं न युज्यते। अत एव जातौ एव शक्तिः।

यदि व्यक्तौ शक्तिग्रहः स्यात् तदा इह लोके अनन्तव्यक्तित्वात् अनन्तशब्दानां कल्पना युज्यते। यथा गौ इति पदेन गो व्यक्तौ शक्तिग्रहे सति तद्-

भिन्ने 'गौ' पदार्थे सङ्केताय अपरं गौ शब्दं कल्पनीयम् एवं अनन्तगौ व्यक्तीनां सङ्केताय अनन्ता एव गौशब्दाः कल्पनीया। इति आनन्त्यं दोषः।

अथवा एकेनैव गौ शब्देन सकलगोव्यक्तीनां सहैव सङ्केतः स्यादिति वक्तव्ये च गामानय इति प्रयोगे व्यभिचारः स्यात् सकलगोव्यक्तीनां सहैवानयनासम्भवात्।

एवं च 'अत्र लिखन् अस्ति यः स देवदत्तः, पठन् अस्ति यः स यज्ञदत्तः' एवं परिचायितः केनचित्कश्चिज्जनः किञ्चित्कालानन्तरम्, यदा 'देवदत्तः पठति यज्ञदत्तश्च लिखति' तदा कथं शक्तिग्रहः स्यादिति व्यक्तौ शक्तिग्रहे दोष एव।

तथा च 'गौ शुक्लश्चलो डित्थ' इत्यादीनां विषयविभागोऽपि न प्राप्यते। इति जातावेव शक्तिग्रहः सम्भवति।

'अनुगतप्रतीतिहेतुः जातिः इति जातिलक्षणम्। गौः इत्यनेन गोत्वमभिसम्बध्यते तेन गौ गौ इति प्रतिगोविषये शक्तिः, यत्तु गोव्यक्तौ अभिमुखीकरणं प्रवृत्तिनिवृत्तिहेतुत्वं वा तद्गोत्वसम्बन्धादेव अनेन गौ इत्यत्र जातौ शक्तिः। एवमेव गुणक्रियायदृच्छादिविषयेष्वपि जातावेव शक्तिः इति मीमांसकाः। तत्र गुणेषु यथा शङ्खं शुक्लं, दुग्धं शुक्लमिति सर्वत्र शुक्ल-शुक्ल इति अनुगतप्रतीतिः अनेन शुक्ल इत्यनेन हिमपयःशङ्खादीनां शुक्लत्वं बोधविषयतां यातीति जातावेव सङ्केतः। यद्वा पाकक्रियायाः सङ्केतेन तण्डुलानां विविधौषधीनां च पाचनं सहैव समानरूपेण बोधविषयतां यातीति तत्रापि जातावेव सङ्केतः। यदृच्छावाचकास्तु डित्थ-डवित्थादयोऽभिधानविशिष्टा तत्रापि जातावेव सङ्केत इति दर्शयते—यथा कश्चिज्जनः अभ्यागतं परिचाययति यदयम्—यजन् जनः यज्ञदत्तः, पठन्नस्ति यः स देवदत्तः, इति, किञ्चित् कालानन्तरं देवदत्तोऽपि यज्ञे प्रवर्तते चेत्तथापि नाभिधानपरिवर्तनं सहते। एवं च बालवृद्धशुकाद्युच्चारितेषु चैत्र चैत्र इति भिन्न-भिन्न ध्वनिसहितवर्णेषु समानस्यैव चैत्रस्य बोधः भवति इति चैत्रत्व जातावेव सङ्केतः इति जातिगुणक्रियायदृच्छासु सर्वत्राऽपि जातावेव सङ्केतः इति मीमांसकाः।

नैयायिकास्तु तन्निराकुर्वन्ति—तन्नेति। शक्ति विना व्यक्तिभानानुपपत्तेः इति। प्रवृत्तिनिवृत्तियोग्यस्तु व्यक्तिरेव। घटमानयेति घटव्यक्तावेव शक्तिग्रहः न तु घटजातौ जातेरानयनक्रियासम्बद्धाभावात्। लक्षणया बोधः स्यादिति चेत् तदपि न मुख्यार्थबाधाभावात्। नात्रान्वयानुपपत्तिः, न च तात्पर्यानुपपत्तिः।

यत्तु आनन्त्याद् व्यभिचारात् चेति उक्तम् तदपि न युक्तम्। अनन्तपदार्थ-

बोधाय अनन्तशब्दानां कल्पनमनावश्यकम् । शक्तेरेव पृथक्-पृथक् पदार्थेषु पृथक्-पृथक् कल्पनासम्भवात् । तदित्थं गौ इति पदमेकगोव्यक्तिबोधानन्तरम् तद्भिन्न तद्भिन्नगोव्यक्तिबोधाय पुनः अभिधाशक्तिप्रयोगसम्भवात् नानौचित्यं निर्वहति ।

यत्तु 'शब्दवृत्तिकर्मणां विरम्य व्यापाराभावः' इत्युच्यते तदपि न युक्तम् पदार्थभेदात् । शब्दवृत्तौ तु पदार्थस्यैव मुख्यत्वात् । एकस्यैव शक्तेः भिन्नभिन्न-पदार्थबोधे पौनः पुन्येन प्रयोगे न कश्चिद्दोष इति ।

एकस्मिन्नेव गोशब्देन भिन्न-भिन्नगोपदार्थसम्बद्धत्वात् प्रवृत्तिनिवृत्तिर-सम्भवमिति चेत् तदपि न तद्दोषन्तु युष्मन्मते आपतति नास्मन्मते । प्रवृत्ति-निवृत्तिस्त्वस्मन्मते प्रसङ्गप्राप्तेनैव । नहि गोपदेन घटपदार्थे सङ्केतः । सम्भवति ।

एवं मीमांसककृत-व्यक्तिशक्तौ प्रदर्शित दोषान् निरस्य मीमांसकमतं दूष-यति किञ्चेति ।

गोशब्दस्य यदि गोत्वजातौ सङ्केतः स्यात् तदा गोत्वमिति पदेन कुत्र सङ्केतः स्यात्, तथा च यथा गोपदस्यावच्छेदकं गोत्वमिति कल्प्यते गोपदस्य गोत्वजातौ सङ्केतश्चेत् तर्हि तस्याप्यवच्छेदकत्वं वक्तव्यम् न तु गोत्वत्वं गोत्वपदावच्छेदकं गोत्वत्वस्य तु जातिबाधकदोषैरेवापाकृतत्वात् । तदेवोक्तम् —

'किञ्च गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समान प्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधम्प्रति च हेतुत्वात् ।' इति ।

तस्यार्थः—यदि 'गौः गोपदशक्या' इतीत्थं शक्तिज्ञानं स्यात् तदा तु व्यक्तौ एव शक्तिः इत्यनुभवसिद्धम् । प्राभाकरमते विशिष्टज्ञानं प्रमात्मकमेव अन्यथा-ख्यातेरसिद्धत्वात् । यदि च 'गोत्वं गोपदशक्यम्' इति शक्तिबोधः स्यात् तर्हि गोपदेन गोत्वप्रकारकः गोव्यक्तेः स्मरणम्, तथा च गोत्वप्रकारक गोविशेष्यक बोधस्योदयं न स्यात् । यत् शक्तिग्रहणं यत्प्रकारकं यद् विशेष्यकं भवति तत् तत्प्रकारकं तद्विशेष्यकस्मरणं तथा च तत्प्रकारकं तद् विशेष्यकं शाब्दबोधं प्रति कारणं भवति ।

अत एव शक्तिग्रहणं व्यक्तावेव सिद्ध्यति न तु जातौ ।

एवं वैयाकरणानां जातिगुणक्रियायदृच्छावाचकेषु शक्तिग्रहणमिति सिद्धान्तं व बौद्धानामपोहवादमपि निरस्तम् ।

(७५) प्रश्नः—किं नाम पदम् ? कतिविधश्च तदिति सविस्तरं प्रतिपादयत ।

उत्तरम्—शक्तं पदम् । इति पदलक्षणं नैयायिकसम्मतम् । पदार्थेन बोधकता सम्बन्धेन शक्तिविशिष्टं पदमिति तात्पर्यः । पदमिति पदार्थबोधकमेव । पदार्थबोधे शक्तमिति 'शक्तं' पदस्यार्थः ।

वैयाकरणास्तु यत्सुप्तिङन्तं पदमिति कथयन्ति तन्नैयायिका न स्वीकुर्वन्ति समस्तपदादौ शक्तिस्वीकारासम्भवात् । वैयाकरणास्तु समस्तमपि पदमितिस्वीकुर्वन्ति नैयायिका न तथा ।

पदन्तु चतुर्विधं—योगिकं, रूढं, योगरूढं, यौगिकरूढञ्चेति ।

अवयवशक्त्या स्वार्थ-बोधकं योगिकमिति कथ्यते, यथा पाचकः, कुम्भकारः इत्यादिः । पाचक इति पदं पच् धातुं कर्मत्वेन, ण्वुल् प्रत्ययं कर्तृत्वेन बोधयित्वा पाककर्तृ व्यक्तिविशेषं बोधयति । तथैव कुम्भं करोतीत्यर्थे कुम्भ + डुकृञ् + अण् विग्रहेण कुम्भकारशब्दः स्वार्थं बोधयतीति योगिक शब्दस्योदाहरणम् ।

रूढन्तु समुदायशक्त्या स्वार्थप्रत्यायकपदविशेषमभिधीयते । यथा गो; मण्डलेत्यादिः । यत्तु गम् धातोः गमेर्डो इति डो प्रत्ययेन गोपदे निष्पन्ने सति कथं रूढमिति चेत् उच्यते तदर्थन्तु गमनक्रिया कर्तरि एव साधु न तु गोपदार्थविशेषे । व्यवहारे तु गो पदेन कुत्रापि अवयवशक्तिमत्त्वं न लक्ष्यते अत एव रूढमेव तत् । एवं मण्डलमण्डपादयोऽपि बोध्या ।

यत्र तु अवयवशक्तिबोधे समुदायशक्तिरप्यस्ति तद्योगरूढमित्युच्यते । यथा पङ्कजादिपदम् । पङ्कात्जायते इति अवयवशक्तिसम्पन्ने सत्यपि पङ्कजशब्दं पद्मरूपविशेषार्थमेव बोधयति न तु मशकादिकमपीति तात्पर्यार्थः । न च कुमुदादिपदार्थविशेषं तदवयवशक्त्या बोधयति इति योगरूढमेव तत् ।

क्वचित्कुमुदार्थं बोधयति सत्यपि पङ्कजशब्दः न योगिकम् इति लोकप्रसिद्धेः । तत्र कुमुदादिकं लक्षणया एव बोधयति ।

क्वचिच्च स्थलपद्मेऽपि पङ्कजशब्दप्रयोगः तदपि लक्षणया एव बोध्यम् । पङ्कजशब्दस्य अवयवशक्तिवशात् समुदायशक्तिवशाच्च पद्म एव योगरूढत्वात् ।

यत्र तु पदम् अवयवशक्त्या समुदायशक्त्या च स्वार्थों स्वातन्त्र्येण बोधयति तत्पदं योगिकरूढमित्युच्यते । यथा उद्भिद् शब्दः अवयवशक्त्या वृक्षलतादिकं समुदायशक्त्या च यागविशेषं च बोधयति इति योगिकरूढमेव तत्पदम् ।

(७६) प्रश्नः—आचार्यं विश्वनाथतर्कपञ्चाननभट्टाचार्यकृतं लक्षणा-शक्तिलक्षणं सपदकृत्यं विविच्यताम् ।

अथवा

लक्षणालक्षणं प्रदर्श्य लक्षणायाः बीजं निरूपयत ।

उत्तरम्—आचार्य विश्वनाथतर्कपञ्चाननभट्टाचार्येण लक्षणाशब्दशक्त्या लक्षणं कृतम्—

'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः' इति ।

तस्यार्थः—यदा अभिधाशब्दशक्त्या मुख्यार्थे तात्पर्यानुपपत्तिः स्यात् तथा शक्यार्थेन सम्बद्धः कश्चिदर्थः गृह्यते तदा तत्र लक्षणा शब्दशक्तिरित्युच्यते ।

तत्र तात्पर्यानुपपत्त्या मुख्यार्थबाधः स्यात् इति प्रथमः समयः ।

तत्सम्बद्ध द्वितीयोऽर्थः गृह्यते इति द्वितीयः समयः ।

यथा 'गङ्गायां घोषः' इत्यत्र गङ्गापदार्थे घोषाधिकरणत्वं सर्वथा असम्भवमेवेति तात्पर्यानुपपत्तिः स्पष्टमेव । तथा च गङ्गापदेन भगीरथरथ-रथाङ्गखातावच्छिन्नजलप्रवाहः इति अर्थः ग्रह्यते तथा च जलप्रवाहरूपपदार्थे घोषाधिकरणत्वं न सम्भाव्यते, अत एव गङ्गातीरमेव अधिकरणरूपेण गृह्यते । तेन गङ्गायां घोषः इत्यनेन गङ्गापदेन गङ्गातीरमिति पदार्थं सङ्केतं याति । तदयमर्थोऽत्र लक्षणया बोध्यः ।

ननु केचन् रूढ़िवशात् प्रयोजनवशाद्वा लक्ष्यार्थं गृह्यते इति भणन्ति । तत्तु लक्षणे अनावश्यकमेव । तात्पर्यानुपपत्तिशब्देनैव तस्य गम्यत्वात् ।

ननु गङ्गातीरे घोष इत्येव कथं नोक्तमिति चेत् तदप्युच्यते गङ्गातीर इति पदाभिधाने शीतत्व-पावनत्वादि-गाङ्गगुणानां बोधासम्भवात् । वक्तुः प्रयोजनन्तु शीतत्वपावनत्वादिद्योतनमप्यस्ति अत एव गङ्गायां घोषः इत्युक्तं वक्त्रा ।

ननु तात्पर्यानुपपत्तिरिति कथमुक्तमिति 'मुख्यार्थबाधपदेनैव गम्यत्वाद तदुच्यते मुख्यार्थबाधस्तु अन्वयानुपपत्तिमात्रं बोधयति न तु तात्पर्यानुपपत्तिं । तात्पर्यानुपपत्तिशब्देन तु अन्वयानुपपत्तेः स्वयमेव गम्यत्वात् तेन काकेभ्यो दधि रक्ष्येत् इत्यादौ स्थले लक्षणाशक्तिगम्यत्वम् बोध्यम् ।

ननु काकेभ्यो दधि रक्षेत् इत्यत्र लक्षणाया अस्वीकारे का हानिरिति, तत्र वक्तव्यम्, शुना स्वयं रक्षकेनैव वा भक्षिते सति दध्नि वक्तुराज्ञालोपः न स्याद् । अत एव तात्पर्यानुपपत्तिरपि अत्रावश्यकी ।

(नागेशभट्टेन परमलघुमञ्जूषायां तात्पर्यानुपपत्तिरेव लक्षणाया बीज-रूपत्वेन स्वीकृता। अन्वयानुपपत्तौ च 'काकेभ्यो दधिरक्ष्यताम्' इत्यत्र लक्षणा न स्यात्। अत्र तु स अन्वयानुपपत्तिः वक्तुः तात्पर्यस्य काकपदे अनवसानात्। काकेभ्य इति पदेनात्र दध्युपघातकानि निखिलपदार्थानि गृहीतानि सन्ति।)

श्रीविश्वनाथतर्कपञ्चाननपादास्त्वत्र—अन्वयानुपपत्तिरेव लक्षणाबीजमस्ति चेत् तदा यष्टीः प्रवेशय इत्यत्र लक्षणा न स्यात् इति सङ्केतयन्ति। यष्टीनामपि तत्र अन्वयासम्भवात्। तथा च यष्टिःप्रवेशे यद्भोजनतात्पर्यं तत्र तात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा स्यात्।

तथा च अन्वयानुपपत्तेः लक्षणाबीजत्वे सति क्वचिद्गङ्गा पदेन तीरे लक्षणा क्वचिच्च घोषपदेन मत्स्यादौ अपि लक्षणा स्यात् इति नियमो न व्यवस्यति। वक्तु तात्पर्यमेव अत्र मुख्यम्। वक्तुः तात्पर्ये एव वाक्यार्थस्य पर्यवसायित्वात् तात्पर्यानुपपत्तिरेव लक्षणाया बीजम्।

गङ्गायां घोष इत्यत्र घोषस्याधिकरणत्वं यदि तीरत्वेन गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन गृहीतस्तदा लक्षणया गङ्गातीरत्वेन गङ्गातीरस्य स्मरणं स्यात्। तत्तु वक्तुः तात्पर्ये अवशायित्वात्।

एवं न तु लक्ष्यतावच्छेदेन लक्षणा न च शक्यतावच्छेदकेन इति दिक्। इत्यलम्।

(७७) प्रश्नः—तत्पुरुषसमासेन समस्तपदे कथं लक्षणाया अनुवृत्तिरिति-साधयत।

अथवा

राजपुरुषः इत्यत्र लक्षणां सङ्घटयत।

उत्तरम्—तत्पुरुषसमासे पूर्वपदे लक्षणा। 'राज्ञः पुरुषः राजपुरुषः' इत्यत्र राजपदार्थेन पुरुष पदार्थस्य न हि साक्षात् स्वरूपसम्बन्धेनान्वयः सम्भवति निपातातिरिक्तनामार्थेन निपातातिरिक्तनामार्थस्य भेदसम्बन्धेनान्वयः अव्युत्पन्नः। अनेन नियमेन स्वरूपसम्बन्धेन राजपुरुष इत्यस्य बोधासम्भवः। अनेन राजविशिष्टः पुरुषः इति शाब्दबोधापत्तिः न तु स्वत्वसम्बन्धेन राजाभिन्नः पुरुषः इति शाब्दबोधः।

वैयाकरणास्तु राजपुरुष इत्यत्र लक्षणा न स्वीकुर्वन्ति। तेषां मतेन लुप्तषष्ठीस्मरणात् विभक्त्यर्थे स्वत्वे राजपदार्थस्यानिरूपितसम्बन्धेनान्वयः। तथा

च स्वत्वेननानिरूपितसम्बन्धेन पुरुषपदार्थे अन्वयं कृत्वा राजनिरूपित स्वत्ववान् पुरुषः इत्याकारकः शाब्दबोधः । इति । नैयायिकास्तु तन्न स्वीकुर्वन्ति गौरवात् । राजपदार्थस्य लक्षणया राजसम्बन्धी इत्यभेदसम्बन्धेनान्वयं कृत्वा राजसम्बन्ध्य-भिन्नः पुरुषः इत्याकारकशाब्दबोध एव युक्तम् । निपातातिरिक्तपदेन नामा-र्थानां भेदसम्बन्धेनान्वयः । एवं स्थिते 'घटः पटो न' पटप्रतियोगितारूप-भेद-सम्बन्धेन नञर्थभेदे अन्वयः सत् स्वरूपात्मकभेदसम्बन्धेन घटे पटप्रतियोगिक-भेदवान् घटः इत्याकारक शाब्दबोधासम्भवः । भेदपदेन तु निपातातिरिक्त-नामार्थद्वयस्याभेदान्वयबोधः । तथा च अभेदेनैव नीलो घटः इत्यत्र नील-घट-पदार्थयोः अन्वयबोधः ।

राजपुरुषः इत्यादि स्थलेषु लुप्तषष्ठीविभक्तिस्वीकारात् राजनिरूपित स्वत्ववान् पुरुषः इत्याकारक शाब्दबोधस्तु न युक्तम् । लुप्तषष्ठीविभक्तिस्मरणा-भावेऽपि राजपुरुष इत्यनेनार्थबोधः स्यादेव । यद्यपि तत्पुरुष-समासे पूर्वपदेन स्वार्थविशेषितविग्रहवाक्यस्थविभक्त्यर्थेन स्वत्वविशिष्टे निरूढलक्षणोपगमद्वारा तत्तद्विभक्तिस्मरणभावे पूर्वपदस्य तदर्थे निरूढा लक्षणाऽसम्भवः एव । लक्षणा-रूपवृत्तिज्ञानाभावेन पदपदार्थोपस्थितिरसम्भवा तेन शाब्दबोधाभावः । तथाऽपि विभक्तिस्मरणं विना निरूढलक्षणार्थनिर्णयाभावेऽपि सामान्यतया लक्षणाज्ञानं तदधीनपदार्थोपस्थितिरपि सम्भवा । निरूढलक्षणाज्ञानेनैव पदार्थस्मृतिरिति न युक्तम् ।

अत एव राजपुरुष इत्यादौ विभक्तिस्मरणरूप गौरवं त्यक्त्वा राजपदेन राजसम्बन्धरूपार्थे लक्षणा तेन पुरुषस्याभेदसम्बन्ध एव युक्तम् । तदिदं राज-सम्बन्ध्यभिन्नः पुरुषः इत्याकारकः शाब्दबोध एव लक्ष्यते । इति दिक् ।

(७८) प्रश्नः—समस्तपदानामर्थबोधे लक्षणाया कुत्र स्थितिरिति सदृष्टान्तं विवेचयत ।

उत्तरम्—बहुव्रीहादौ पदार्थबोधे लक्षणाया अनिवार्यत्वम् कथयन्ति नैया-यिकाः तत्र वैयाकरणास्तु अभिधया एव शाब्दबोध स्वीकुर्वन्ति । तन्न इति नैयायिकाः ।

यथा बहुव्रीहिसमासे चित्रगुरित्यत्र यदेकदेशान्वयः तत्र चित्रा गावो यस्य सः इति विग्रहे गोपदस्य गोस्वामिनि रूपेऽर्थे लक्षणा स्वीकर्तव्या ततश्च चित्र-पदेनात्रान्वयः । तेनैकपदेन लक्षणा तद्भिन्न पदेन च लक्ष्यार्थस्यान्वयः स्वीकर्तव्यः । तेन चित्राणां गवां स्वामीति विग्रहे, अथ चित्रा गौ यस्य स इति विग्रहे गौ

पदेन गोस्वामिरूपेऽर्थे लक्षणा स्वीक्रियते । एवमेव आरूढवानरो वृक्षः इत्यत्राऽपि ।

तत्पुरुषसमासे तु—राजपुरुष इत्यत्र वैयाकरणा लुप्तषष्ठीस्मरणमिति स्वीकुर्वन्ति तन्न युक्तम् । तत्र पूर्वपदे लक्षणा कृत्वा पर्यवसितोऽर्थः राजसम्बन्धय-भिन्न पुरुष इति । तथा च राज्ञाभेदाभेदेनान्वितः पुरुषः इति राजपुरुषः । यथा बहुव्रीहौ उत्तरपदे तथाऽत्र पूर्वपदे लक्षणा ज्ञातव्या ।

इतरेतर द्वन्द्वे तु उभावेव पदार्थौ स्वरूपेणोक्तौ अतोऽत्र धवखदिरौ इत्यादि स्थलेषु न लक्षणा । अत्र विग्रहस्तु धवश्च खदिरश्च इत्येव युक्तम् न तु धवश्च खदिरौ च इति । खदिरौ इत्यत्र यद् औविभक्तिः तद् उभयपदव्यापिनी धव-पदे सुविभक्त्यभावात् । अत एव तत्राऽपि लक्षणा न स्यात् ।

समाहारद्वन्द्वे तु अहिनकुलौ इत्यत्र अहिश्च नकुलश्च तयो समाहारः, इति विग्रहे समाहारद्योतनाय लक्षणा स्वीकर्तव्या । तथा हि पितरावित्यत्र, जनक-दम्पत्योः स्मरणात् एकशेषाच्च अपरस्मरणात्मिका लक्षणा । तथैव श्वशुरौ इत्यत्रापि लक्षणास्वीकर्तव्या उपादानग्रहणाद्वा । उभयत्र औ विभक्तिसिद्धयर्थम् अपरस्याक्षेपः ।

कर्मधारयसमासे नीलोत्पलमित्यत्र नीलपदस्य विशेषणत्व बोधाय अभेदा-न्वयबोधाय वा लक्षणा न स्वीकर्तव्या । लक्षणालक्षणस्यातिव्याप्तिप्रसङ्गापत्तिः । लक्षणा तु तत्रैव भवति यत्र तात्पर्यानुपपत्त्या मुख्यार्थबाधः स्यादिति विचार्यमेव ।

उपकुम्भमित्यादौ अव्ययीभावसमासे पूर्वपदप्राधान्यात् लक्षणा स्वीकर्तव्या अतो 'कुम्भसम्बन्धयभिन्नं समीपम्' इत्याद्यर्थग्रहणाल्लक्षणा भवति ।

(७९) प्रश्नः—शाब्दबोधे आकांक्षा-योग्यतासत्तोनाम् अपेक्षितत्वं दर्शयत ।

उत्तरम्—आकांक्षा-योग्यता-आसत्तियुक्तानां पदानां समुच्चयम् एव वाक्यम् इति वाक्यलक्षणम् । वाक्यार्थज्ञानमेव शाब्दबोध इति संज्ञयाभिहितम् । यथोक्तम्—

वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः ।

तथा च न्यायसिद्धान्तमुक्तावलीकारः—

'आसत्तिर्योग्यताकांक्षातात्पर्यज्ञानमिष्यते ।
कारणं..................................... ॥' इति ।

शाब्दबोधे आकांक्षायोग्यतासत्तीनां कारणत्वमभिहितम् । तत्र च कारण-मित्युक्तं न तु कारणानीति । तेन तेषां संयुक्तानामेव कारणत्वमभीप्सितं न तु पृथक् पृथगिति सिद्धम् ।

आसत्तिः—आसत्तिः सन्निधानमित्युच्यते । अव्यवधानेन पदानां स्मरण-मासत्तिरिति । तेन प्रहरे प्रहरे असहोच्चारितानि घटमानयेत्यादिपदानि न शाब्दबोधे कारणानि । न वा अन्यशब्दव्यवधानेन उच्चारितानि पदानि शाब्द-बोधे कारणमिति बोद्धव्यम् । तेन 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति न शाब्द-बोध कारणत्वं यान्ति ।

योग्यता—संज्ञाया क्रियापदेन अन्वयार्हत्वं योग्यता । यथा घटमानयेत्यादौ आवयवरूपकर्मणोऽधिकरणार्हत्वं, तथात्र शाब्दबोध सम्भवति । तथा च वह्निना सिञ्चतीति अत्र न शाब्दबोधः ।

आकांक्षा—प्रवृत्तिपरकं निवृत्तिपरकं वा वाक्यं तेनैव शाब्दबोधः । तथा च प्रवृत्ति-निवृत्त्यर्थं संज्ञापदानि क्रियापदान्, क्रियापदानि च संज्ञापदान् आकांक्षन्ति । इयमेवाकांक्षा शाब्दबोधे कारणत्वं याति । अत एव 'गौरश्वः पुरुषो हस्ती'ति न वाक्यं अकांक्षाविरहात् ।

(८०) **प्रश्नः**—आसत्तिशब्दस्यार्थं किम् ? कथञ्च आसत्तिः शाब्द-बोधे कारणम् ? इति विविच्यताम् ।

उत्तरम्—'सन्निधानन्तु पदस्यासत्तिरुच्यते ।' इति आचार्यविश्वनाथ-तर्कपञ्चाननपादाः । अर्थात् अव्यवधानेनोच्चारितत्वं पदस्यासत्तिरित्युच्यते । अव्यवधानेनोच्चारितैः पदैरेव शाब्दबोध इति अन्वयानुयोगि-प्रतियोगीनां पदानामव्यवधानेन सहोच्चारितत्वे सत्येव शाब्दबोधः सम्भवति । तेन प्रहरे प्रहरे असहोच्चारितानि घटम् आनय इति पदानि न शाब्दबोधार्हानि । न च गिरिर्भुक्तमग्निमान् देवदत्तेन इति शाब्दबोधार्हम् ।

अत्र प्रथमोदाहरणे असन्निधानम् द्वितीये च व्यवधानं आसत्तिरहितत्व-स्वरूपम् ।

क्वचित् सति च व्यवधाने शाब्दबोधसम्भवः । अन्वयानुपपत्तेरभावात् यथा हि रघुवंशमहाकाव्ये—'सोऽहं·· ·· ···रघूणामन्वयं वक्ष्ये' । इति पदानामन्तरे कतिचित् श्लोकानां व्यवधाने सत्यपि शाब्दबोधः सम्भवत्येव । अथवा 'नीलो घटो द्रव्यं पटः' इत्यत्र अन्वयसम्भवे शाब्दबोधसम्भवः । अतो अव्यवधानं न

सर्वत्र शाब्दबोधे कारणम् । अस्यार्थः क्वचित् सति व्यवधाने शाब्दबोधसम्भवः क्वचिच्च व्यवधानेन शाब्दबोधस्य बाधः सम्भवति ।

यत्र व्यवधाने सत्यपि शाब्दबोधः सम्भवति तत्र अव्यवधान भ्रम एव कारणम् इति विश्वनाथतर्कपञ्चाननपादाः ।

ननु शब्दस्त्वनित्यः 'आनय' इत्युच्चारणात् पूर्वमेव घट शब्दस्य नाशे सति कथं घटमानय इत्यत्र एकक्रियात्मकः शाब्दबोधः इति चेत् उच्यते ।–

'घटमानय' इत्यत्र घ् अ ट् अ म् आ न् अ य् अ इति वर्णानां समुच्चयः । तत्र उत्तरोत्तरवर्णोचारणे पूर्वपूर्ववर्णनाशः एवमन्त्य अवर्णोच्चारणात् पूर्वमेव निखिलवर्णनाशे सति अपि अनुरणनजन्यसंस्कारवशात् 'घटमानय' इति वाक्यं स्फोटरूपेण सममेव बुद्धौ स्फुरति तेनैव शाब्दबोध सम्भवति ।

अस्यार्थः अवर्णोच्चारणात्पूर्वं घवर्णनाशे सति घवर्णानुरणनजन्यसंस्कारवशात् तत्स्थितिः कल्प्यते । यथा कांस्यपात्रे कृताघातजन्यं यथा ध्वनिरनुरणनरूपं किञ्चित्कालं यावत् श्रूयते तथैव बुद्धौ पूर्वपूर्ववर्णनाशे सति अनुरणनरूपं संस्कारं बुद्धौ किञ्चित्कालं यावत् तिष्ठति तदेव संस्कारं वाक्यविरामे सति स्फोटरूपेण बुद्धौ स्फुरति । अत एव व्यवधाने सति वाक्यार्थबोधासम्भवः । व्यवधानाभाव एव शाब्दबोधे कारणम् । अत एव छत्री कुण्डली वासस्वी देवदत्तः इत्यत्र शाब्दबोधः सम्भवति । तदेवोक्तम्—

'प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याऽव्यवधानापत्तेः' इति ।

ननु नानाविधवर्णैर्जन्यैः नानाविधसंस्कारैः कथमेकविधं शाब्दबोधः सम्भवति इति चेत् उच्यते—

'यथा नानासन्निकर्षैरेकप्रत्यक्षस्य सम्भव तथैव नानाविधैः संस्कारैरेकविधस्मरणोपपत्तिरिति । चरमवर्णश्रवणजन्य एकविधसंस्कारोद्बोधकत्वात्' तेनैव नानाविधवर्णे एकः शाब्दबोधः सम्भवः ।

एवं सति सर्ववर्णानां सममेव बुद्धौ स्फुरणया खलेकपोतन्यायेन शाब्दबोध सम्भवतीत्युक्तम्—

वृद्धायुवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति ॥

नव्यास्तु—

'यद्यदाकांक्षितं योग्यं सन्निधानम्प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥' इति ॥

एवं चरमवर्णश्रवणसहितशेषवर्णानां तेनैव क्रमेण संस्कारानुबुद्धत्वात् शाब्दबोधः लभ्यते यथा क्रमविरुद्ध अपि न द्रश्यते ।

एवं प्रकारेण खण्डवाक्यबोधः तद्द्वारा च महावाक्यबोधः सम्भवतीति विशेषेण न वक्तव्यम् ।

आसत्तिवशात् यत्संस्कारवत्त्वं तेन पदार्थस्मरणं तथाविधपदार्थानां भूयोभूयः स्मरणवशात् कुत्रचित् शब्दानामध्याहारादपि शाब्दबोधः । तत्तु कुत्रचित् द्वारमित्यनेन पिधेहि इति स्मरणं कुत्रचिच्च पिधेहि इतिमात्रश्रवणाद् द्वारमित्यस्याध्यहारः सम्भवतीति सर्वमुपपन्नम् ।

(८१) प्रश्नः—शाब्दबोधे योग्यतापदार्थं बोधयत ।

उत्तरम्—'आसत्तिर्योग्यताकांक्षा तात्पर्यज्ञानमिष्यते । कारणम्' इत्यनेन शाब्दबोधस्य कारणं निरूपयति आचार्यविश्वनाथतर्कपञ्चाननः स्वन्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे । तत्र योग्यताया लक्षणं लक्ष्यति यथा—

'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ।' इति ।

तदेवोच्यते—'एक पदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः' । तस्यार्थः—अन्वयानुपपत्ति-तात्पर्यानुपपत्तीनामभाव एव योग्यता शब्देनोच्यते । तेन यत्र संज्ञाशब्देन क्रियापदार्थं प्रत्यर्हत्वम् बोधविषयं याति तदेव योग्यता । यथा 'घटमानय' इत्यत्र आनयेति क्रियापदार्थः घटमिति कर्तृपदेन सह अन्वययोग्यतां भजति । एवञ्च घटरूपपदार्थः आनयरूप क्रियार्थेन अन्वितः । तथा सति वह्निनासिञ्चतीत्यत्र न शाब्दबोधः सेचनरूपकर्मणि वह्निरूपकरणस्य योग्यताभावात् । अत्र केचन् न इति आशङ्कन्ते । शाब्दबोधरूप फलोदयानन्तरमेव योग्यताया अयोग्यताया वा बोधः अत एव योग्यताज्ञानन्तु फलं शाब्दबोधंस्तु कारणमिति च सति योग्यताया शाब्दबोधं प्रति कारणत्वम् अयुक्तमेव ।

तन्न इति निराकरोति तत्तत्पदार्थस्मरणात् कुत्रचित् संशयरूपस्य कुत्रचिच्च निश्चयरूपस्य योग्यताज्ञानस्य शाब्दबोधात् पूर्वमेव सम्भवः । इति ।

तथा च नव्यनैयायिकाः योग्यतां शाब्दबोधं प्रति न कारणमिति स्वीकुर्वन्ति

किन्तु योग्यता शाब्दबोधं प्रति अनुयोगी प्रतियोगी वेति शाब्दबोधेन योग्यताया सम्बन्धः । अतः योग्यता शाब्दबोधं प्रति न कारणमिति नव्यनैयायिकसम्मतम् ।

वह्निना सिञ्चतीति स्थले प्रथम प्रत्येकपदार्थं लभ्यते ततो वाक्यार्थम् । वाक्यार्थज्ञाने पदार्थानामन्वयः कुत्रचिच्च वाक्यार्थज्ञाने अन्वयानुपपत्तिः । अन्वयानुपपत्तिस्थले शाब्दबोध प्रतिबन्धकत्वम् योग्यताभावं सङ्केतयति । इत्यलं विस्तरेण ।

(८२) प्रश्नः—आकांक्षा-लक्षणं प्रदर्श्य शाब्दबोध आकांक्षाया कारणत्वं दर्शय ।

उत्तरम्—यत्र एकपदस्यार्थो द्वितीयपदार्थबोधं विना अपूर्ण इव लक्षते तत्र तस्य पदस्य अपरपदाकांक्षा इति कथ्यते । आकांक्षा शाब्दबोधं प्रति आसत्तियोग्यतावत् कारणम् । तस्य लक्षणमुच्यते—

'यत्पदेन विना यस्याऽननुभावकता भवेत् ।
आकांक्षा ....॥' इति ।

अस्यार्थः—येन पदेन विना यत्पदस्याननुभावकत्वं तेन पदेन सह तस्याकांक्षेत्यर्थः । तेन गौरश्वः पुरुषो हस्तीति पदसमूहेऽपि न शाब्दबोधः ।

कारकपदं क्रियापदमाकांक्ष्यति । तेन तत्र तस्य आकांक्षेत्युच्यते । क्वचित्तु शाब्दबोधे क्रियापदस्याध्याहारः क्वचित् क्रियापदस्य शाब्दबोधाय कारकस्याध्याहारः कल्प्यते तेन क्वचित् पिधेहीति पदेन द्वारमित्यस्याध्याहारः कुत्रचिच्च द्वारमिति पदेन क्रियापदस्य पिधेहीत्यस्य अध्याहारः । यथा वा गौर्वाहीकः इत्यत्र अस्तीतिपदस्याध्याहारः प्रसिद्धमेव ।

वस्तुतस्तु क्रियापदानां सन्निधानमासत्त्या चरितार्थम् । आसत्तिरिति अव्यवधानेनोच्चारणम् । तेन घटकर्मताबोधम्प्रति उत्तरपदस्य आनय इत्यस्य कुरु इत्यस्य वा आकांक्षा भवति तत्पदं विना शाब्दबोधाभावात् ।

यथा कर्मपदस्य शाब्दबोधाय क्रियापदस्याध्याहारः तथैव कर्तुरपि । तथाविध पदानामभावे अध्याहार अपि स्वीकर्तव्यम् । एवं सति घट कुरु इत्यत्र 'त्वम्' इति पदस्याप्यध्याहारः ।

क्वचिच्च आकांक्षा वक्तुः तात्पर्यज्ञानानुयोगी सति अन्वयमपि बोधयति यथा—'अयमेति पुत्रः राज्ञः पुरुषोऽपसार्यताम्' अत्र राज्ञः इति षष्ठी पुत्रेण किं वा पुरुषेण अन्वित इति न स्पष्टं प्रकरणानुसारि तद्बोधे सति 'अयं राज्ञ

पुरुषो एति, पुत्र अपसार्यंयताम्' इति 'राज्ञः पुरुषः एति, अयं पुत्रः अपसार्यंताम्' इति वा, 'अयं पुत्रः एति, राज्ञः पुरुष अपसार्यंताम्' इति वा शाब्दबोधः लभ्यते तत्सर्वं सन्देहन्तु प्रकरणानुसारं निराक्रियते। एवम् आकाक्षां शाब्दबोधे कारणम्, क्वचिच्च प्रकारणानुसारम् आकांक्षाया निराकरणं भवतीति दिक्।

(८३) प्रश्नः—शाब्दबोधे तात्पर्यस्य कथं कारणत्वमिति सम्यक् निरूपणीयम्।

उत्तरम्—तात्पर्यस्य लक्षणमुक्तं न्यायसिद्धान्तमुक्तावलीकारैः—

'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्।

वक्तुरिच्छा तु प्रकरणादिभिः वक्तुरभीष्टम् अर्थं यद् ज्ञायते तत्तात्पर्यमिति लक्षणार्थः। न तु वाक्यगतपदैरेव तस्य बोधकत्वम् 'सर्वे सर्वार्थवाचकाः' इति सिद्धान्तात् शब्दानां बह्वर्थकत्वाद्वा—

'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु॥' इति।
रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे।
राघवे चासिते श्वेते मनोज्ञेऽपि च वाच्यवत्॥ इति च।

एवंविध कोशवाक्येभ्यः शब्दानामेकाधिकार्थवाचकत्वे सति कथं प्रकरणादिकं विना कथं शाब्दबोधः स्यात् इति शाब्दबोध कारणेषु वक्तुः तात्पर्यम् अन्यतमं कल्पितम्। तदेवोच्यते—'यदि तात्पर्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिच्च लवणस्य बोधः न स्यात्।' इति।

ननु तथापि तात्पर्यं शाब्दबोधकारणत्वेऽनावश्यको प्रकरणादिरेव तस्य सम्भवादिति च न वक्तव्यम्। गौरवदोषपातात्।

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

इति संयोगादीनां बहूनामर्थं नियामकत्वात्। तदपेक्षया तात्पर्यज्ञानस्यैव-कारणत्वकल्पने लाघवात्। तदेवोक्तम्—'न च तात्पर्यग्राहकप्रकरणादीनां शाब्दबोधे कारणत्वमस्त्विति वाच्यम्। तेषामननुगमात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तात्पर्यज्ञानमेव लाघवात् कारणमस्तु।' इति।

वक्तुरभावात् वेदादिषु शाब्दबोधकारणत्वेन ईश्वरः कल्प्यते वक्तुः तात्पर्यमित्यत्र ईश्वरेच्छा शाब्दबोधे कारणत्वेन कल्प्यते। सर्गादौ वेदादीनां ईश्वरेच्छया सृष्टित्वात्।

न च 'प्रलय एव नास्ति कुतः सर्गादौ इति कल्पितमिति' वक्तव्यम्। वेद वाक्यात् प्रलयस्य प्रमाणितत्वात्।

अन्य तु सर्वत्र तात्पर्यज्ञानस्यैव कारणत्वं न स्यादिति कथयन्ति। यत्र तु बह्वर्थकानां पदानां प्रयोगः तत्रैव तात्पर्यस्य कारणत्वमिति कल्पयन्ति तन्न। सर्वे सर्वार्थवाचका इति नियमात् स्वयमेव निरस्तत्वात्।

एवं तात्पर्यज्ञानस्य शाब्दबोधे कारणत्वं सिद्धम्। नात्र किञ्चिद्विचिकित्सा इति दिक्।

इति शब्दखण्डं समाप्तम्।

स्मृतिप्रक्रियाखण्डम्

(८४) प्रश्नः—स्मृतेः लक्षण प्रतिपाद्यताम् ।

उत्तरम्—स्मृतिर्नाम अनुभवव्यतिरिक्तं ज्ञानम् । बुद्धिः द्विविधा—अनुभवरूपा स्मृतिरूपा च । अनुभवश्चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् । तद्व्यतिरिक्तं ज्ञानं स्मृतिः । नैतत्स्मृतिलक्षणम्; अनुभवव्यतिरिक्तम् ज्ञानं स्मृतिः स्मृतिव्यतिरिक्तञ्चानुभवः इति अन्योऽन्याश्रयदोषग्रस्तत्वात् ।

अनुभवजन्यं ज्ञानं स्मृतिः इति स्मृतिलक्षणमस्त्विति चेत् न, अनुभवस्य तृतीयक्षणविनाशित्वात् । स्मृतिस्तु कालान्तरभाविनी । तत्र, अवान्तरव्यापाररूपेण संस्कारस्य सत्त्वात्, अनुभवजन्यं ज्ञानं इति लक्षणपदं निदुष्टमेवेति चेत् न, प्रत्यभिज्ञायाम् अतिव्याप्तत्वात् ।

स्मृतौ अनुभवस्य कारणत्वं स्पष्टमेव । तथा सति अवान्तरव्यापारस्य तु संस्कारस्य स्थितौ, अनुभवजन्यसंस्कारजन्यज्ञानविषयत्वम् स्मृतिः । नेति तल्लक्षणेऽपि प्रत्यभिज्ञायाम् अतिव्याप्तिः । ननु अनुभवत्वेन न कारणत्वम् ज्ञानत्वेनैव कारणत्वं स्यादिति चेत् न संस्कारस्य ज्ञानभिन्नत्वात् । तथा च सति अनुभवस्य कारणत्वे स्मृतिजन्यस्मृतावव्याप्तिः ।

तथा च समूहालम्बनात्मकं यदनुभवः तत्र चरमस्यैवावशिष्टत्वात् शेषे स्मृतिः न स्यादिति अनुभवविरुद्धम् । शेषानां तृतीयक्षणविनाशित्वात् न स्मृतिलक्षणवत्त्वम् । न च क्रमिकस्मरणानुपपत्तिः संस्कारनाशत्वात् । दीर्घकालस्य, दीर्घरोगस्य चरमफलस्य च संस्कारनाशकत्वात् ।

न च भूयो भूय स्मरणाद् दृढतरसंस्कारानुपपत्तिरिति वाच्यम् । उद्बोधकस्य सत्त्वादेव संस्कारस्य दार्ढ्यकरत्वम् इति ।

स्मृतिलक्षणे यदि अनुभवस्य ज्ञानस्य वा कारणत्वनिश्चये प्रमाणाभावादुभयोरेव कारणत्वं स्वीक्रियेत इति चेत् तदपि न युक्तम् व्यभिचारदोषपातासम्भवात् । तथा च सामान्यधर्मेणैव कारणत्व कल्पनमन्यथासिद्धत्वात् अयुक्तमेव ।

एवं स्मृतिलक्षणे दोषकल्पनमुक्तं ग्रन्थकारैः तदिदम् स्मृति लक्षणं क्रियते । 'प्रत्यभिज्ञाभिन्नत्वे सति ज्ञातविषयकं ज्ञानं स्मृतिः' इति ।

इति स्मृतिप्रक्रियाखण्डं समाप्तम् ।

मनोनिरूपणखण्डम्

(८५) प्रश्नः—मनसः सिद्धौ किं मानम् ? इति सम्यग् व्याख्याय मनसोऽणुत्वं साधयत।

उत्तरम्—एकादशेन्द्रियाणां मध्ये पञ्च ज्ञानेन्द्रियाणि पञ्चैव कर्मेन्द्रियाणि, एवञ्च ज्ञानकर्मोभयात्मकं मन इति कल्प्यते। तत्र दशेन्द्रियाणि तु प्रत्यक्ष-सिद्धानि एकादशेन्द्रियस्य मनसः सिद्ध्यर्थं प्रमाणं प्रदर्शयति—

'साक्षात्कारे सुखादीनां करणं मन उच्यते।' इति।

तस्यार्थः करणन्तु प्रकृष्टतमं कारणम्, कारणानां मध्ये यत्प्रकृष्टतमं कारणं तत्करणमित्युच्यते। सुखादीनां साक्षात्कारं कार्यं तस्य करणं प्रकृष्टतमं कारणं साधनभूतमित्यर्थः। यथा रूपसाक्षात्कारादीनां कार्याणां करणानि चक्षुरादीनीन्द्रियाणि तथैव सुखादिसाक्षात्कारस्य करणं मन इत्यर्थः।

एतेनैव मनसः सिद्धिरपि दर्शिता। 'सुखसाक्षात्कारः सकरणकः जन्य-साक्षात्कारत्वात् चाक्षुषसाक्षात्कारवदित्यनुमानेन मनसः सिद्धिः। अत्र मनः अस्तीति प्रतिज्ञा, सुखादिसाक्षात्कारकर्तृत्वादिति हेतुः। यद्यत् जन्यसाक्षात्कारः तत्तत् सकरणकमिति यथा चाक्षुषसाक्षात्कारः, इति दृष्टान्तः। सुखादि साक्षात्कारः अपि जन्यसाक्षात्कारः इति उपनयम्, तस्मात्तथा (सकरणकमित्यर्थः) इति निगमनम्। तत् सुखादिसाक्षात्कारकरणमेव मनः। इति मनसः सिद्धिः।

ननु सुखसाक्षात्कार इव दुखादिसाक्षात्कारः अपि जन्यसाक्षात्कारः अतः तत्र तत्र पृथग् इन्द्रियत्वम् कल्पितव्यम् इति चेत् न, गौरवात् सुख इव दुःखादीनामपि एकैनेवेन्द्रियेण साक्षात्कारः कल्पनीयम् इति लाघवम्। न च पृथक्त्वे किञ्चित्प्रमाणम्। अत एकस्यैव मनसः सुखदुःखादीनां करणत्वमिति निर्णयः।

एवं मनसः सिद्धिं प्रदर्श्य तस्याणुपरिमाणं साधयितुमुच्यते—

'अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते।' इति।

तस्य मनसः अणुत्वम् अणुपरिमाण इष्यते = अभीधीयते। कस्मादिति चेत् ज्ञानानाम् अयौगपद्याद् = युगपद् ज्ञानाभावात् इति।

एककाले एकज्ञानस्यैव सम्भवात् मनसः अणुत्वं सिद्धम् । यदि मनः विभुः स्यात् तर्हि एव सर्वविधज्ञानानां समकालेनैव सम्भवं स्यात् न च तथा अनुभव-विरुद्धत्वात् । तत्र नानेन्द्रियाणाम् एककाले एव स्वविषयसम्बद्धत्वे सति अपि तस्य तस्य ज्ञानासम्भवात् मनसोऽणुत्वमेव सिद्धम् । विभुत्वे सति मनसोऽसन्निधानासम्भवः ।

यत्तु दीर्घशष्कुली भक्षणकाले रसगन्धादीनासममेवानुभव इति मनसोऽणुत्व-कल्पनाविरुद्धमिति तर्क्यते तदप्ययुक्तम्, तत्रापि अलक्षक्रमः सदपि क्रमशः एव ज्ञानं सूच्या शतपद्मपत्रछेदमिव । इत्येव सरणि युक्तम् ।

ननु अलक्ष्यक्रमापेक्षया मनस सङ्कोचविकाशशीलत्वमेव कल्पनीयमिति चेत् तदपि न । सङ्कोचविकाशशीलत्वे सति मनसः सावयवत्वं कल्पितव्यम् तत्तु न युज्यते । सङ्कोचे परमाणु नाशः विकाशे च परमाणु वृद्धिरिति स्यात् । न च मनस सावयवत्वम् अतो न सङ्कोचविकाशशीलत्वम् इति दिक् ।

एवं मनसः सिद्ध्यनन्तरम्, तस्याणुत्वमपि सिद्धमिति सर्वमुपपन्नम् ।

इति मनोनिरूपणखण्डं समाप्तम् ।

गुणनिरूपणखण्डम्

(८६) प्रश्नः—गुणत्वजातिसिद्धौ किं मानम् ? इति सविशदं दर्शयत ।

उत्तरम्—गुणत्वं नाम जातिर्नास्ति मानाभावात् इति पूर्वपक्षः । तद् एव विशदयति—गुणत्वजातिः प्रत्यक्षसिद्धा न इन्द्रियसन्निकर्षाभावात् । इन्द्रियसन्निकर्षजन्यं ज्ञानमेव प्रत्यक्षम् । न च गुणत्वजातिः अनुमेया, लिङ्गपरामर्शोऽनुमानम्, गुणत्वजातेः कश्चिल्लिङ्गाभावात् । न च उपमानगम्या, सादृश्यजन्यं ज्ञानमुपमानम्, न च गुणत्वजातेः सदृशं किञ्चिदस्ति । नापि गुणत्वजातिः शब्दप्रमाणगम्या आप्तवाक्याभावात् इति गुणत्वजातिसिद्ध्यभावात् तदभाव एव कल्पनीयः ।

तन्न, कश्चिदपि जातिः न प्रत्यक्षसिद्धा जाते (सामान्यस्य) प्रत्यक्षत्वाभावात् । अनुमानमत्र दर्शयति—'द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात् ।' इति अत्र अनुमानप्रक्रिया—द्रव्यकर्मभिन्न सामान्यवद् कारणता किञ्चद्धर्मावच्छिन्ना, इति प्रतिज्ञा, कारणतात्वात् इति हेतुः, यत्र-यत्र कारणता तत्र-तत्र किञ्चिद्धर्मावच्छिन्नता यथा द्रव्यत्वम्, इति दृष्टान्तः, गुणेषु अपि कारणता इति उपनयम् तस्मात्तथा (किञ्चिद्धर्मावच्छिन्ना) इति निगमनम् । तद्धर्म एव गुणत्वम् । इति निश्चयः एवं गुणत्वजातेः सिद्ध्यति ।

ननु सत्ताजाति सत्त्वात्, सत्ता एवात्र गुणानां जात्यवच्छिन्नं कल्प्येत् चेत् न अतिव्याप्तित्वात् रूपत्व रसत्वादिकमपि न अव्याप्ति दोष ग्रस्तत्वात् ।

तेन चतुर्विंशति गुणानां गुणत्वजातिरेवात्र कारणतावच्छिन्ना जातिः । इति सिद्धम् ।

(८७) प्रश्नः—गुण पदार्थस्य लक्षणं प्रदर्श्य सविशदं व्याख्यायताम् ।

अथवा

'अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ।'

इति कारिकांशो व्याख्येयः ।

उत्तरम्—गुणपदार्थं निरूपयन्नाह ग्रन्थकारः—

'अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ।' इति ।

अत्र द्रव्याश्रिता इति न गुणपदार्थस्य लक्षणम्, कर्मादावतिव्याप्तेः कर्माण्यपि द्रव्याश्रिता एव अत एव द्रव्याश्रयत्व गुणत्वमिति न युक्तम् । अत्र द्रव्याश्रिता इत्यत्र द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वमिति तात्पर्याभिव्यञ्जकम् । तेन द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसत्ताभिन्नजातित्वं गुणस्य लक्षणम् । यदेवोक्तम् ग्रन्थकृद्भिः—

'द्रव्याश्रिता इति । यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावति व्याप्तेः तथापि द्रव्यत्व व्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः । भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तदुक्ता च गुणानामिति ।'

द्रव्यत्वव्यापकताया अवच्छेदकं तु द्रव्यत्वं कर्मत्वं वा न, सत्यपि द्रव्ये आकाशादिषु द्रव्यकर्मणोरभावः । द्रव्यत्वं सामान्यादिकं वा न जातिः ।

अस्यार्थः द्रव्यत्वाधिकरणभूते घटे यदभावं तद् गुणस्य सत्तावतो अभावः न, घटे गुण-सत्त्वयोः सत्त्वात् । तदभावस्तु गुणसत्त्वभिन्न एव । तदभावप्रतियोगि च उदासीनप्रतियोगितावच्छेदक-उदासीनवृत्तिधर्मानवच्छेदकं गुणत्त्वं सत्ता च, सत्तायां सत्ताभिन्नत्वाभावात् परिशेषात् गुण एव गुणत्ववान् गुण एवेति । द्रव्यत्व-कर्मत्वे न द्रव्यत्व व्यापकतावच्छेदके आकाशदिक् कालात्मसु समवायसम्बन्धेन द्रव्यत्व कर्मत्वाभावः । अतः द्रव्यत्वव्यापकतावच्छेदक इत्यनेन द्रव्यकर्मयो-र्नातिव्याप्तिः । इति ।

निर्गुणा इति । निर्गुणत्वमपि न गुणसामान्यलक्षणम् । अस्यार्थः तु गुणेषु गुणा न तिष्ठन्ति इत्येव । न तु गुणाश्रयत्वरहितत्वं गुणत्वमिति लक्षणम् न च सत्ताजातिमत्त्वे सति इत्यन्तपदसंयोजनेऽपि गुणलक्षणनिष्पत्तिः कर्मणि अति-व्याप्तत्वात् । तेन सामान्यवत्त्वे सति कर्माश्रयत्वे सति निर्गुणत्वं गुणत्वमिति गुणलक्षणं स्यात् तदेव निर्गुणशब्दस्यार्थो ज्ञेयः । पदार्थेषु सामान्यादीनां (सामान्य-विशेष-समवायाभावानां) न सामान्यवत्त्वम् न च कर्मणां कर्मान्यत्वं, न तु द्रव्यानां निर्गुणत्वमिति परिशेषात् गुणलक्षणम् । अत्र सामान्यादिषु अति-व्याप्ति-निवारणाय सामान्यवत्त्वम्, कर्मस्वतिव्याप्तिनिवारणाय कर्मान्यत्वम्, द्रव्येष्वतिव्याप्तिनिवारणाय निर्गुणत्वम् ।

निष्क्रिया इत्यपि न लक्षणपदम् गगनादावतिव्याप्तेः । अस्यार्थः क्रियाऽन-धिकरणत्वमात्रमस्ति ।

वस्तुतः द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं गुणत्वमिति गुणलक्षणमवसितम्।

(८८) प्रश्नः—गुणत्वजातेः सिद्धिं प्रदर्श्य गुणसामान्यलक्षणं लिखत।

उत्तरम्—अत्र ८८-८९ तम प्रश्नस्योत्तरे द्रष्टव्ये।

(८९) प्रश्नः—रूपत्वजातेः सिद्धिं प्रदर्श्य रूपं निरूप्यताम्।

उत्तरम्—चतुर्विंशतिगुणानाम्मध्ये चक्षुर्ग्राह्यं तेजसो विशेषगुणः रूपम्। तथा चाह न्यायसिद्धान्तमुक्तावलीकारः—

'चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम्' इति।

तस्यार्थः—रूपं चक्षुरिन्द्रियग्राह्यम्। द्रव्यादेरुपलम्भकमित्यनेन द्रव्यलब्धिसाधनमित्यर्थः।

'येनेन्द्रियेण यल्लभ्यन्ते तेनैवेन्द्रियेण तन्निष्ठा जातिः तदभावश्च गृह्येते' इति नियमेन रूपत्वजातिरपि चक्षुर्ग्राह्यमिति कल्पनीयम्। इति रूपत्वजातिग्रहणे प्रमाणम्।

इदं रूपमिदं रूपमिति रूपविषये यद्भूयोभूयः प्रत्यक्षविषयत्वं तदेव रूपत्वजातेः प्रत्यक्षविषयत्वं सिद्धमेव। अत्र रूपनिष्ठविशेष्यतासम्बन्धेन रूपत्वप्रकारकप्रत्यक्षं प्रति स्वविषयसामान्यवत्वसम्बन्धेन रूपत्वज्ञानं कारणमिति तादृशकारणतायां विषयविधयावच्छेदकतया रूपत्वजातिसिद्धिरिति स्वीकर्तव्यम्। एवं जातिबाधकाभावे, इदं रूपम् इदं रूपमित्येवं प्रकारका या अनुगत प्रतीतिः सा रूपत्वजातिसिद्धौ प्रमाणम्। रूपमिति शब्देन अनभ्युपगतेऽपि सत् नीलपीतादिवर्णपदेन बोधिते सति रूपत्वसामान्यस्य एव बोधः इति अनुगतप्रतीत्या रूपत्वजातेरेव सिद्धिः। तदेवोच्यते—

'रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेन्मास्तु रूपशब्दप्रयोगः तथापि नीलःपीतादिष्वनुगतजाति विशेषोऽनुभवसिद्ध एव।' इति।

अस्यार्थः—रूपविशेषस्याप्रयोगेऽपि पीतवर्ण-नीलवर्णादीनां या अनुगतप्रतीतिः सा तु रूपानुगता एव अत एव रूपत्वजातेः सिद्धिस्तु स्पष्टमेव।

यत्तु एकव्यक्तिनिष्ठा नीलपीतादौ वर्णे नीलत्वपीतत्वमेव जातिः स्यादित्युच्यते तदपि न युक्तम्, एकव्यक्तिनिष्ठा न जातिः इति नियमः। तथा च सति नीलो नष्टः पीत उत्पन्न इति प्रतीतिरपि न स्यात् एक व्यक्तिनिष्ठत्वे सति नीले

नष्टे नीलत्व जातेरपि नाशः आश्रयनाशात् इति। न तु सामान्यस्य नाश-सम्भवः। इति।

न च नीलपीतादिसमवायानामेव तत्र प्रतीतिः न तु नीलपीतादिगुणानामिति वक्तव्यम्, समवायस्य प्रतीतिविषयत्वाभावात्। तथा च समवायप्रतीति स्वीकारे गौरवदोषपातः। नीलपीतादिवर्णानां प्रतीतिरेव प्रत्यक्षसिद्धा तत्स्वीकारे लाघवश्च। तथा च तन्नील-एतन्नीले अभेदप्रतीतिस्तु न प्रत्यक्षसिद्धा अन्यथा नील-नीलतरादि व्यवहारासम्भवः।

तदत्र रूपस्य लक्षणं यथा—'त्वगग्राह्यत्वे सति चक्षुग्राह्यत्वे सति गुणत्वं रूपत्वम्।' इति। अत्र स्नेहादावति व्याप्तिवारणाय त्वग्ग्राह्यत्वपदम्। प्रभायां रूपत्वे च अतिव्याप्तिवारणाय गुणत्वपदम्। इति लक्षणमुपपन्नम्। अथवा 'चक्षुर्मात्रग्राह्यत्वे सति विशेषगुणः रूपम्' इति। अत्र 'मात्र' इति 'विशेष' इति च दलं संख्या-परिमाणादिषु अतिव्याप्तिनिवारणाय। अर्थात् रसादिष्वतिव्याप्तिवारणाय चक्षुरितिपदम्, द्रव्यादिष्वतिव्याप्तिवारणाय गुण इति संख्यादिष्वतिव्याप्तिवारणाय विशेषपदम्।

तच्चरूपं शुक्लनीलपीतरक्तहरितकपिशकर्बुरभेदादनेकप्रकारकं भवति। इति सर्वमुपपन्नम्।

(९०) प्रश्नः—चित्रवर्णे रूपत्वं साधयत।

उत्तरम्—रूपं शुक्लनीलपीतरक्तहरितकपिशकर्बुरभेदेन अनेकप्रकारकं (सप्तविधं) भवति। अत्र नव्यनैयायिकाः रूपं षड्विधमेव स्वीकुर्वन्ति। कर्बुरं तु न पृथग्रूपं; प्रमाणाभावात् इति। तन्न युक्तम्, नीलपीतादिविविधवर्णयुक्ते एकस्मिन्नेव पटे नीलादि व्यवहारासम्भवात्। न च तन्नीरूपम्, प्रत्यक्षाविरोधात् न वा नीलमिति पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात्। नीलं हि तत्र अव्याप्यवृत्तिः अत एव नीलवर्णोऽयमिति च न वक्तव्यम्।

एवं नील-पीतादिरूपाणां निवृत्ते सति शेषवदनुमानेन चित्रवर्णं प्राप्तमिति सिद्धम्। तथा च नानारूपकल्पनायां गौरवः।

एवं नीलवर्णेन पीतारम्भ इति प्रतिबन्धककल्पनायां अवयविनि पीताद्युत्पत्तेरभावः तत्र समवायसम्बन्धेन नीलम्प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलातिरिक्तत्वेन नीलरूपः प्रतिबन्धकः स्यात् तथा च समवायसम्बन्धेन पीतरूपं प्रति समवायिसमवेतसम्बन्धेन पीतातिरिक्तत्वेन प्रतिबन्धकताकल्पनायां नीलादेरुत्पत्ति-

प्रतिबन्धः स्यात् अन्यथा अनेकरूपवतकपालोत्पन्नघटे नीलदेशे पीतोत्पत्तिरसम्भवा। इति नीलपीतादीनां पृथक्त्वं कल्पनीयम्।

एवं सति पृथक्-पृथक् नीलपीतादिवर्णवति घटापटादिद्रव्ये चित्ररूपोत्पत्ति एव स्वीकरणीया। इति स्पष्टमेव।

नव्यास्तु तन्न स्वीकुर्वन्ति। चित्रवर्णस्य पृथग्रूपत्वाभावात्। एवं सति चित्रवर्णकल्पने पृथक् पृथक् वर्णानाम् अवयवत्वकल्पनमशक्यमेव। तथा च नीलवृषादिनिरूपणमपि प्रतिबन्धितं स्यात्—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥

इत्याद्यनुपपन्नं स्यादिति। अत एव चित्रवर्णस्य पृथग्वर्णत्वकल्पनम् एव युक्तम् स्यादिति अत्र अनेकवर्णत्वं न कल्पनीयमिति दिक्।

(९१) प्रश्नः—वैशेषिकसम्मतां पीलुपाकप्रक्रियां तत्र क्षणप्रक्रियां च निरूप्य न्यायसम्मतं पिठरपाकप्रक्रियामपि व्याख्यायताम्।

उत्तरम्—पीलुपाकमतम्—पाकविषये वैशेषिकमतं दर्शयन्नाह विश्वनाथतर्कपञ्चाननभट्टाचार्यः—

एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्।
तत्रापि परमाणौ स्यात् पाको वैशषिके नये॥ इति।

अस्यार्थः पृथिव्या रूपरसगन्धस्पर्शाः पाकजाः भवन्ति, अन्यत्र जलादिषु न पाकजा रसादयः। अस्यार्थः यथा घटादिषु पाकजन्यं रूपपरिवर्तनं द्रश्यते न तथा जलीयादिविषयेषु। श्यामः घटः पाके सति स्वश्यामरूपन्त्यक्त्वा रक्तरूपं धारयति तथा न जलादिः सहस्रशोऽपि तापं प्राप्य स्वरूपं परित्यजन्ति।

वैशेषिके परमाणौ पाकः स्वीक्रियते तदेव पीलुपाक इति कथ्यते पीलु इत्यनेन परमाणु इति लक्ष्यते। तेन परमाणूनां पाक इत्येव 'पीलुपाक' शब्दस्यार्थः। तेन पाकजरूपः पाकजरसः इत्यादय उत्पद्यन्ते। एवं प्रतिपरमाणुपाकेन पिण्डस्य पाकः सम्भवति। पाकक्रिया मध्ये प्रथमं पिण्डाद्यारभ्य द्व्यणुकपर्यन्तस्य भेदः तत्र प्रथमं घटभेदस्ततः कपालभेदः ततः त्र्यणुकादिभेदः अन्ते च द्व्यणुकभेदेन प्रतिपरमाणु पृथक् क्रियते। तदनन्तरं च प्रति परमाणोः पाकः। तेन श्यामरूपनाशः तथा च रक्तरूपोत्पत्तिः। ततश्च संयोगेन रक्तघटः उत्पद्यते।

एवं प्रतिपरमाणुमध्ये वह्नेः प्रवेश एव पीलुपाकसिद्धान्तः। परमाणूनां मध्ये वह्नि प्रवेशादेव अवयवभेदः दृश्यते।

तत्रायमाशयः अवयविनः पाकः असम्भव एव। विजातीयतेजःसंयोगात् रूपनाशः। अवयविना अवयवेषु आच्छादिते सति समस्तेषु अवयवेषु अभेदे सति न पाकः सम्भवेत्। वह्निसंयोगेन परमाणूनां पृथक् पृथक्त्वे सति एव पाकः सम्भवति। तेन व्यूहान्तरोत्पत्तिः।

एवं स्थितौ प्रथमं पूर्वरूप नाशः ततः पिण्डनाशे अवयवनाशे च परमाणु-पृथक्त्व-कल्पनम् इति सिद्धान्तः। एवं सम्पूर्णपाकप्रक्रियायाम् नवक्षणेषु पाकजोत्पत्तिः। १. प्रथमं हि अग्निसंयोगेन द्रव्यारम्भक परमाणुषु कर्म, परमाणुद्वय-विभागः, द्वयणुकारम्भकसंयोग नाशः ततः द्वयणुकनाशः। २. ततः परमाणुषु श्यामरूपनाशः। ३. रक्तरूपोत्पत्तिः। ४. द्वयणुकारम्भककर्म। ५. ततः विभागः। ६. ततः पूर्वसंयोगनाशः। ७. द्रव्यारम्भसंयोगारम्भः। ८. कार्योत्पत्तिः। अन्ते च, ९. द्वयणुके रक्तरूपोत्पत्तिः। इति नवक्षणेषु व्यवहारः। ननु, तृतीय क्षणे एव रक्तरूपोत्पत्तिसम्भवात् नवक्षणकल्पनायां गौरवदोषः। तत्तु प्रथमक्षणे द्वयणुकनाशः, द्वितीयक्षणे श्यामरूपनाशः, तृतीयेक्षणे च रक्तरूपोत्पत्तिः इति क्षणत्रये एव कार्यसम्पादने सति नवक्षणकल्पना गौरवदोषावहा एवेति चेत्,

तन्न। धर्मवति धर्मान्तरोत्पत्तिपातासम्भवात्। तथा च परमाणुषु यत् रक्त-रूपं तत्तु घटगतरक्तरूपस्यासमवायिकारणम् अतः उभयोः क्रिया समकालत्वम-सम्भवः। असमवायिकारणानां क्षणद्वयापेक्षित्वात्।

केचित्तु दशक्षणव्यापि प्रक्रिया इयमिति स्वीकुर्वन्ति। तत्र १. द्वयणुकनाश-विभागजविभागः। २. श्यामरूपनाशपूर्वसंयोगनाशौ। ३. रक्तोत्पत्त्यन्तरसंयोगौ। ४. ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः। ५. अदृष्टवदात्मसंयोगाद्द्रव्या-रम्भानुगुणा क्रिया। ६. ततो विभागः। ७. ततः पूर्वसंयोगनाशः। ८. तत आरम्भकसंयोगः। ९. ततो द्वयणुकोत्पत्तिः। १०. ततो रक्तरूपोत्पत्तिः। इति।

केचिदन्ये एकादशक्षणव्यापि पाकप्रक्रियेयं स्वीकुर्वन्ति। तत्र १. प्रथमक्षणे वह्निसंयोगात् द्वयणुकनाशपर्यन्तम्। २. विभागजविभागश्यामनाशौ। ३. पूर्व-संयोगनाशरक्तोत्पत्ती। ४. उत्तरदेशसंयोगः। ५. वह्निनोदनजन्यपरमाणुकर्म-नाशः। ६. अदृष्टवदात्मद्रव्यारम्भानुगुणा क्रिया। ७. ततो विभागः। ८. पूर्व-संयोगनाशः। ९. द्रव्यारम्भकोत्तरसंयोगः। १०. ततो द्वयणुकोत्पत्तिः। ११. ततो रक्ताद्युत्पत्तिः। इति।

एवं नव-दश-एकादश वा क्षणव्यापि पीलुपाकप्रक्रियाद्वारा घटस्य पाकः, पाकजरूपोत्पत्तिश्च ।

न च एकस्मादेव अग्निसंयोगाद् सम्पूर्णप्रक्रियाया असम्भव इति अग्नेरस्थिरत्वात् । तथा च एकस्यैव वह्नेः पूर्वधर्मनाशकत्वम् द्वितीयधर्मोत्पादकत्वं च असम्भवमेव । नाशकस्य उत्पादकत्वे अनिष्टापत्तिः । उत्पादकश्चेन्नाशकः तदा रक्तवर्णोत्पत्त्यनन्तरं तस्यापि नाशसम्भवप्रसङ्गः । इति । तेन वह्नेरस्थिरत्वम्, नवीनवह्नेरुत्पत्तिश्च कल्पनीया ।

एवं घटपाकक्रियायां वैशेषिकाभिमता पीलुपाकप्रक्रियायां केचन पञ्च केचन षट् केचन सप्त अष्ट वा क्षणान् स्वीकुर्वन्ति । तद्यथा—

पञ्चक्षणाः—

१. परमाणौ कर्मादारभ्य परमाण्वन्तरकर्मजविभाग पर्यन्तः । २. श्यामादिनाशः विभागाच्च पूर्वसंयोगनाश इति । ३. रक्तोत्पत्तिर्द्रव्यारम्भकसंयोगः । ४. द्व्यणुकोत्पत्तिः । ५. रक्तोत्पत्तिः । इति ।

षट्क्षणपक्षः—

१. परमाणौ कर्मादारभ्य द्व्यणुकनाशपरमाण्वन्तरकर्मपर्यन्तम् । २. श्यामादिनाशः, परमाण्वन्तरकर्मजो विभागश्च । ३. रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च । ४. परमाण्वन्तरसंयोगः । ५. द्व्यणुकोत्पत्तिः । ६. रक्तोत्पत्तिः । इति ।

सप्तक्षणपक्षः—

१. परमाणुकर्मादारभ्य द्व्यणुकनाशपर्यन्तम् । २. श्यामादिनाशपरमाण्वन्तरकर्मणी । ३. रक्तोत्पत्तिः परमाण्वन्तरकर्मजविभागश्च । ४. परमाण्वन्तरेण पूर्वसंयोगनाशश्च । ५. परमाण्वन्तरसंयोगः । ६. ततो द्व्यणुकोत्पत्तिः । ७. रक्तोत्पत्तिः ।

अष्टक्षणपक्षः—

१. परमाणुकर्मादारभ्य द्व्यणुकनाशपर्यन्तः । २. श्यामनाशः । ३. रक्तोत्पत्तिपरमाण्वन्तरकर्मणी । ४. परमाण्वन्तरकर्मजविभागः । ५. पूर्वसंयोगनाशः । ६. परमाण्वन्तरसंयोगः । ७. द्व्यणुकोत्पत्तिः । ८. रक्तोत्पत्तिः । इति ।

इति पीलुपाकमते क्षणप्रक्रियाविचारः ।

पिठरपाकम्—नैयायिकास्तु वैशेषिकसम्मतं पीलुपाकमतं न स्वीकुर्वन्ति । तन्मते पार्थिवेषु यत् पाकजगुणानामुत्पत्तिः तत्र परमाणुकृतम् पिण्डे एव पाकज-

गुणोत्पत्तिर्भवतीति नैयायिकाः। नैयायिकसम्मतमेतत् सिद्धान्तं पिठरपाकमिति कथ्यते।

पिण्डनाशे सति उत्पत्तिविनाशप्रक्रियायां कल्पनागौरवः। न च पिण्डनाशे किञ्चित्प्रमाणमस्ति। तस्मात् पिण्डे एव पाकजगुणोत्पत्तिः स्वीकर्तव्या परमाणुमध्ये (द्वयोः परमाण्वोः अन्तरे) वह्निप्रवेशे पिण्डनाशकल्पनमनावश्यकम्। पिण्डनाशं विनैव परमाण्वन्तरे वह्निप्रवेशः सम्भवति। वह्निप्रवेशे सति पिण्डावयवेषु पूर्वरूपनाशः ततश्च उत्तररूपोत्पत्तिः एवं सति पिण्डरूपपरिवर्तनं भवति इति।

ननु घटादौ छिद्रयुक्ते (छिद्रकल्पने) किं प्रमाणम्? इति चेत्, उच्यते—घटादौ स्थितानां तण्डुलानां पाकेन तत्सिद्धिः। यदि घटादौ सूक्ष्मछिद्राणि न स्युः तर्हि घटस्थानां तण्डुलानां पाकः एव न सम्भवेत्। एवं घटादौ छिद्राणां स्थितिस्तु सिद्धयति। तदेवोच्यते—

"नैयायिकानां तु नये द्वयणुकादावपीष्यते।" इति

(९२) प्रश्नः—किं नाम प्रमा? के च प्रमायाः गुणाः? इति व्याख्यायत।

उत्तरम्—बुद्धिः द्विविधा—प्रमा अप्रमा च। इति। तत्र प्रमायाः लक्षणमुच्यते 'भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा' इति। भ्रम इति विपर्ययज्ञानम्। यथा रज्जौ सर्पाकारप्रतीतिः, शुक्तौ रजतज्ञानं वा, तदेव विपर्ययज्ञानमित्युच्यते। तदेव भ्रमः, तद्भिन्नमित्यनेन यथार्थप्रतीतिः। अथवा—

'तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्, तत्प्रमा'

अस्यार्थः तत्प्रकारं तद्वद्विशेष्यकं यज्ज्ञानं तत्प्रमा। तत् प्रकारम् इत्यनेन विषयाकारम् तद्वद्विशेष्यकम् इत्यनेन विशेषणयुक्तमिति प्रतीयते। तेन तत्प्रकारकत्वे सति तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमा इत्युच्यते। इति प्रमालक्षणम्।

तत्प्रकारकं ज्ञानं प्रमा इत्युक्तौ शुक्तौ रजतत्वबुद्धिरपि रजतत्व प्रकारकत्वात् प्रमेति स्यात्। तदतिव्याप्तिनिवारणाय तद्वद्विशेष्यकमिति पदम्। घटे द्रव्यमिति ज्ञाननिवृत्यर्थं तत्प्रकारकमिति पदम्।

ननु तत्प्रकारकं तद्वद्विशेष्यकं ज्ञानन्तु द्विविधम् अनुभवस्मृति भेदात्। तत्र अनुभवरूपं ज्ञानमेव प्रमा न तु स्मृतिरूपम्। अत्र लक्षणे तु घटत्ववद्विशेष्यक-

घटत्वप्रकारकस्मृतिज्ञानमपि प्रमा स्यादिति लक्षणेऽतिव्याप्तिप्रसङ्गः। न तु स्मृतौ प्रमात्वम्। अन्यथा अनुभवसंस्कारयोः स्मृति करणत्वात् तयोरपि प्रमाणत्वम् स्यादिति।

न हि तत्तथा प्रमा-इत्यनेनैव अनुभवस्य बोधात्। अथवा तत्प्रकारकं तद्विशेष्यकमनुभवमिति लक्षणं देयम्।

अथवा 'यथार्थानुभवः प्रमा' इति केशवमिश्रः। यथार्थं इत्यनेन संशय-विपर्यय-तर्कज्ञानानां निवृत्तिः। अनुभव इत्यनेन स्मृतेर्निराशः।

प्रत्यक्षानुमानोपमानशब्दजन्यत्वात् प्रमाऽपि चतुर्विधा। तत्र प्रत्यक्षजन्य प्रमाया गुणन्तु विशेषणेन सह विशेष्यस्य इन्द्रियैः सन्निकर्षः। मात्र इन्द्रियार्थ-सन्निकर्षः न गुणम् तज्जन्यस्य ज्ञानस्य निर्विकल्पकत्वात्। निर्विकल्पकस्य तु अकिञ्चित्करत्वात् न प्रमाणत्वं न वा गुणत्वम्। साध्यविशिष्टे पक्षे परामर्शः अनुमितौ प्रमायां गुणः। सादृश्यबुद्धिरूपमितौ गुणः। शाब्दबोधे तु तात्पर्य-बोधस्य योग्यता गुणः अस्तीति शेषः।

(९३) प्रश्नः—'प्रामाण्यवाद'-शब्दस्य कोऽर्थः? किं नाम प्रामाण्यं तस्य स्वतोग्राह्यत्वम् उत वा परतोग्राह्यत्वं स्वीकार्यम्? प्रामाण्यवादविषये पूर्वपक्षनिरसनपूर्वकं न्यायसिद्धान्तमुक्तावलीकारमतं प्रदर्श्यताम्।

उत्तरम्—भ्रमभिन्नं ज्ञानं प्रमा। तस्य करणं प्रमाणम्। प्रमाणस्य भावः प्रामाण्यम्—प्रमाणशब्दात् भावार्थे ष्यञ्। प्रामाण्य सम्बन्धी वाद एव प्रामाण्य-वादः। इति प्रामाण्यवाद शब्दस्यार्थः।

पिपाशाकुलः कश्चिज्जलाय प्रवर्तते कुत्रचिद् गच्छति जलं प्राप्नोति च। तत्र, अत्र जलमस्तीति तस्य यज्ज्ञानं, तज्ज्ञानस्य प्रामाण्यं जलोपलब्धिपूर्वमेवास्ति उत वा जलोपलब्ध्यनन्तरं स्वीकार्यमिति विषयेऽस्ति मतभेदः तदेव प्रामाण्यवादं इति कथ्यते। ये तु जलविषयकज्ञानस्य प्रामाण्यं जलोपलब्धेः पूर्वमेव स्वीकुर्वन्ति ते स्वतःप्रामाण्यवादसमर्थकाः, ये जलोपलब्ध्यनन्तरं जलविषयकज्ञानस्य प्रामाण्यं स्वीकुर्वन्ति ते परतःप्रामाण्यवादिनः। इत्येव सरणिः।

पूर्वपक्षः (मीमांसकमतम्)—मीमांसकानां मते प्रमात्वं स्वतोग्राह्यम्। स्वतः इत्यनेन 'आत्मा' 'आत्मीयम्' इति वा अर्थो ग्रह्यते। तेन प्रमाया स्वप्रकाशत्वात् स्वत एव ग्राह्यत्वम्।

मीमांसकास्तु प्रवृत्तेः प्रागेव प्रामाण्यनिश्चयं स्वीकुर्वन्ति। तेन, येन लिङ्गेन

यज्ज्ञानं गृह्यते तेनैव तद्गतं प्रामाण्यमपि गृह्यते । न तु ज्ञानग्राहकाद्भिन्नमन्यद् किञ्चित्प्रामाण्यग्राहकम् । इति ।

प्रभाकरसम्प्रदाये ज्ञानस्यस्वतोग्राह्यत्वात् तज्ज्ञानस्य तेनैव ग्राह्यत्वम् स्वीकार्यम् । ज्ञानन्तु स्वप्रकाशस्वरूपं, न तु कश्चिदन्यः तत्प्रकाशकः । अत एव ज्ञाननिष्ठप्रामाण्यस्य ग्रहणं स्वयं तद्ग्राहकनैव भवति । अस्यार्थः—घटोऽयमित्यत्र ज्ञाता-ज्ञेय-ज्ञानेति पदत्रयस्याभासः । अत एव प्राभाकराः त्रिपुटीप्रतिभासवादिन इति कथ्यन्ते ।

भाट्टास्तु ज्ञानमतीन्द्रियमिति स्वीकुर्वन्ति । अतो ज्ञानजन्यज्ञाततया ज्ञानस्य तत्प्रामाण्यस्य चानुमितिः । अनुमानप्रक्रिया चात्र—घटदर्शनानन्तरं 'घटो ज्ञातः' इति या ज्ञातता उत्पद्यते । तेन 'घटविशेष्यकघटत्वप्रकारकज्ञानजन्यत्वव्याप्या ज्ञातता' इति व्याप्तिस्मरणम्, तेन 'इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्यघटवृत्तिघटत्वप्रकारकज्ञाततात्वात्' इति अनुमितिप्रकारः । अथवा यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तत्प्रकारकज्ञानसाध्या यथा घटे घटत्वप्रकारिका ज्ञातता इत्यनुमितिप्रकारः । अतः स्वज्ञाततया ज्ञानस्य प्रामाण्यं ग्रह्यते ।

मुरारिमिश्रसम्प्रदाये ज्ञानस्यानुव्यवसायेन स्वतोग्राह्यत्वम् । व्यवसाय इत्यनेन ज्ञानमित्यर्थो गृह्यते । ज्ञानानन्तरं तज्जन्यज्ञानविषयकज्ञानम् एवानुव्यवसायः । तेनायं घटः इति घटज्ञानानन्तरं 'घटविषयकज्ञानवानहम्' इति प्रतीतिरेवानुव्यवसायः ।

यत्तु अनुव्यवसायस्तु व्यवसायमात्रविषयकः न तु घटघटत्वविषयकः इत्युच्यते, तन्न, विषयतासम्बन्धेन ज्ञानं प्रति अभेदसम्बन्धेन वा विषयस्य कारणत्वात्, ज्ञानस्य निर्विषयासम्बन्धत्वाच्च ।

इति प्रामाण्यस्य स्वतस्त्ववादिनः । नैयायिकास्तु तन्न स्वीकुर्वन्ति । तेन सम्प्रति नैयायिकमतं प्रदर्श्यते ।

उत्तरपक्षम्—'प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः' इति विश्वनाथतर्कपञ्चाननपादाः । तेन स्पष्टमेव मीमांसकमतविरुद्धत्वम् ।

यदि ज्ञानस्य प्रामाण्यं स्वतोग्राह्यं स्यात् तदा अनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात् ।

अस्यार्थः प्रामाण्यमप्रामाण्यम् वा न स्वतोग्राह्यम्, यस्मिन् ज्ञाने प्रामाण्यनिश्चयाभावः तत्र 'इदं ज्ञानं प्रमा न वा' इति संशयावस्थाया असम्भवत्वात् । ज्ञानस्य तत्प्रामाण्यस्य च ज्ञातत्वे सति संशयाभावः । ज्ञानस्य ज्ञातत्वाभावे सति

संशयानुपपत्तिः । तेन ज्ञाने प्रामाण्यस्यानुमिति । अनुमानप्रकारस्तु—इदं ज्ञानं प्रमा सफलप्रवृत्तिजनकत्वात्, यन्नैव तन्नैवं यथा अप्रमा । अथवा—'इदं पृथ्वीत्व-प्रकारकं ज्ञानं प्रमा, गन्धवतिपृथ्वीप्रकारकज्ञानात्वात्' इति ।

तेन ज्ञानस्य परतो प्रामाण्यं स्पष्टमेव । तथा च स्वयमेव मीमांसकमतमत्र निरस्तम् । अस्यार्थः—यत्तु मरौ पिपाशाकुलः कश्चिज्जलं पश्यति तदर्थं प्रवर्तते प्राप्नोति च तत्र जलज्ञानस्य प्रामाण्यं जललब्धेः पूर्वमेवास्ति इति वदन्ति तन्न-युक्तम् । अन्यथा भ्रमात्मक ज्ञानस्यासम्भवः । यत्तु प्रामाण्यग्रहणात् पूर्वमेव प्रवृत्तिविश्वस्तत्वं लोके दृश्यते इति चेत् तदपि न, पूर्वप्रवृत्तिसाफल्यमत्र प्रमाणं स्यादुत व साफल्येनैव प्रामाण्यम् । अतो ज्ञानस्य प्रामाण्यं न हि स्वप्रकाशत्वेन, न वा, ज्ञानजन्यज्ञाततया न च अनुव्यवसायेन स्वीकार्यम् । परन्तु प्रवृत्ति-साफल्य-मेवात्र कारणम् । इति सर्वमुपपन्नम् ।

इति कूर्माचलमण्डलान्तर्गतमहाकाल्यलङ्कृत-गङ्गावलीक्षेत्र-वास्तव्य-
श्री पूर्णानन्दात्मजेन कोठचारीत्युपाह्वराजेन्द्रप्रसादशर्मणा प्रणीतः
मुक्तावलीप्रकाशः समाप्तः ॥

न्यायसिद्धान्तमुक्तावल्याः

अतिलघूत्तरीयाणि लघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १— न्यायसिद्धान्तमुक्तावली कस्य ग्रन्थस्य व्याख्या वर्तते?

उत्तरम्— कारिकावल्याः।

प्रश्नः २— कारिकावल्याः प्रणेता कः?

उत्तरम्— श्री विश्वनाथ पञ्चानन भट्टाचार्यः।

प्रश्नः ३— मुक्तावल्याः प्रणेता कः?

उत्तरम्— श्रीविश्वनाथ पञ्चाननभट्टाचार्यः।

प्रश्नः ४— कि शास्त्रमाश्रित्य प्रणीतेयं कारिकावली?

उत्तरम्— न्यायवैशेषिकशास्त्रम्।

प्रश्नः ५— श्री विश्वनाथ पञ्चानन भट्टाचार्यस्य पितुर्नाम किमासीत्?

उत्तरम्— श्रीविद्यानिवास भट्टाचार्यः।

प्रश्नः ६— कारिकावल्याः उपजीव्यं किम्?

उत्तरम्— भाषा परिच्छेदः।

प्रश्नः ७— कस्य कल्याणाय श्री विश्वनाथ पञ्चानन भट्टाचार्यः मुक्तावलीं प्रणिनाय?

उत्तरम्— स्वशिष्यस्य राजीवस्य कल्याणाय।

प्रश्नः ८— न्यादर्शनस्य प्रवर्तको महर्षिः कः?

उत्तरम्— महर्षिः गौतमः।

प्रश्नः ९— न्यायदर्शनस्यापरं नाम किम्?

उत्तरम्— अक्षपाददर्शनम्।

प्रश्नः १०— वैशेषिक दर्शनस्य प्रवर्तको महर्षिः कः?

उत्तरम्— महर्षि काणादः।

प्रश्नः ११— वैशेषिकदर्शनस्यापरं नाम किम्?

उत्तरम्— काणाददर्शनम्।

प्रश्नः १२— न्यायवैशेषिक दर्शनयोर्लक्ष्यम् किम्?

उत्तरम्— मोक्षप्राप्तिः।

प्रश्नः १३— न्यायवैशेषिकदर्शने नास्तिकदर्शनकोटोवाटीकतः आस्तिकदर्शन कोटौ वा?

उत्तरम्— आस्तिकदर्शन कोटौ।

प्रश्नः १४— न्यायदर्शनानुसारेण कति प्रमाणानि सन्ति?

उत्तरम्— चत्वारि।

प्रश्नः १५— कानि तानि प्रमाणानि सन्ति न्यायदर्शनाभिमतानि?

उत्तरम्— प्रत्यक्षम—नुमानोपमानशब्दाख्यानि।

प्रश्नः १६— वैशेषिकदर्शनानुसारेण कति प्रमाणानि सन्ति?

उत्तरम्— द्वे प्रमाणे। प्रत्यक्षानुमानाख्ये।

प्रश्नः १७— न्यायवैशेषिकयोः प्रमाण विषये को भेदः?

उत्तरम्— न्यायाभिमतानि चत्वारि प्रमाणानि सन्ति किन्तु वैशेषिकदर्शनाभिमते द्वे प्रमाणे स्तः।

प्रश्नः १८— न्यायाभिमतयोः उपमानशब्दप्रमाणयोः वैशेषिकदर्शनं कुत्रान्तर्भावं करोति?

उत्तरम्— अनुमाने।

प्रश्नः १९— पदार्थविषये न्यायवैशेषिकयोः कियान् भेदः?

उत्तरम्— न्यादर्शनं षोडश पदार्थान् स्वीकरोति किन्तु वैशेषिकदर्शनं सप्तपदार्थान्।

प्रश्नः २०— वैशेषिकदर्शनाभिमताः के सन्ति सप्त पदार्थाः?

उत्तरम्— द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवाय अभावश्च।

प्रश्नः २१— चूडामणिकृत विधुः इत्यादिमङ्गलश्लोके भवस्य कतिविशेषणानि सन्ति?

उत्तरम्— त्रीणि।

प्रश्नः २२— कानि तानि विशेषणानि सन्ति?

उत्तरम्— (१) चूडामणिकृतविधुः, (२) वलयीकृतवासुकिः, (३) लीलाताण्डवपण्डितः।

प्रश्नः २३— चूडामणिकृतविधुः पदस्य का व्युत्पत्तिरस्ति?

उत्तरम्— चूडायाः मणिः चूडामणिः। न चूडामणिः अचूडामणिः। अचूडामणिः चूडामणिकृतो चूडामणीकृतः। चूडामणीकृतो विधुः येन सः = चूडामणिकृतविधुः।

प्रश्नः २४– वलयीकृतवासुकिः इति पदस्य का व्युत्पत्तिः?

उत्तरम्– न वलयम् अवलयम्, अवलयं वलयं कृतः = वलयीकृतः। वलयीकृतो वायुकिर्येन सः = वलयीकृतवासुकिः।

प्रश्नः २५– लीलाताण्डवपण्डितः पदस्य का व्युत्पत्तिः?

उत्तरम्– लीला चासौ ताण्डवः = लीलाताण्डवः। तत्र पण्डितः = लीलाताण्डवपण्डितः।

प्रश्नः २६– चूडामणीकृतविधुरिति श्लोकै कं दोषमाशंकन्ते साहित्यिकाः?

उत्तरम्– समाप्तपुनारातत्त्वदोषम्।

प्रश्नः २७– चूडामणीकृतविधुरिति श्लोके कथं नास्ति समाप्तपुनरातत्त्वदोषः?

उत्तरम्– अत्र उत्थिताकांक्षायाः सत्त्वात् नास्ति समाप्तपुनरातत्त्वदोषः। समाप्त पुनरातत्त्वदोषस्तु तत्र भवति यत्र भवति उत्थाप्याकांक्षा।

प्रश्नः २८– नूतनजलधररुचये इत्यादि पद्ये कस्य स्तुतिः कृता?

उत्तरम्– कृष्णस्य।

प्रश्नः २९– नूतनधररुचये इति पद्ये श्रीकृष्णस्य कतिविशेषणानि सन्ति?

उत्तरम्– त्रीणि।

प्रश्नः ३०–-नूतनजलधररुचये पदस्य का व्युत्पत्तिः?

उत्तरम्– नूतनश्चासौ जलधरः नूतनजलधरः, तस्य रुचिरिवरुचिर्यस्य तस्मै = नूतनजलधररुचये।

प्रश्नः ३१– गोपवधूटीदुकूलचौराय इति पदस्य का व्युत्पत्तिः?

उत्तरम्– गोपानां वधूटयः = गोवधूटयः ता सां दुकूलम् = गोपबधूटीदुकूलम्, तस्य चौराय = गोपवधूटीदुकूल चौराय।

प्रश्नः ३२– नव्यनैयायिकानुसारेण मंगलस्य किं फलम्?

उत्तरम्– नव्यनैयायिकानुसारेण मंगलस्य विघ्नध्वंस एव फलम्, ग्रन्थस्य निर्विघ्नसमाप्तिस्तु बुद्धिप्रतिभादिकारणकलापाद् भवति।

प्रश्नः ३३–मुक्तावल्यनुसारेण ईश्वरो जगतः उपादानकारणमथवानिमित्तकारणम्?

उत्तरम्– निमित्तकारणम्।

प्रश्नः ३४– ईश्वरस्य जगतो निमित्तकारणत्वे किं वैदिकं प्रमाणम्?

उत्तरम्– द्यावाभूमीं जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता। इति वाक्यम्।

प्रश्नः ३५— उपमान चिन्तामणौ केषां सप्तपदार्थव्यतिरिक्तपदार्थत्वं शंकितम्?

उत्तरम्— शक्तिसादृश्यादीनाम्

प्रश्नः ३६— किं नाम सादृश्यम्?

उत्तरम्— तद्भिन्नत्वे सति तदगतभूयो धर्मवत्त्वम्।

प्रश्नः ३७— कारिकावलीकारमते कति द्रव्याणि, कानि च तानि?

उत्तरम्— नव द्रव्याणि। पृथिवी, आपः, जलम्, वायुः, आकाशः, कालः, आत्मा, दिशः, मनश्च।

प्रश्नः ३८— द्रव्यत्वजातौ किं मानम्?

उत्तरम्— कार्यसमवायिकारणताऽवच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्व जातिसिद्धिः।

प्रश्नः ३९— कारिकावलीकारमते कति गुणाः?

उत्तरम्— चतुर्विंशति गुणाः।

प्रश्नः ४०— के चतुर्विंशतिगुणाः सन्ति?

उत्तरम्— रूपं रसो गन्धस्ततः परम्।
स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम्।
संयोगश्च विभागश्च परत्वं चाऽपरत्वकम्।
बुद्धिसुखं दुःखमिच्छाद्वेषो यत्नो गुरुत्वकम्।
द्रवत्वं स्नेह संस्कारावदृष्टः शब्द एव च॥

प्रश्नः ४१— कति कर्माणि कारिकाल्यभिमतानि?

उत्तरम्— पञ्च कर्माणि।

प्रश्नः ४२— कानि पञ्च कर्माणि सन्ति?

उत्तरम्— (१) उत्क्षेपणम्, (२) अपक्षेपणम्, (३) आकुञ्चनम्, (४) प्रसारणम्, (५) गमनञ्च।

प्रश्नः ४३— भ्रमणादिकानामपि अतिरिक्त कर्मत्वं कथं नहि?

उत्तरम्— भ्रमणादिकानाम् गमने एवान्तर्भावात्।

प्रश्नः ४४— के भ्रमणादिकाः? कति च?

उत्तरम्— (१) भ्रमणम्, (२) रेचनम्, (३) स्यन्दनम्, (४) ऊर्ध्वज्वलनम्, (५) तिर्यग् गमनञ्चेति पञ्च भ्रमणादिकाः।

प्रश्नः ४५— सामान्यं कतिविधम्?

उत्तरम्— द्विविधम् सामान्यम्— परम् अपरञ्च।

प्रश्नः ४६— किं नाम सामान्यम्?

उत्तरम्— नित्यात्वे सत्यनेक समवेतत्वम् सामान्यत्वम्।

प्रश्नः ४७— सामान्यलक्षणे नित्यत्वे सतीति पदयोः किं प्रयोजनम्?

उत्तरम्— अनेकसमवेतानां संयोगादिकानाम् सामान्यत्व वारणाय नित्यत्वे सतीतिपदम्।

प्रश्नः ४८— के जातिबाधकाः?

उत्तरम्— व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथाऽनवस्थितिः।

रूपहानिरसंबन्धो जातिबाधकसंग्रहः।

प्रश्नः ४९— परसामान्यं किं वृत्ति?

उत्तरम्— द्रव्यगुणकर्मसु परसामान्यम्।

प्रश्नः ५०— सत्तायाः परत्वं कथं सिद्ध्यति?

उत्तरम्— सकलजात्यपेक्षया अधिदेशवृत्तित्वात् सत्तायाः परत्वम्।

प्रश्नः ५१— द्रव्यत्वादेः पृथिवीत्वाद्यपेक्षया कथं परत्वम्?

उत्तरम्— अधिकदेशवृत्तित्वात्, व्यापकत्वाच्च।

प्रश्नः ५२— विशेषस्य किं लक्षणम्?

उत्तरम्— नित्यद्रव्यवृत्तिर्विशेषः।

प्रश्नः ५३— कः समवायः?

उत्तरम्— अवयवावयविनोः, जातिव्यक्त्योः, गुणगुणिनोः, क्रिया क्रियावतोः नित्यद्रव्यविशेषयोश्च यः संबन्धः स समवायः।

प्रश्नः ५४— किं नाम समवायत्वम्?

उत्तरम्— नित्यसंबन्धत्वम् समवायत्वम्।

प्रश्नः ५५— अभावः कतिविधः?

उत्तरम्— अभावश्चतुर्विधः।

प्रश्नः ५६— के तें अभावाः?

उत्तरम्— प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभाव अन्योन्याभावश्च।

प्रश्नः ५७— किं नाम अभावत्वम्?

उत्तरम्— समवाय सामानाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ता-भावत्वम् + अभावत्वम्।

प्रश्नः ५८— अन्योन्याभावस्य किं लक्षणम्?

उत्तरम्— द्रव्यादिषट्कान्योन्याभाववत्त्वम्।

प्रश्नः ५९— किं नाम संसर्गाभावत्वम्?

उत्तरम्— अन्योन्याभावभिन्नाभवत्वम्।

प्रश्नः ६०— किं नाम अत्यन्ताभावत्वम्?

उत्तरम्— नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम्।

प्रश्नः ६१— सप्तसु पदार्थेषु साधर्म्यं किम्?

उत्तरम्— ज्ञेयत्वादिकम्।

प्रश्नः ६२— द्रव्यगुणकर्मसामान्यविशेषे कीदृशं सादृश्यम्?

उत्तरम्— अनेकत्वं समवायित्वञ्च।

प्रश्नः ६३— सामान्यविशेषसमवायाभावेषु कीदृशं सादृश्यम्?

उत्तरम्— सामान्य परिहीनत्वम्।

प्रश्नः ६४— अणुपरिमाण परममहत्परिमाण व्यतिरिक्तानां द्रव्यादिकानां किं सादृश्यम्?

उत्तरम्— कारणत्वम्।

प्रश्नः ६५— किं नाम पारिमण्डल्यम्?

उत्तरम्— अणुपरिमाणम्।

प्रश्नः ६६— अणु परिमाणं कस्यापि कारणं भवति न वा?

उत्तरम्— नहि।

प्रश्नः ६७— किं नाम कारणत्वम्?

उत्तरम्— अन्यथा सिद्धशून्यस्य नियता पूर्ववृत्तिता कारणत्वम्।

अथवा अन्यथासिद्ध-कार्याव्यवहित-प्राक्क्षणावच्छेदेन कार्याधिकरणवृत्य-त्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वं कारणत्वम्।

प्रश्नः ६८— कारणं कति विधम्? के ते भेदा?

उत्तरम्— कारणं त्रिविधम्। समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्च।

प्रश्नः ६९— कि नाम समवायिकारणम्?

उत्तरम्— यत् समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्।

प्रश्नः ७०— किम् नामासमवायिकारणम्?

उत्तरम्— समवायिकारणे आसन्नम् असमवायिकारणम्।

प्रश्नः ७१— अन्यथा सिद्धाः कतिप्रकारकाः?

उत्तरम्— पञ्च प्रकारकाः।

प्रश्नः ७२— अन्यथा सिद्धस्य भेदान् लिखन्तु?

उत्तरम्— (१) यत् कार्यं प्रतिकारणस्य पूर्ववृत्तितायेन रूपेण गृह्यते कार्यं प्रति तद्रूपम् अन्यथा सिद्ध प्रथमम्। यथा- घटं प्रतिदण्डत्वेम्।

(२) यस्य स्वातन्त्र्येणान्वव्यत्तिरेक स्तः किन्तु कारणमादायै व अन्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम् द्विताम्। यथा- घटम्प्रति दण्डरूपम्।

(३) अन्यम् प्रतिपूर्ववृत्तित्वं गृहित्वैव यस्य यत्कार्यम्प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यम्प्रति अन्यथासिद्धत्वमतृतीयम्। यथा- घटादिकम्प्रति आकाशस्य।

(४) यत्कार्यं प्रति पूर्ववृतित्वंगृहित्वै व यस्य यत्कार्य प्रतिपूर्ववृत्तित्वं गृहते तस्य तत्कार्यम्प्रति अन्यथासिद्धवम्। यथा- कुलालपितुर्घटं प्रति।

(५) अवश्य क्लृप्त नियतपूर्ववर्तिनः एव कार्यसम्भवे तद्भिन्नमन्यसासिद्धम् पञ्चमम्। यथा- रासभादिः।

प्रश्नः ७३— पञ्चस्वन्यथासिद्धेषु क अन्यथासिद्ध आवश्यकः?

उत्तरम्— पञ्चमः।

प्रश्नः ७४— द्रव्याणां किं साधर्म्यम्?

उत्तरम्— समवायिकारणत्वम्।

प्रश्नः ७५— गुणकर्मणोः किं साधर्म्यम्?

उत्तरम्— असमवायिकारणत्वम्।

प्रश्नः ७६— नित्यद्रव्यव्यतिरिक्तानां किं साधर्म्यम्?

उत्तरम्— आश्रितत्वम्।

प्रश्नः ७७— कति नित्यद्रव्याणि?

उत्तरम्— पृथिव्यादिचतुर्णां परमाणवः, आकाश काल-दिङ्मनांसि।

प्रश्नः ७८— पृथिव्यप्तेजोमनसां किं साधर्म्यम्?

उत्तरम्— परत्वापरत्ववत्वं, मूर्तत्वं, क्रियावत्त्वं, वेगवत्त्वं च साधर्म्यम्।

प्रश्नः ७९— कालखात्मदिशां किं साधर्म्यम्?

उत्तरम्— सर्वगतत्वम् परममहत्त्वञ्च।

प्रश्नः ८०— पृथिव्यप्तेजसां किं साधर्म्यम्?

उत्तरम्— रूपवत्वम्, द्रवत्ववत्वम्, प्रत्यक्षविषयत्वं च।

प्रश्नः ८१— पृथिवीजलयोः किं साधर्म्यम्?

उत्तरम्— गुरुत्वम् रसवत्त्वञ्च।

प्रश्नः ८२— वायोः कति गुणाः सन्ति?

उत्तरम्— वायोर्नव गुणाः सन्ति।

प्रश्नः ८३— वायोर्नवगुणेषु को विशेषगुणः के च सामान्यगुणाः?

उत्तरम्— वायोः स्पर्शो विशेषः गुणः। अन्ये च सामान्यगुणाः।

प्रश्नः ८४— वायोः गुणान् लिखन्तु?

उत्तरम्— स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम् अपरत्वम्, वेगाख्यसंस्कारश्च सन्ति वायोर्गुणाः।

प्रश्नः ८५— तेजसः कति गुणाः?

उत्तरम्— तेजस एकादशगुणाः सन्ति।

प्रश्नः ८६— तेजसः के एकादशगुणाः सन्ति?

उत्तरम्— स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगो विभागः, परत्वम्, अपरत्वम्, रूपम्, वेगाख्यः, संस्कारः नैमित्तिकद्रवत्वं च।

प्रश्नः ८७— तेजसः को विशेष गुणः?

उत्तरम्— रूपम् स्पर्शश्च तेजसो विशेषगुणौ।

प्रश्नः ८८— जलस्य कतिगुणाः सन्ति?

उत्तरम्— जलस्य चतुर्दश गुणाः भवन्ति।

प्रश्नः ८९— जलस्य के चतुर्दश गुणाः सन्ति?

उत्तरम्— स्पर्शः, संख्या, परिमाणम् पृथक्त्वम्, संयोगः, विभागः, परत्वम् अपरत्वम्, वेगाख्य संस्कारः, सांसिद्धिकं द्रवत्वम्, गुरुत्वम्, रूपम् रसः, स्नेहश्च।

प्रश्नः ९०— जलस्य के विशेष गुणाः सन्ति?

उत्तरम्— सांसिद्धिकद्रवत्वम्, रूपम्, रसः, स्नेहश्च इमे जलस्य विशेषगुणाः सन्तिं।

प्रश्नः ९१— पृथिव्याः कति गुणाः सन्ति?

उत्तरम्— पृथिव्याः चतुर्दशगुणाः सन्ति।

प्रश्नः ९२— पृथिव्याः के चतुर्दशगुणाः सन्ति?

उत्तरम्— स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, वेगः, नैमित्तिकद्रवत्वम्, गुरुत्वम् रूपम्, रसः, गन्धश्च।

प्रश्नः ९३— पृथिव्याः के विशेषगुणाः सन्ति?

उत्तरम्— स्पर्शः, रूपम्, रसः, गन्धश्चैते विशेषगुणाः पृथिव्याः।

प्रश्नः ९४— आत्मनः कति गुणाः सन्ति?

उत्तरम्— चतुर्दशगुणाः सन्ति आत्मनः।

प्रश्नः ९५— आत्मनः के सन्ति चतुर्दशगुणाः?

उत्तरम्— बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, सख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, भावनाख्यसंस्कारः, धर्मः, अधर्मश्च।

प्रश्नः ९६— आत्मनः के सन्ति विशेषगुणाः?

उत्तरम्— बुद्धिः, सुखम्, दुःखम्, इच्छा द्वेषः, प्रयत्नः, भावना, धर्मः अधर्मश्चैते सन्ति आत्मनो विशेषगुणाः।

प्रश्नः ९७— कालदिशोः कति सन्ति गुणाः?

उत्तरम्— पञ्च सन्ति गुणाः कालदिशोः।

प्रश्नः ९८— कालदिशोः विशेषगुणाः भवन्ति न वा?

उत्तरम्— नहि।

प्रश्नः ९९— आकाशस्य कति सन्ति गुणाः?

उत्तरम्— आकाशस्य षड्गुणाः सन्ति।

प्रश्नः १००— आकाशस्य को विशेषगुणः?

उत्तरम्— शब्दः।

प्रश्नः १०१— आकाशस्य के षड्गुणाः सन्ति?

उत्तरम्— संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, शब्दश्च।

प्रश्नः १०२– ईश्वरस्य कति गुणाः सन्ति?

उत्तरम्– अष्टौ सन्ति गुणा ईश्वरस्य।

प्रश्नः १०३– के अष्टौ गुणाः सन्तीश्वरस्य?

उत्तरम्– संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, बुद्धिः, इच्छा प्रयत्नश्च।

प्रश्नः १०४– ईश्वरस्य कौ विशेषगुणौ स्तः?

उत्तरम्– बुद्धिः, इच्छा, प्रयत्नश्च।

प्रश्नः १०५– मनसः कति गुणाः सन्ति?

उत्तरम्– अष्टौ।

प्रश्नः १०६– मनसः के अष्टौ गुणाः सन्ति?

उत्तरम्– परत्वम्, अपरत्वम्, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभाग वेगश्च।

प्रश्नः १०७– मनसः कोऽपि विशेषगुणो भवति न वा?

उत्तरम्– नहि।

प्रश्नः १०८– के विशेषगुणाः सन्ति?

उत्तरम्– रूपम्, रसः, गन्धः, स्पर्शः, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, भावनाख्यसंस्कारः, शब्दः, स्नेहः, सांसिद्धिकद्रवत्वञ्चै ते सन्ति विशेषगुणाः।

प्रश्नः १०९– पृथिव्याः किं लक्षणम्?

उत्तरम्– समवायेन गन्धकारणम् पृथ्वीलक्षणम्।

प्रश्नः ११०– पाषाणादौ गन्धः कथं नोपलभते?

उत्तरम्– अनुत्कटत्वात् गन्धस्य।

प्रश्नः १११– पृथिव्यां कति रसाः सन्ति?

उत्तरम्– षड्रसाः।

प्रश्नः ११२– पृथिव्यां के षड्रसाः सन्ति?

उत्तरम्– मधुराम्ललवणकटुकषायतिक्तभेदाः रसाः सन्ति पृथिव्याम्।

प्रश्नः ११३– कतिविधो गन्धः पृथिव्यां विद्यते?

उत्तरम्– द्विविधः– सौरभासौरभभेदेन।

प्रश्न: ११४– पृथिवीकतिविधा?

उत्तरम्– द्विविधा– नित्या– अनित्या च।

प्रश्न: ११५– नित्या पृथिवी किं रूपा?

उत्तरम्– परमाणुरूपा।

प्रश्न: ११६– किं नाम नित्यत्वम्?

उत्तरम्– प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वस्य लक्षणम्।

प्रश्न: ११७– किं नामानित्यत्वम्?

उत्तरम्– प्रागभावप्रतियोगित्व ध्वंसप्रतियोगित्वाऽन्यतरवत्त्वं अनित्यत्वम्।

प्रश्न: ११८– अनित्या पृथिवी कति विधा?

उत्तरम्– त्रिविधा देहेन्द्रियविषयाणां भेदात्।

प्रश्न: ११९– पार्थिवं शरीरं कति विधम्?

उत्तरम्– द्विविधम्– योनिजम् अयोनिजञ्चेति।

प्रश्न: १२०– योनिजं शरीरं कतिविधम्?

उत्तरम्– द्विविधम्– जरायुजम् अण्डजञ्चेति।

प्रश्न: १२१– जरायुजं शरीरं केषाम्?

उत्तरम्– मानुषादीनाम्।

प्रश्न: १२२– अण्डजंशरीरं केषाम्?

उत्तरम्– सर्पादीनाम्।

प्रश्न: १२३– अयोनिजं शरीरं कतिविधम्?

उत्तरम्– स्वेदजोद्भिजादिभेदादनेकविधम्।

प्रश्न: १२४– पार्थिवमिन्द्रियं किम्?

उत्तरम्– घ्राणेन्द्रियम्।

प्रश्न: १२५– शरीरस्य किं लक्षणम्?

उत्तरम्– चेष्टाश्रयत्वम् शरीरत्वम्।

प्रश्न: १२६– को नाम विषय:?

उत्तरम्– उपभोगसाधनं विषय:।

प्रश्न: १२७– पार्थिवविषया: के?

उत्तरम्– द्व्यणुकादिकमारभ्य ब्रह्माण्डपर्यन्तमखिलम्।

प्रश्नः १२८– जलत्वजातौ किं मानम्?

उत्तरम्– स्नेहसमवायिकारणतावच्छेदक तया जलत्वजातिसिद्धिः।

प्रश्नः १२९– जलस्य को वर्णः?

उत्तरम्– शुक्लवर्णः।

प्रश्नः १३०– जलस्य रसः कः?

उत्तरम्– मधुरोरसः।

प्रश्नः १३१– जलस्य कीदृशः स्पर्शः?

उत्तरम्– शीतः।

प्रश्नः १३२– कारिकावलीकारानुसारेण जलस्य किं लक्षणम्?

उत्तरम्– वर्णः शुक्लो रसस्पर्शौ जल मधुरशीतलौ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्।। इति।।

प्रश्नः १३३– जलं कतिविधम्?

उत्तरम्– द्विविधम्।

प्रश्नः १३४– कौ जलस्य भेदौ स्तः?

उत्तरम्– नित्यमनित्यं च।

प्रश्नः १३५– नित्यं जलं किं रूपम्?

उत्तरम्– परमाणुरूपम्।

प्रश्नः १३६– अनित्यं जलं कतिविधम्?

उत्तरम्– त्रिविधम्–शरीरेन्द्रिय विषयभेदात्।

प्रश्नः १३७– जलीयं शरीरं योनिजमयोनिजं वा?

उत्तरम्– अयोजिनम्, वरुणलोके प्रसिद्धम्।

प्रश्नः १३८– जलीयमिन्द्रियं किम्?

उत्तरम्– रसनम्।

प्रश्नः १३९– रसनेन्द्रियस्य किं स्वरूपम्?

उत्तरम्– गन्धाद्यव्यञ्जकत्वं रसनेन्द्रियस्य लक्षणम्।

प्रश्नः १४०– तेजसः किं लक्षणम्?

उत्तरम्– उष्णस्पर्शसमानाधिकरणं द्रव्यत्वव्याप्यजातिमत् तेजः।

प्रश्नः १४१– जले कीदृशं रूपं भवति?

उत्तरम्– भास्वरं शुक्लम्।

प्रश्नः १४२– तेजसि कीदृशं द्रवत्वम्?

उत्तरम्– नैमितिकम्।

प्रश्नः १४३– तैजसं शरीरं कतिविधम्?

उत्तरम्– द्विविधम्। नित्यमनित्यञ्च।

प्रश्नः १४४– तैजसं शरीरं योनिजमयोनिजं वा?

उत्तरम्– अयोनिजम्। सूर्यलोके प्रसिद्धम्।

प्रश्नः १४५– तैजसमिन्द्रियं किम्?

उत्तरम्– चक्षुरिन्द्रियम्।

प्रश्नः १४६– सुवर्णस्य तैजसत्वानुमानस्य किं रूपम्?

उत्तरम्– सुवर्णं तैजसम्, असति प्रतिबन्धके अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानजन्यद्रवत्वात्। यन्नैवं तन्नैवं यथा पृथिवीति।

प्रश्नः १४७– अनित्यं तेजः कतिविधम्?

उत्तरम्– चतुर्विधम्। भौमम्, दिव्यम्, उदर्यम्, आकरणंजञ्च।

प्रश्नः १४८– वायोः किं लक्षणम्?

उत्तरम्– अपाकजोऽनुष्णशीतः स्पर्शस्तु पवने मतः।

प्रश्नः १४९– वायोः कीदृशी गतिः?

उत्तरम्– तिर्यग् गतिः।

प्रश्नः १५०– वायवीयमिन्द्रियं किम्?

उत्तरम्– त्वगिन्द्रियं वायवीयम्। स्पर्शग्राहकम्।

प्रश्नः १५१– वायोर्विषयः कः?

उत्तरम्– प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।

प्रश्नः १५२– प्राणादिकाः कति के च ते?

उत्तरम्– प्राणादिकाः दश। प्राण-अपान समान-व्यान-उदान-नाग–कूर्म-कृकल-देवदत्त-धनञ्जय भेदात्।

प्रश्नः १५३– आकाशस्य किं लक्षणम्?

उत्तरम्– आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः।

प्रश्नः १५४– विशेषगुणस्य किं लक्षणम्?

उत्तरम्– यो लौकिकसंयुक्तसमवायादिसंबन्धेन इन्द्रियग्राह्यः अस्ति च तेनैव संबन्धेन द्वीन्द्रियग्रहणायोग्यत्वधर्मवान् गुणत्वव्याप्यजातिमांश्च स विशेषगुणः।

प्रश्नः १५५– आकाशीयमिन्द्रियं किम्?

उत्तरम्– श्रोत्रम् शब्दग्राहकम्।

प्रश्नः १५६– श्रोत्रस्य प्रतिव्यक्तिभिन्नत्वात् श्रोत्रभेदेनाकाशो भिद्यते न वा?

उत्तरम्– आकाश एव एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदान्नहि भिद्यते।

प्रश्नः १५७– कालस्य किं लक्षणम्?

उत्तरम्– विभुत्वे सति दिगसमवेत–परत्वाऽसमवायिकारणाधिकरणं कालः।

प्रश्नः १५८– का नाम दिक्?

उत्तरम्– दूरान्तिकादिधीहेतुरेकानित्या दिगुच्यते।

प्रश्नः १५९– आत्मनः किं लक्षणम्?

उत्तरम्– इन्द्रियाद्यधिष्ठातृत्वम् आत्मनोलक्षणम्।

अथवा– समवायेन ज्ञानाधिकरणत्वमात्मा।।

प्रश्नः १६०– शरीरस्य ज्ञानगुणकत्वं कथं न संभवति?

उत्तरम्– शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।

प्रश्नः १६१– इन्द्रियाणां ज्ञानाश्रयत्वं कथं न भवति?

उत्तरम्– अनुभवस्मरणयो सामानाधिकरण्येन कार्यकारणाभावात् इन्द्रियाणि नहि ज्ञाना श्रयाणि भवन्ति।

प्रश्नः १६२– मन एवात्मा कथं नहि?

उत्तरम्– मनस अणुपरिमाणकत्वात्, प्रत्यक्षे च महत्त्वस्य हेतुत्वात् च।

प्रश्नः १६३– परदेहादौ आत्मा कथमनुमीयते?

उत्तरम्– परदेहादौ आत्मा प्रवृत्त्यादिना अनुमीयते।

प्रश्नः १६४– आत्मा कस्येन्द्रियस्य विषयो भवति?

उत्तरम्– आत्मा मनोमात्रस्य गोचरः।

प्रश्नः १६५– किं नाम विभुत्वम्?

उत्तरम्– परममहत्त्ववत्त्वम्।

प्रश्न: १६६– नैयायिकानुसारेण बुद्धिः कतिविधा?

उत्तरम्– द्विविधा।

प्रश्न: १६७– बुद्धेः कौ द्वौ भेदौ?

उत्तरम्– अनुभूतिः स्मृतिश्च।

प्रश्न: १६८– अनुभूतिः कतिविधा?

उत्तरम्– चतुर्विधा।

प्रश्न: १६९– अनुभूतेः केचत्वारो भेदाः सन्ति?

उत्तरम्– प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दा च।

प्रश्न: १७०– कति प्रमाणानि नैयायिकाभिमतानि भवन्ति?

उत्तरम्– चत्वारि।

प्रश्न: १७१– कानि चत्वारि प्रमाणानि सन्ति?

उत्तरम्– प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

प्रश्न: १७२– किं नाम प्रत्यक्षम्?

उत्तरम्– इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्।

अथवा– ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्।

प्रश्न: १७३– का नाम अनुमिति?

उत्तरम्– परामर्शजन्यं ज्ञानमनुमितिः।

प्रश्न: १७४– का नामोपमितिः?

उत्तरम्– सादृश्यज्ञानकरणकं ज्ञानमुपमितिः।

प्रश्न: १७५– को नाम शाब्दबोधः?

उत्तरम्– पदज्ञानकरणकं ज्ञानं शाब्दबोधः।

प्रश्न: १७६– कतिविधम् प्रत्यक्षं ज्ञानम्?

उत्तरम्– षड्विधम्।

प्रश्न: १७७– प्रत्यक्षज्ञानस्य के षड्भेदाः सन्ति?

उत्तरम्– घ्राणजं, रासनं, चाक्षुषं स्पार्शनं, श्रौत्रं मानसञ्च।

प्रश्न: १७८– गन्ध गन्धत्वयोः केनेन्द्रियेण प्रत्यक्षं भवति?

उत्तरम्– घ्राणेन्द्रियेण।

प्रश्न: १७९– गन्ध श्रयस्य ग्रहणे घ्राणस्य सामर्थ्यं वर्तते न वा?

उत्तरम्– नहि।

प्रश्नः १८०— उद्भूतरूपं कस्य विषयः?

उत्तरम्— चक्षुरिन्द्रियस्य।

प्रश्नः १८१— ज्ञानसामान्यं प्रति किं कारणम्?

उत्तरम्— त्वङ्मनः संयोगः।

प्रश्नः १८२— मनोग्राह्यविषयाः के?

उत्तरम्— मनोग्राह्यं सुखं दुःखं इच्छा द्वेषो मतिः कृतिः।

प्रश्नः १८३— निर्विकल्पकं ज्ञानं इन्द्रियग्राह्यमतीन्द्रियं वा?

उत्तरम्— अतीन्द्रियम्।

प्रश्नः १८४— निर्विकल्पकं ज्ञानं कीदृशं भवति?

उत्तरम्— घट—घटत्वयोः वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकम्।

प्रश्नः १८५— द्रव्यप्रत्यक्षे महत्त्वं केन संबन्धेन कारणम्?

उत्तरम्— समवाय संबन्धेन।

प्रश्नः १८६— द्रव्य समवेतानां गुणकर्मसामान्यानां प्रत्यक्षे महत्त्वं केन संबन्धेन कारणं भवति?

उत्तरम्— स्वाश्रयसमवायसंबन्धेन।

प्रश्नः १८७— द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे महत्त्वं केन संबन्धेन कारणं भवति?

उत्तरम्— स्वाश्रयसमवेतसमवायसंबन्धेन।

प्रश्नः १८८— षड्विधप्रत्यक्षे इन्द्रियं किं भवति?

उत्तरम्— करणम् (साधकतमम्)।

प्रश्नः १८९— को नाम सन्निकर्षः (व्यापारः)?

उत्तरम्— विषयेन्द्रिय संबन्धः।

प्रश्नः १९०— द्रव्यग्रहणे कः सन्निकर्षः?

उत्तरम्— संयोगसन्निकर्षः।

प्रश्नः १९१— द्रव्य समवेतानां घटत्वादीनां ग्रहणे कः सन्निकर्षः?

उत्तरम्— संयुक्तसमवायसन्निकर्षः।

प्रश्नः १९२— सन्निकर्षः कतिविधः?

उत्तरम्— षड्विधः।

प्रश्नः १९३— सन्निकर्षस्य के षड् भेदाः सन्ति?

उत्तरम्— संयोगः, संयुक्तसमवायः संयुक्तसमवेतसमवायः, समवायः समवेत समवायः, विशेषणविशेषभावः।

प्रश्नः १९४— अभावप्रत्यक्षे कः सन्निकर्षः?

उत्तरम्— विशेषणविशेष्यभाव सन्निकर्षः।

प्रश्नः १९५— अभावप्रत्यक्षे किं सहकारिकारणम्?

उत्तरम्— योग्यानुपलब्धिः।

❀❀❀

मुक्तावल्याः अनुमानखण्डस्य

अतिलघूत्तरीयाणि लघूत्तरयिाणि च प्रश्नोत्तराणि

प्रश्नः १— अनुमितौ करणं किं भवति ?

उत्तरम्— व्याप्तिज्ञानम्।

प्रश्नः २— अनुमायां व्यापारः कः?

उत्तरम्— परामर्शः।

प्रश्नः ३— परामर्शस्य स्वरूपं किम्?

उत्तरम्— बह्निव्याप्यधूमवानयमितिज्ञानं परामर्शः।

प्रश्नः ४— लिङ्गज्ञानमनुमितेः करणं कथं न भवति?

उत्तरम्— यद्यनुमितौ लिङ्गं करणं स्यात्तदा अनागतेन विनष्टेन च लिङ्गेनं अनुमितिर्न स्यात्, अनुमितिकरणस्य लिङ्गस्य तदानीमभावात्।

प्रश्नः ५— लिङ्गस्यानुमितिकरणत्वं के मानयन्ति?

उत्तरम्— प्राचीनाः नैयायिकाः।

प्रश्नः ६— को नाम परामर्शः?

उत्तरम्— व्याप्यस्य पक्षवृत्तित्वज्ञानं परामर्शः।

प्रश्नः ७— कीदृशं ज्ञानं अनुमितिजनकम्?

उत्तरम्— व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्या वगाहिज्ञानम् अनुमितिजनकम्।

प्रश्नः ८— का नाम व्याप्तिः?

उत्तरम्— साध्यवदन्यस्मिन् असम्बन्धो व्याप्तिः।

प्रश्नः ९— साध्यवदन्यस्मिन् असम्बन्धः इति व्याप्तेर्लक्षणस्य समन्वयं कुर्वन्तु?

उत्तरम्— बह्निमान् धूमादित्यादौ साध्यो बह्निः साध्यवान् महानसाग्निः तदन्यो जलहृदादिः तद् अवृत्तित्वं धूमस्येति लक्षण समन्वयः।

प्रश्नः १०— कया अरुच्या कारिकाकारः 'अथवा हेतुमन्निष्ठविरह' इत्यादिकं व्याप्तेः द्वितीयं लक्षणमाह?

उत्तरम्— केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धे व्याप्तिः किञ्च 'सत्तावान् जातेः' इत्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिश्च। अत आह 'अथवा हेतुमन्निष्ठ' इत्यादिकं व्याप्ते द्वितीयं लक्षणम्।

प्रश्नः ११— व्याप्तेः द्वितीयं लक्षणं किम्?

उत्तरम्— हेतुमन्निष्ठ विरहाऽप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिः।

अयम्भावः— हेतुमिति निष्ठा = वृत्तिः यस्य स तया विरहोऽभावः। तथा च हेत्वधिकरण वृत्तिर्योऽभावः तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते।

प्रश्नः १२— किं नाम पक्षत्वम्?

उत्तरम्— सिसाधयिषया शून्या सिद्धिर्यत्र न विद्यते सपक्षः। सिसाधयिषा विरह विशिष्टसिद्ध्यभावः पक्षता। तद्वान्पक्षः।

प्रश्नः १३— पक्षलक्षणे सिसाधयिषा विरहविशिष्टत्वं सिद्धेः विशेषणस्य किं प्रयोजनम्

उत्तरम्— सिद्धौ सत्यपि सिसाधयिषा सत्वेऽनुमितिर्नो भवेत्।

प्रश्नः १४— हेत्वाभासाः कतिधा?

उत्तरम्— हेत्वाभासाः पञ्चधा।

प्रश्नः १५— पञ्च हेत्वाभासाः के सन्ति?

उत्तरम्— अनैकान्तिकः विरुद्धः, असिद्धः प्रतिपक्षितं (प्रतिपक्षः) कालात्ययापदिष्टश्च।

प्रश्नः १६— किं नाम हेत्वाभासत्वम्?

उत्तरम्— यद्विषयकत्वेन ज्ञानस्यानुमिति विरोधित्वम् तद् हेत्वाभासत्वम्।

प्रश्न: १७— हेत्वाभासत्व लक्षणे यद्विषयकत्वेन इति पदस्य कोऽभिप्राय: किञ्च प्रयोजनम्?

उत्तरम्— यद् विषयकत्वमित्यस्य यादृश विशिष्ट विषयकत्वम् अभिप्राय:। अतएव— बाधभ्रमस्यानुमिति विरोधित्वेऽपि नक्षति:।

प्रश्न: १८— प्राचीन नैयायिकानुसारेण हेत्वाभासस्य किं लक्षणम्?

उत्तरम्— यद् विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम्।

प्रश्न: १९— किं नामनैकान्तिकत्वम्?

उत्तरम्— साधारणान्य तमत्वमनैकान्तिकत्वम्।

प्रश्न: २०— के साधारणादिका:?

उत्तरम्— साधारणत्वम्, असाधारणत्वम् अनैकान्तिकत्वञ्च।

प्रश्न: २१— को हेतु: साधारण:?

उत्तरम्— साध्यवदन्यवृतिहेतु: साधारण:। यथा शब्दोनित्य: शब्दत्वात्।

प्रश्न: २२— साधारण हेतुना किं क्रियते?

उत्तरम्— व्याप्तिग्रह प्रतिबन्ध: क्रियते।

प्रश्न: २३— को हेतुरसाधारण:?

उत्तरम्— साध्यासमानाधिकरणोहेतुरसाधारण:। यथा— शब्द अनित्य शब्दत्वात्।

प्रश्न: २४— असाधारण हेतुना किं भवति?

उत्तरम्— साध्यसामानाधिकरण्यग्रह: प्रतिबध्यते असाधारणेन हेतुना।

प्रश्न: २५— प्राचीनानुसारेणा साधारणस्य किं लक्षणम्?

उत्तरम्— प्राचीनास्तु— सपक्षवृतिरसाधारण इत्याहु:।

प्रश्न: २६— को नाम सपक्ष:?

उत्तरम्— निश्चित साध्यवान् सपक्ष:।

प्रश्न: २७— को नाम अनुपसंहारी?

उत्तरम्— अत्यन्ताभावप्रतियोगिसाध्यकादि: अनुपसंहारी।

प्रश्न: २८— अनुपसंहारिणा किं क्रियते?

उत्तरम्— व्यतिरेक व्याप्तिज्ञान प्रतिबन्ध: क्रियते अनुपसंहारिणा।

प्रश्न: २९— विरुद्धहेत्वाभासस्य किं लक्षणम्?

उत्तरम्— साध्यव्यापकीभूताभावप्रतियोगी विरुद्ध:।

प्रश्नः ३०— विरुद्ध हेतुः किं करोति?

उत्तरम्— साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धको भवति विरुद्धः।

प्रश्नः ३१— को नाम सत्प्रतिपक्षः?

उत्तरम्— साध्याभावव्याप्यवान् सत्प्रतिपक्षः।

प्रश्नः ३२— सत्प्रतिपक्षे किं भवति?

उत्तरम्— सत्प्रतिपक्षे प्रतिहेतुः (द्वितीय हेतुः) साध्याभावस्य साधको भवति।

प्रश्नः ३३— प्राचीनमतानुसारेण सत्प्रतिपक्षस्य किं लक्षंणम्?

उत्तरम्— अगृहीतप्रामाण्यक-साध्यव्याप्यवत्वोपस्थिति कालीना गृहीता प्रामाण्यक साध्याभावव्याप्यवत्तोपस्थिति विषयः। इति प्राचीनाः प्राहुः सत्प्रतिपक्षस्य लक्षणम्।

प्रश्नः ३४— असिद्धहेतोः किं लक्षणम्?

उत्तरम्— आश्रयासिद्धध्यधन्यतमत्वमसिद्धत्वम्।

प्रश्नः ३५— के आश्रयासिद्ध्यादिकाः?

उत्तरम्— आश्रयासिद्धिः, स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्च।

प्रश्नः ३६— आश्रयासिद्धे अन्यन्नाम किम्?

उत्तरम्— पक्षासिद्धिः।

प्रश्नः ३७— का नामा श्रयासिद्धिः?

उत्तरम्— पक्षे पक्षावच्छेदस्याभावः आश्रयासिद्धिः।

प्रश्नः ३८— का नाम स्वरूपा सिद्धिः?

उत्तरम्— पक्षे व्याप्यत्वाभिमतस्य हेतोरभावः स्वरूपासिद्धिः।

प्रश्नः ३९— का नाम व्याप्यात्वासिद्धिः?

उत्तरम्— साध्याप्रसिद्धिः व्याप्यत्वासिद्धिः।

प्रश्नः ४०— का नाम साधना प्रसिद्धिः?

उत्तरम्— हेतौ हेतुतावच्छेदकस्याभावः साधना प्रसिद्धिः।

प्रश्नः ४१— को नाम बाधः?

उत्तरम्— पक्षे साध्याभावादिः बाधः।

प्रश्नः ४२— बाधस्य किं फलम्?

उत्तरम्— अनुमितिप्रतिबन्धः फलं बाधस्य।

प्रश्नः ४३— साध्याभावज्ञानं प्रति प्रमात्वज्ञानं प्रतिबन्धकं भवति नवा?

उत्तरम्— नहि। प्रमाणाभावात्।

प्रश्नः ४४– अनैकान्तिक हेतोरन्यन्नाम किम्?

उत्तरम्– सव्यभिचारः।

प्रश्नः ४५– को नाम विपक्षः?

उत्तरम्– साध्याभाववान् विपक्षः।

प्रश्नः ४६– को नामासाधारणो हेतुः?

उत्तरम्– सपक्षविपक्षव्यावृत्तो हेतुः असाधारणः। इति प्राचीनाः।

प्रश्नः ४७– प्राचीनानुसारेण साधारणहेतोः किं लक्षणम्?

उत्तरम्– पक्षसपक्षवृत्तिः साधारणः। इति प्राचीनाः।

प्रश्नः ४८– प्राचीनानुसारेण अनुपसंहारिहेतोः किं लक्षणम्?

उत्तरम्– केवलान्वयिधर्मावच्छिन्ना अनुपसंहारीति प्राचीनाः।

प्रश्नः ४९– प्राचीनाऽनुसारेण विरुद्धहेतोः किं लक्षणम्?

उत्तरम्– साध्यव्यापकी भूताभावप्रतियोगित्वम् विरुद्धत्वम्।

मुक्तावल्याः शब्दखण्डस्य

लघूत्तरीयाण्यति लघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १– शाब्दबोधस्य करणं किम्?

उत्तरम्– पदज्ञानं शाब्दबोधस्य करणम्।

प्रश्नः २– ज्ञायमानं पदं शाब्दबोधस्य करणं भवति न वा?

उत्तरम्– नहि। तदभावेऽपि मौनिश्लोकादौ शाब्दबोधात्।

प्रश्नः ३– शाब्दबोधे को व्यापारः?

उत्तरम्– पदार्थज्ञानम्। पदज्ञानजन्यं पदार्थस्मरणमित्यर्थः।

प्रश्नः ४– शाब्दबोधे कः सहकारीं?

उत्तरम्– पदपदार्थ सम्बन्धस्य ज्ञानम्।

प्रश्नः ५– का नाम वृत्तिः?

उत्तरम्– शक्तिलक्षणान्यतरः संबन्धो वृत्तिः।

प्रश्नः ६— शक्तिज्ञानस्योपयोगः कुत्र भवति?

उत्तरम्— शाब्दबोध एव।

प्रश्नः ७— कः अर्थं स्मारयति ? पदार्थं चोपस्थापयति?

उत्तरम्— पदज्ञानस्य एकसंबन्धि ज्ञानधि या अर्थ स्मारकत्वं पदार्थो पस्थापकत्वम्।

प्रश्नः ८— का नाम शक्तिः?

उत्तरम्— पदस्य पदार्थेन सह संवन्धः शक्तिरित्यभिधीयते।

प्रश्नः ९— शक्तिः किं स्वरूपा विद्यते?

उत्तरम्— अस्मात् पदादयमर्थो बोधव्य इतीश्वरेच्छारूपा शक्तिः।

प्रश्नः १०— आधुनिके नाम्नि शक्तिरस्ति न वा?

उत्तरम्— वर्तत एव। एकादशेऽहनि पिता नाम कारयेदिति ईश्वरेच्छायाः तत्र सत्त्वात्। इति प्राचीनाः।

प्रश्नः ११— नव्या ईश्वरेच्छायाः शक्तित्वं स्वीकुर्वन्ति न वा?

उत्तरम्— नहि। तेषां मतानुसारेण तु इच्छैव शक्तिः।

प्रश्नः १२— शक्तिग्रहस्य कानि साधनानि सन्ति?

उत्तरम्— शक्तिग्रहं व्याकरणोपमान कोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

प्रश्नः १३— व्याकरणात् केषां शक्तिग्रहो भवति?

उत्तरम्— धातुप्रकृति प्रत्ययादीनाम्।

प्रश्नः १४— व्यवहारेण शक्तिग्रहप्रकारमुपपादयन्तु?

उत्तरम्— प्रयोजक वृद्धेन घटमानय इत्युक्तम्। तच्छुत्वा प्रयोज्यवृद्धेन घटः आनीतः। तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्य मित्यवधारयति। ततश्च नय गां बधान इत्यादि वाक्याद् अवापोद् वापाभ्यां घटादिपदानां कार्यान्वित घटादौ शक्तिं गृहणाति।

प्रश्नः १५— किं नाम विवरणम्?

उत्तरम्— तत्समानार्थकयदान्तरेण तदर्थ कानि विवरणम्।

प्रश्नः १६— व्यक्तौ शक्तिः कथं न गृह्यते?

उत्तरम्— व्यभिचारादानन्त्याच्च।

प्रश्नः १७— नैयायिकमते व्यक्तौ जातौ वा शक्तिः?

उत्तरम्— जातावेव न तु व्यक्तौ।

प्रश्नः १८— शक्तं किम्?

उत्तरम्— पदम्।

प्रश्नः १९— पदं कति विधम्?

उत्तरम्— चतुर्विधम्।

प्रश्नः २०— पदानां के चत्वारो भेदाः सन्ति?

उत्तरम्— योगिकम्, रूढम्, योगरूढम्, यौगिकरूढञ्च।

प्रश्नः २१— कुत्र पदं यौगिकं भवति?

उत्तरम्— यत्रावयवार्थएव बुध्यते। यथा— पाचकादि पदम्।

प्रश्नः २२— कुत्र पदं रूढम्?

उत्तरम्— यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या बुद्ध्यतेतद्रूढम्। यथा गोमण्डलम्।

प्रश्नः २३— कुत्र पदं योगरूढं भवति?

उत्तरम्— यत्रावयवशक्ति विषये समुदायशक्तिरप्यस्ति तद्योगरूढम्। यथा— पंकजादिपदम्।

प्रश्नः २४— कुत्र पदं यौगिकरूढं भवति?

उत्तरम्— यत्र तु यौगिकार्थ रूढ्यर्थयोः स्वातन्त्र्येण बोधः तद्यौगिकरूढम्। यथा उद्भिदादिपदम्। तत्र हि उद्भेदन कर्ता तरुगुल्मादिः बुध्यते योगविशेषोऽपि।

प्रश्नः २५— का नाम लक्षणा?

उत्तरम्— शक्य संबन्धरूपा लक्षणा।

प्रश्नः २६— लक्षणा कस्मात् भवति?

उत्तरम्— मुख्यार्थ बाधात्।

प्रश्नः २७— मुख्यार्थबाधस्य को हेतुः?

उत्तरम्— तात्पर्याऽनुपपत्तिः।

प्रश्नः २८— गंगायां घोषः इत्यादौ लक्षणा प्रकारं प्रदर्शयन्तु?

उत्तरम्— गंगायां घोष इत्यादौ गंगापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयाऽनुपपत्तिः तात्पर्याऽनुपपत्तिर्वायत्र प्रतिसन्धीयते तंत्र लक्षणया तीरस्य बोधः।

प्रश्नः २९— का नाम लक्षितलक्षणा?

उत्तरम्— यत्र शक्यार्थस्य परम्परा संबन्धरूपा। लक्षणा सा लक्षितलक्षणा। यथा— द्विरेफ पदात् रेफद्वयसंबन्धो भ्रमरे ज्ञायते।

प्रश्नः ३०— तत्पुरुष समासे पूर्वपदे उत्तरपदे वा लक्षणा?

उत्तरम्— पूर्वपदे।

प्रश्नः ३१— धवखदिरौ छिन्धि इत्यादौ लक्षणा भवति न वा?

उत्तरम्— नहि।

प्रश्नः ३२— शाब्दबोधे किं कारणम्?

उत्तरम्— आसत्तिज्ञानम्, योग्यताज्ञानम्, आकांक्षाज्ञानम् तात्पर्यज्ञानञ्च कारणम्।

प्रश्नः ३३— का नाम आसक्तिः?

उत्तरम्— अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः।

प्रश्नः ३४— गिरिर्भुक्तमग्निमान देवदत्तेनेत्पादौ कथं न शाब्दबोधः?

उत्तरम्— आसत्तेरभावात्।

प्रश्नः ३५— का नाम योग्यता?

उत्तरम्— एकपदार्थेऽपरपदार्थसंबन्धो योग्यता।

प्रश्नः ३६— का नाम आकांक्षा?

उत्तरम्— येन पदेन विना यत् पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकांक्षा। क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकांक्षा।

प्रश्नः ३७— तात्पर्यस्य शाब्दबोधे कारणातायाः स्वीकाराभावे को दोषः?

उत्तरम्— यदि तात्पर्यज्ञानं कारणं न स्यात् तदा सन्धवमानयेत्यादौ। क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्।।

❀❀❀

मनोरमा-रत्नविमर्शः । केशवदेव तिवारी । (१-२ भाग)
महाभाष्यनवाह्निकीयालोचनम् । (नवाह्निक-प्रश्नोत्तरी) विजयमित्र शास्त्री
मालविकाग्निमित्र-रहस्यम् । डॉ. बालगोविन्द झा
मीमांसापरिभाषा सोपानम् । डॉ. शिवप्रसाद द्विवेदी
मुक्तावली-प्रकाश । (न्यायसिद्धान्तमुक्तावली-प्रश्नो.) राजेन्द्रप्रसाद कोठ्यारी
मुद्राराक्षस-विवेकः । लोकमणि दाहाल
मृच्छकटिक-सोपानम् । डॉ. नरेश झा
मेघदूत-तत्वालोकः । अशोकचन्द्र गौड़ शास्त्री
रघुवंश-रहस्यम् । रामप्रसाद त्रिपाठी । १-३ सर्ग, ६-७ सर्ग, १३-१४ सर्ग
रत्नावलीनाटिका सोपानम् । डॉ. शिवप्रसाद द्विवेदी
रसगङ्गाधर-सारः । डॉ. नरेश झा
लघुशब्देन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
लघुसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्र शास्त्री
वक्रोक्तिजीवित-दीपिका । डॉ. नरेश झा
वाक्यपदीय-प्रकाशिका । (ब्रह्मकाण्ड) । डॉ. सुरेशचन्द्र शर्मा
वासवदत्ता-रहस्यम् । डॉ. शिवप्रसाद द्विवेदी
वेणीसंहार-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
वेदान्तपरिभाषा-सौरभम् । आचार्य शिवप्रसाद द्विवेदी
वेदान्तसार-प्रदीपः । श्री राजेन्द्रप्रसाद कोठ्यारी
वैदिकसाहित्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
वैयाकरणभूषणसार-दीपिका । श्री रामकिशोर त्रिपाठी
वैयाकरणसिद्धान्तकौमुदी-चन्द्रिका । शास्त्री एवं त्रिपाठी । (१-४ खण्ड) सम्पूर्ण
वैयाकरणसिद्धान्तलघुमञ्जूषा-रहस्यम् । स्वामी रामेश्वर पुरी
वृत्तरत्नाकर-दीपिका । पं. वेदव्यास शुक्ल
व्यक्तिविवेकप्रश्नोत्तरीः । (१-२ विमर्श) कोठ्यारी एवं द्विवेदी
व्याकरणशास्त्रस्येतिहासः । डॉ. ब्रह्मानन्द त्रिपाठी
शाकुन्तल-रहस्यम् । त्रिलोकीनाथ द्विवेदी
शिवराजविजय-दीपिका । पं. वेदव्यास शुक्ल । प्रथम विराम
शिशुपालवध-रहस्यम् । श्री अशोकचन्द्र गौड़ शास्त्री । १-४ सर्ग
संस्कृतसाहित्येतिहास-कुञ्जिका । आचार्य परमानन्द शास्त्री
सांख्यकारिकादर्शः । राजेन्द्रप्रसाद कोठ्यारी
साहित्यदर्पणालोकः । रामजीलाल शर्मा । (१-६ परि.; ७-१० परि.) सम्पूर्ण
साहित्यशास्त्रीयोनिबन्धेतिहासः । वेदव्यास शुक्ल ।
सिन्धुवादवृत्त-रहस्यम् । डॉ कृष्णदेव प्रसाद
स्वरवैदिकी-प्रकाशः । डॉ. बालगोविन्द झा

संस्कृत-विषयक सभी प्रतियोगी परीक्षाओं हेतु उपयोगी पुस्तकें

संस्कृतशिक्षणम्

व्याकरण-साहित्य-ज्योतिष-दर्शनशास्त्र-शिक्षणसहितम्

डॉ. उदय शंकर झा

संस्कृत शास्त्र-मञ्जूषा

डॉ. उदयशंकर झा

विषयवस्तु—• वैदिकसाहित्यअध्ययनम् • व्याकरणशास्त्रअध्ययनम् • छन्द(साहित्य-शास्त्र)अध्ययनम् • ज्योतिषशास्त्रअध्ययनम् • शिक्षाशास्त्रअध्ययनम् • शिक्षा-निरुक्त-कल्प-अध्ययनम् • भाषाविज्ञानअध्ययनम् • पुराणेतिहास-अध्ययनम् • धर्मशास्त्र-कर्मकाण्डअध्ययनम् • विषयानुसारेण वस्तुनिष्ठप्रश्नोत्तराणि

चिरन्तनी

पूर्वशिक्षाशास्त्री मार्गोपदेशिका

डॉ. रमाकान्तमिश्रः

• राष्ट्रिय संस्कृत संस्थान, नई दिल्ली • राष्ट्रिय संस्कृत विद्यापीठ, तिरुपति • श्री लाल-बहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली • जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय, जयपुर एवं अन्य सभी विश्वविद्यालयों द्वारा आयोजित पूर्वशिक्षाशास्त्रीपरीक्षा के पाठ्यक्रमानुसार।

चौखम्बा सुरभारती प्रकाशन
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129
वाराणसी 221001
दूरभाष : (0542) 2335263

चौखम्बा पब्लिशिंग हाउस
4697/2 (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : (011) 23286537

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069
वाराणसी
दूरभाष : (0542) 2420404

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007
दूरभाष (011) 23856391